नं० ४२८९ - घ

न्यायरत्नमालाव्याख्यानम्

नायकरत्नाख्यम्

पत्राणि ७९

नं० ४२८९-घ

न्याय रत्नमालाव्याख्यानम् नायक रत्नाख्यम्

पत्राणि ७६ (पूर्णम्)

4289

नं. ४२८९-घ

8-79

नं० ४२८६ - घ

न्यायरत्नमालाव्याख्यानम् नायकरत्नाख्यम्

पत्राणि ८६



॥श्रीगणेशाय नमः॥ सम्यङ्न यावन्न समेधितमस्तदोषमाम्नायसंज्ञमनुशास्तिविशुद्धचक्षुः। मानांतरानधिगतं
१ कृत स्वं लुरलतत्त्वं न त्वांतरं वपुरुषोत्तमसंज्ञितं तत् १ आम्नायांतिसीमनि स्फुरतियः सद्भावनागोचरः स्वे स्वे कर्मणि
पः प्रशास्ति पुरुषे योग्याधिकारक्रमात्। आधत्ते विविधोपकारमखिलैर्यैगौरशेषांगिनां साक्षाद्धि स्मु खेधते विधि
पं नानापताग अपः २ अविभक्तविभक्तमार्गयोर्मतयोर्भेदगुरूपदिष्टयोः। उभयोरपि पार्थसारथिः प्रथितो याथम
तेभियोगवान् ३ असमष्टभावमपरोक्षकदुःप्रवेशमावार्यतंत्रमधिहृन्यदृष्टप्रकाशं। त्यक्तस पार्थरथसारथिंन्य
तंत्रंसत्पीनयेग्रथितवान्नपरलमासां ४ गुरुतंत्रनियंत्रितोथहं बहुमानाद्धिहपार्थसारथेः॥ विवृणोमि मतोत राश्रि
तो स्थिरभावां नयरत्नमालिकां ५ पारिप्सितस्यग्रंथस्य प्रत्यूहप्रशांतये सर्वोत्कृष्टे श्रुतिशिरः समधिष्ठितां स्वेष्ट
देवतां नमस्यति आनंदमिति आनंदं निरतिशयसुखस्वरूपं अमृतं नित्यमुक्तस्वभावं ज्ञानैकसंविद्रूपं अजं उत्प
त्तिरहितं। अनेन नित्यत्वमपि विवृतं। साक्षिणां सर्वदा सर्ववस्तुसाक्षात्कारिणां। साक्षाद्द्रष्टरि संज्ञायामिति हि व्या १
करणानुशासनं। ईश्वरं सर्ववस्तुनियंतारं॥ सर्वं सर्वप्रपंचात्मकं। असर्वं सर्वज्ञत्वादिगुणयोगात्त्वतः सर्वव
स्तुविलक्षणं। सदसत्सदसदात्मकं नित्यानित्यवस्त्वात्मकमिति यावत्। एतच्च सर्वमित्यस्य विवरणं। विभुं

व्यापिनं। ब्रह्मश्रुतिषु बहुशो ब्रह्मशब्दवाच्यं हरिं पुरुषोत्तमं नारायणं वंदे प्रह्वीभवामीत्यर्थः। उभयोरप्याचार्ययोर्गुरुसंमतयोः
पोः पारदृश्वा पार्थसारथिमिश्रः आस्तिकेगरीयस्याचार्यमते निगूढाभियोगस्तन्मतमेवाश्रित्य प्रबंधं प्रवर्त्तयन्नू प्राची
नप्रबंधेषु वर्त्तमानेष्वपि स्वमतप्रवृत्तेः प्रयोजनातिशयं दर्शयन्नुप्रबंधारंभं प्रतिजानीते मीमांसेति। सूत्रभाष्य
तंत्रवार्त्तिकादि। ततस्ततो विप्रकीर्णानीन्यायानां मतीतरनिरासपूर्वं विशिष्टानुपूर्व्या संकलय्य संदर्शनं मे प्र
बंधप्रयोजनमित्याशयः। तत्र तानाप्रकरणात्मकेन्यायरत्नमालाभिधाने प्रबंधे शास्त्रारंभाक्षेपसमाधानात्म
कतमा सर्वप्रकरणोपजीव्यं प्रयुक्तितिलकाख्यं प्रकरणं वक्तुमुपक्रमते। तत्रेति। स्वाध्यायविध्यर्थः स्वाध्यायो
ध्येतव्य इत्यनेन वाक्येन योध्ययनविधिः तस्यार्थ इत्यर्थः। अथातो धर्मजिज्ञासेत्यत्र शास्त्रादौ भाष्यकारेण मीमां
वि सा किमारंभणीया नारंभणीया वेति संचिंत्यतदर्थं स्वाध्यायाध्ययनविधेरर्थज्ञानपर्यवसानमस्ति न वेति चिंताकृ धा
तात्र स्वाभिमतपूर्वपक्षराद्धांतोपश्चात्स्ववर्तिष्यमाणप्रभाकरमते न पूर्वपक्षराद्धांतौ दूषयितुमनुवदति
तत्रतावदिति। एषा हि तन्मतस्थितिः उभावप्यध्ययनाध्यापनविधी स्वतंत्रौ न तु तयोः परस्परमंगांगिभावः तथा
प्यध्यापनविधिप्रयुक्तोसेतिकर्त्तव्यताकं अध्ययनं उपनयने उपनेयस्याध्यापनांगमेव एतावत्पूर्वपक्षराद्धं।

तयोः समानं । एवं सत्याध्यापनप्रयुक्तस्याध्ययनस्याध्यापनविधिसिद्धिरेव प्रयोजनमिति पूर्वः पक्षः ।। अर्थज्ञानमपि
२ प्रयोजनमिति राद्धांत इति ।। आचार्यकनियोगार्थः स्वाध्याय इति । आचार्यकमाचार्यत्वं तच्च दोक्षितत्वादिवद्लोकिकं
त कं शिष्यकर्तृकदक्षिणादानादिहेतुं यापुरुषार्थोध्यापनसाध्यं वा । त प्रयोजनकाध्यापनजयो नियोग आचार्यकनियो
गस्तदर्थः स्वाध्यायः ।। स्वाध्यायाध्यापनं तत्प्रयोजनकमित्यर्थः । तत्र हेतुस्तत्प्रयुक्तित इति । अध्यापनविधिप्रयुक्तत्वादध्य
2 नस्यानंतसिद्धिरेव प्रयोजनमित्यर्थः । सर्वो हि विधिः स्वसिध्यर्थमेवान्यं प्रयुंक्ते । प्रथमावगतत्वेनेति । आचार्यके हि अध्य
पनानुष्ठानसमकालनिर्वर्त्याध्यापनजन्यत्वेनार्थज्ञानात्पूर्वभावि अर्थज्ञानं तु अध्यापने निर्वृत्ते मीमांसाश्रवणोत्तरभा तकाल
वितया ततः पश्चाद्भावीत्यर्थः । वाक्यार्थविज्ञानं वेदवाक्यार्थनिर्णयः । मीमांसाख्या मीमांसाविचारः तद् — शास्त्रं तद
त्मकमित्यर्थः । श्लोकोस्तात्पर्येनोपावष्टे आचार्यं करोतीति । आचार्यकरणविधिराचार्यकार्थोध्यापनविधिः । प्र
योजनापेक्षायामिति सर्वो हि विधिरधिकारपर्यवसायी अतोध्यापनविधेरपि स्वतंत्रविधितया प्रयोजनापेक्षा
यां सत्यामित्यर्थः । नन्वध्येतृपुरुषनिष्ठत्वेनांतरंगत्वादर्थज्ञानमेवाध्यापनस्य प्रयोजनं युक्तं न त्वध्यापकपु २
रुषांतरं निष्ठमाचार्यकं बहिरंगत्वादित्याशंक्याह पुरुषांतरेति । विधेः प्रयोजनापेक्षायां तुल्यकालप्राप्तयोः प्र

योजनयोः रंतरंगं प्रयोजनं बलीयः भिन्नकालप्राप्तयोस्तु। प्रथममभाविनैव निराकांक्षत्वात्पश्चाद्भाव्यंतरंगमपि नाश्रय
णीयमिति भावः। तेनान्यार्थत्वादिति। अध्यापनस्याध्यापननिर्वर्त्तनैकप्रयोजनत्वात् ध्यापाध्ययनस्य वाध्यापनशेषत्वा
त्प्रतीयमानोपि स्वार्थो न तात्पर्यविषय इति भावः। ननु वेदस्य तत्र तात्पर्याभावेपि शब्दस्वभावात्प्रतीयमानत्वात्तदर्थो नि
र्णेतव्यः तदर्थं च मीमांसारंभः स्यादित्यत्राह। विवक्षितःश्चेति। यस्य शब्दस्य यस्मिन्नर्थे तात्पर्यं स एव निर्णयार्हः ननु प्र
तिमात्रसिद्धः यथा गार्हपत्योपस्थाने विनियुक्तायामैंद्र्यां इंद्रस्वरूपोर्थ इति भावः। प्रयोजनाभावादिति। अनपेक्षितत्वा
दित्यर्थः। ततः किं तत्राह। कर्त्तव्यैवेति। ननु स्वतंत्रोध्ययनविधिः स्वयमेवाध्ययनानुष्ठापकः किमिति न स्यादित्याशयेनाक्षा
क्षिपति कथमिति॥ परिहरति उच्यत इति। विधिषु वाक्येषु ममेदं कार्यमिति कार्यप्रत्ययेता नियोज्यः ततश्च। मर्यसाधन
म्मदनुष्ठेयमिदं कर्मेति कर्मणो मादर्थ्यस्यानवानधिकारी ततः कर्मनिर्वर्त्तकस्तु कर्त्तेति निस्त्रो ऽवस्थाः एकस्यैव क्र
मभाविन्यः तत्र यो विधिः स नियोज्यः स एव तस्य कर्मण्यधिकारमुपजनय्य कर्मानुष्ठानं प्रयुंक्ते यथा स्वर्गकाम नियो
ज्य कदर्शपूर्णमास विधिः यत्र तु नियोज्यो न श्रूयते स तु अप्रयोजकः यथा समिधोपजतीत्यादिः स सिविधिः। अयं
त्वध्ययनविधिर्नियोज्याश्रवणादप्रयोजक इति श्लोकार्थः। अनधिकारस्यानियोज्यस्य। विषयानुष्ठापकत्वमिति वि

द्वि० ३

3

पयो नाम कार्यावच्छेदको धात्वर्थः । इहितन्मतस्यातिः यजेत दद्यात् जुहुयादित्यादिषु लिङादिभिः कार्ये प्रतीयमानं
त्यद्रूपेणाप्रत्येतुमशक्यमिति धात्वर्थविच्छिन्नमेव प्रत्याय्यते यागकार्ये दानकार्यं होमकार्यमिति ॥ तत्रश्च कार्य
प्रतीतिषु यो यावच्छेदको धात्वर्थः स विषयः स एव तत्कार्ये नि --- वृत्तिदशायां करणतां भावति । अधिकारी
नियोज्यः । नत्वमावास्यायामपराह्णे पिंडपितृयज्ञेन चरंतीत्यत्र यथा श्रुतेपि स्वर्गकामो नियोज्यः कल्प्यते तद्वद्
त्रापि तत्कल्पनेनैष्ट्यिथनविधेरेव स्वविषयप्रयोजकत्वं स्यादित्याशंक्याह नचेति । श्लोकं व्याचष्टे स्यादेतदिति
। विधिर्हि स्वप्रतीत्यर्थस्य सिद्ध्यर्थं वा विषयप्रवत्कारणवच्च साक्षान्नियमेन न नियोज्यमा । कांक्षति नियोज्यकाना
मपि प्रयाजादिविधीनां दर्शनात् किंतु स्वस्य कार्यत्वेन स्वविषयानुष्ठानापेक्षायां तत्कर्तृयिकार्येपेक्षाप्रमाणालि
कृपा नियोज्यमपेक्षते । अत्र तु तदनुष्ठानस्यान्यतः सिद्धत्वान्न तदपेक्षेति भावः । अनधिकारिणा इत्यादि यो हि ममेदं
कार्यमिति नियोगेद्धत्येति स एव तत्साधनं कर्म कार्यमित्यवगच्छति प्रत्येवं तदनुतिष्ठतीति भावः । प्रयाजादिनियो ३
गवदिति । प्रयाजादिनियोगा हि दर्शपूर्णमासविध्यनुष्ठापितविषयाइति न नियोज्यापेक्षिणा इत्यर्थः । नचप्र
पनविधेरध्यापनविधिप्रयुक्तविधयानुष्ठानत्वे भवतु निर्नियोज्यता तत्प्रयुक्तिप्रकारेण वतुकेर्थमिति दृष्ठ

युक्तिरस्ययुक्तेरर्थः।साक्षात्२

त्तिकथमिति। उत्तरमाहुस्तदुच्यतइति। उपनीयतुयःशिष्यंवेदमध्यापयेद्द्विजः॥ सकल्पंसरहस्यंचतमाचार्यंप्रचक्ष
तइतिवचनार्थंतावदनुसंधत्ते उपनीयेति। नवाध्यापनमिति अध्ययनस्याध्यापननिर्वर्त्तकत्वात्प्रयोजकत्वमुक्त
त्वात्तद्भूतोपनयनप्रयुक्तिद्वाराध्यापनप्रयुक्तिप्रकारमाहोपनयनमपाति। शिष्यमुपनीयनशिष्यमध्यापये
द्दितिवचनवैचित्र्यबलादुपनयनाध्यापनयोरुभयोरध्यापनांगत्वात्तत्रोपनयनस्याध्यापनापेक्षितोपनेयप्रस
क्तिःसामर्थ्यात्किंचित्कारः। उपनेयस्यपत्वमायनमेवाकिंचित्कारत्वयापर्यवस्यतीतिभावः। उपनयनप्रक्रमाधीत
मुपनयनसंनिधेपाठितत्वं। अध्यापनंनामगुरुमुखोच्चारणानूच्चारणं तच्चयद्यपिलौकिकमेवाध्यापनीयकारितंसंभव
ति—प्युपनयनसंनिधिपाठबलात्तन्नियमकंवैदिकमेवसंपत्स्यतीत्याहवैवेति। नहिद्विषयवेदाध्ययनोद्देशप्रवृत्तं। य
दध्यापनविधिरेवधर्मेवाध्ययनंप्रयुंक्तेतदान्यांतोऽसिद्धस्याध्यापनस्वरूपस्यतदनुष्ठानस्यवनेनैवाक्षेपात्प्रयु
क्तिगौरवंस्यादित्यस्येवप्रयोज्यत्वेपिध्यंतरसिद्धाध्यापनस्वीकारेणतदनुष्ठानमात्राक्षेपादध्यापनविधेःप्रयुक्तिला
घवमपिस्यादितिहृदयं। येसावेधर्मेवाध्यायनविधिप्रयोज्यमतस्तदंगभूतानांभिक्षाचरणादीनामपितत्प्रयुक्त
त्वंस्यादित्याहइतद्द्वारेणेति॥ पूर्वपक्षंनिगमयतितस्मादिति। अविपक्षितस्वार्थत्वादिति अध्ययनस्याध्यापननि

वेर्त्तनेकप्रयोजनत्वात्स्वाध्यायस्य वाध्ययनशेषत्वात्स्वतीपमानेप्यर्थेनतात्पर्यमित्यर्थः ॥ सिद्धांतंवक्तुमुपक्रमते
४ सिद्धांत इति । अध्ययनस्य परम्परयुक्तत्वं सिद्धांतेप्यभिमतमेवेत्याह सत्यमिति । तर्हि राद्धांतः कथमिति तत्राह नत्वि-
ति । कर्त्तृगामित्वेनाध्येतृगामित्वेनापूर्वपक्षिणाः शंकामनुवदति नन्विति । समाधत्ते मैवमिति । अयं भावः अध्यय-
नस्य प्रयोजनापेक्षायां हि प्राथमिकत्वादाचार्यकं प्रयोजनमंगीक्रियेत नत्वेतदस्ति अनुष्ठानस्यान्यतः सिद्धेः अ-
नुष्ठानार्थं खलु प्रयोजनोपेक्षेति । प्रयोजनत्वापरिकल्पनादिति अनाकांक्षितत्वेनेति शेषः । अनुष्ठानसंभवा-
दिति पाठप्रयुक्तेति शेषः । नन्वनुष्ठानस्यान्यतः सिद्धेरनाकांक्षितत्वे नार्थज्ञानं वा कथं प्रयोजनं स्यादित्यत्राहानु-
ष्ठित इति । अनुष्ठानार्थं प्रथममनाकांक्षितत्वेपि पश्चादर्थज्ञानदर्शनेन प्रयोजनापेक्षायामुत्थापितायां तदेव
प्रयोजनतयास्वीकर्तुमुचितमिति भावः । ननु माभूदध्ययनस्याध्या---- त्तनैकप्रयोजनता निरपिकारत्वा
द्धि स्विसिद्धिरेव प्रयोजनं स्यात्तत्तश्चत---- नैकतयावेदस्याविवक्षितार्थतातादवस्थ्यात्तत्रप्रतीपमानस्याप्य ४
र्थज्ञानस्य न प्रयोजनत्वं एकस्मिन्विषये प्रयोजनद्वयायोगात्ततश्च धर्ममीमांसारंभो न स्यादिति शंकते नन्विति । परि-
हरति नार्थेति । शब्दतः प्रतिपन्नस्य नियोगस्य वस्तुस्वभावलब्धस्यार्थज्ञानस्य प्रयोजनत्वे विरोधाभावादन्यतर

परित्यागे कारणाभावादुभयमप्यप्रयोजनमित्यर्थः। अवगतत्वादिति शब्दतोऽर्थतश्चेति भावः। अस्त्वेवं तथापि मीमांसा
रंभे किमायातं तत्राह तत्रेति।। अध्ययनविधिरेवेति। यद्यप्ययं स्वविषयस्य स्वांगानामप्यप्रयोजकः तथापि परप्रयुक्त्ये
व सांगेऽध्ययने निर्वृत्ते सांगाध्ययनसंस्कृतादापाततोऽर्थस्य प्रतीतौ सत्यां मदनुष्ठेयकर्मावबोधसाधनत्वान्मदर्थमिद
मध्ययनमित्यध्येतुरधिकारो जायते तत्तु अध्येयाधिकारलाभादुत्तरकालभाविन्या मीमांसाया अध्ययनविधिरेव प्र
योजक इति भावः।। एवं गुरुमतेन पूर्वोत्तरपक्षावुपन्यस्य स्वयं दूषयितुमुपक्रमते अत्रेति।। विचारः पूर्वोत्तरपक्षरूपः स्व
कीयेनैवेति स्थितं तत्र स्वाभिन्नविषयस्याध्ययनविधेः स्वविषयप्रयोजकत्वसंभवात्पूर्वोत्तरपक्षसाधारणमध्याप
नविधिप्रयुक्तत्वमयुक्त मि त्यर्थः। श्लोको व्याचष्टे पदेमादिना।। नन्वध्ययनविधेरनियोज्यकत्वादप्रयोजकत्वाद
प्रयोजकत्वमुक्तमेवेत्यत आह नियोज्याभाव इति। श्लोकं व्याचष्टे नियोज्येति। कश्चिन्नियोज्य इति अष्टवर्षमित्यादिश्रु
तौ उपनीय तु य इति स्मृतौ चाध्यापनविधेः स्वर्गकामादिवत्कश्चिन्नियोज्यो न श्रूयत इत्यर्थः। ततश्चानियोज्यकत्वादध्या
पनविधेरध्ययनविधिवत्स्वविषयाप्रयोजकस्य तद्द्वारा परप्रयोजकत्वं दूरोत्सारितमित्याह त्वेनेति। ननु तमाचार्यं प्रव
क्षत इत्याचार्यकस्य प्रतीतत्वादध्यापनसाध्यत्वाच्च तत्कामो नियोज्यः स्यादिति शंकते अथेति। तर्हि विषयस्वभावज

न्यस्यार्थज्ञानस्यापि पश्चात्प्रतीतत्वात्तत्कामो नियोज्यः स्यादिति परिहरति ज्ञानकामस्येति। नन्वर्थज्ञानस्य काम्यत्वे
५ हि तत्कामो नियोज्यः स्यात्तस्य काम्यत्वमेव न संभवति। ज्ञातार्थविषये चाज्ञातार्थविषये च ज्ञाने कामनायोगादिति शंक
ते नेनु नेति। न ज्ञातुमिति निर्णीते निर्णये च योगादित्यर्थः। नाप्यज्ञातेर्थ इति ज्ञानस्य स्वरूपेणाकाम्यत्वायोगादर्थो
परक्तस्यैव काम्यत्वं तत्र चापरिज्ञातेर्थे न तु परक्तज्ञानस्यापरिज्ञातत्वात्तद्विषया कामना नोपपद्यत इति भावः। एतदे
5 वाह कथमिति। बुभुत्सावनारूढमिति अज्ञातमर्थमित्यर्थः। विजिज्ञासेयं विज्ञातुमभिलषेयं। सर्वथार्थज्ञानस्याकाम्य
त्वे लौकिकवैदिकस्वप्रवृत्तिविरोध इति परिहरति तदुच्यत इति। अहो बतेत्युपहासे। अभिसंधातुमपकर्तुं वंच
यितुमिति यावत्। अपवरकोदरं गृहान्तःप्रदेशः। तत्तदर्थज्ञानार्थं अभिमतार्थज्ञानार्थं वद्दमानं चेष्टमानं। अत्र
च यथायोग्यं लौकिकवैदिकस्वप्रवृत्तिविरोधो द्रष्टव्यः। न केवलमेतावदन्योपि महाल्लोकव्यतिक्रमोस्तीति पुन
रप्युपहसन्नाह एवमिति। अपि चेत्यर्थः। द्विचंद्रादिज्ञानमिति। मतावत्स्वपमयथार्थज्ञानमपलपति दोषवशात् द्वा ५
प्रवृत्तं चाक्षुषं तेज एकस्मिन्नेव चंद्रमसि क्रमेण ज्ञानद्वयं जनयति न तत्र चंद्रज्ञानगतं द्वित्वं चंद्रे च। गृहीते उभयो
रसंबंधाग्रहात् द्वौ चंद्राविति व्यवहारः। न तु विशिष्टज्ञानमस्तीति। आदिशब्दादिदं रजतमित्यत्रापि दोषवशा

दृग होत विशेषधर्मके शुक्तिस्वरूपे गृहीत्वा स्वरूपे गृहीत्रे सदृशार्द्धताइजनमात्रे च स्मृते सत्युभयोरपि भेदाग्रहादिदं र
जतमिति विशिष्टव्यवहारः न तु विशिष्टज्ञानयपथार्थमिति। अयमर्थः शालिकानाथेन नयवीथ्यां समर्थितः
।धर्माधर्मानुष्ठानेति। यावज्जीवमग्निहोत्रं जुहुतीत्यादिनित्यविधिवाक्येषु नियोगस्य स्वतःकार्यतया प्रतिप
न्नत्वेन साक्षात्फलस्यानाकांक्षितत्वात्फलेकामस्य नियोज्यस्य श्रवणाज्जीवनविशिष्टस्य तस्य च स्ववाक्यल
भ्यत्वेन तत्कल्पनायोगात्केवलं विधिसिद्ध्यर्थमेव कर्मानुष्ठानं न लौकिकार्थमिति तथा न कलंजं भक्षयेदित्यादि
निषेधवाक्येषु भक्षणाभावविषयस्य नियोगस्य स्वतः कार्यतया प्रतीतत्वेन फलानपेक्षत्वाद्भक्षणे प्रवृ
त्तस्य च नियोज्यस्य सामर्थ्यलब्धत्वेन फलकामकल्पनायोगात् भक्षणानर्थहेतुत्वस्यैवेतद्वाक्यात्प्रतिपन्नत्वा
द्विधिसिद्ध्यर्थमेव भक्षणानिवृत्त्यनुष्ठानं नानर्थपरिहारार्थमिति धर्माधर्मयोरर्थानर्थहेतुत्वमपलपतीत्यर्थः।
किंच वेदार्थज्ञानस्य काम्यत्वाभावे भवतां विवक्षितशिष्यापसंमहः राणां स्वप्रवृत्तिरपि न सिध्यतीत्याह तानेवति
ति। बुभुत्साकामना।। उपधावंत उपसर्पंतः। किंचैवं कथमपतंस्तत्र वाथातो धर्मजिज्ञासेति सूत्रप्रवृत्तिविरोधापी
त्याह सूत्रकारस्येति। विहायः सुमनः सदृशी गगनकुसुमकल्पां। किंच ज्ञाताज्ञातविकल्पेनार्थज्ञानस्य काम्यत्वमे

वनात्तीत्याह त्रिप्यसमाहितत्वाद्भवतो भाष्यविरोधोपीत्याह भाष्येति। भाष्याभिप्रेतं समाधानं पृच्छति कथमिति
६ । उत्तरमाह उच्यत इति। सर्वात्मना सर्वप्रकारेण। केन विदितं सामान्याकारेण निश्चितो विशेषाकारेण त्वनि
श्चितो जिज्ञास्यत इति भावः। तथादर्शनादिति लोके वेदे चेति शेषः। तदेव दर्शयति पश्येति। उद्भिदा यजेत वल
भिदा यजेतेत्यादिषु वाक्येषु उद्भिदादिपदस्य ज्योतिष्टोमेन यजेत पशुना यजेतेत्यत्रापि त्येतिष्टोमपशुषु
6 धयोर्नामधेयपरत्वस्य गुणपरत्वस्य च तद्दर्शनात्तथैवान्यतरपरत्वे निश्चिते विशेषांशे जिज्ञासा जायत इत्यर्थः
। उक्तं परिहारं क्रमेण प्रकृतेप्युपपादयति गमयतीति तथेति। नन्वध्ययनात्पूर्वं धर्माधर्मयोः सामान्याकारेणाप्य
परिज्ञा — नाद्विशेषजिज्ञासाभावे कथं तत्कामस्याध्ययनविधिनियोज्यत्वं इत्यत्राह वृद्धेभ्य इति। विशेषरूपेण
तिद्रूत्येऽवृद्धसकाशात्सामान्यतोवगच्छतो माणवकस्य पश्चात्को धर्मः कश्चाधर्मः किं तत्फलं किं तत्साधनं
कान्यंगानि कस्तेषामनुष्ठानक्रमः को वाधिकारीति प्रायेण विशेषजिज्ञासासंभवात्तन्निर्णयार्थं तं प्रत्यध्ययना
विधिमीमांसायर्यं तमध्ययनं विधत्त इति अर्थज्ञानकामस्य नियोज्यत्वं युक्तमिति स्वविधिप्रयुक्तमेवाध्ययनमि ६
ति। हानोपादानेति हानमननुष्ठानं। उपादानमनुष्ठानं। ननु चाक्षरज्ञानस्य काम्यत्वे वेदार्थज्ञानस्य तु काम्यत्वा

संभवात्तत्कामोऽध्ययनविधावधिकारीतिकस्यचिन्मतमनुवदतियत्त्विति।ननुतर्हिवेदार्थेपिजिज्ञासास्यादित्या
शंक्यतत्रतदभावंवक्तुकामःतदुत्पत्तेःप्रयोजकमाहेष्टानिष्टेति।यदिहीत्यादिवेदार्थज्ञानस्यस्वरूपेणपुरुषार्थत्वा
त्वतोनकाम्यत्वंकिंतुपुरुषार्थसाधनकर्मानुष्ठानहेतुतयातत्तुकम्मस्यवेदार्थज्ञानस्यनास्तीत्यर्थः।कुतोनास्ती
त्यत्राहनैमित्तिकेति।नैमित्तिकनिषेधानुष्ठानयोर्विधिसिद्धिमात्रप्रयोजनत्वमधस्ताद्धर्माधर्मानुष्ठानादेरित्यत्रोक्तं
अपुरुषार्थसाधनतयानित्यनैमित्तिकाधिकारपरिज्ञानस्यानपेक्षितत्वेऽनेकाधिकरणोक्तद्विचारःकाकदंतपरीक्षा
कल्पःस्यादितिदूषयतिसवक्तव्याइत्यादिना।।तान्येवाधिकरणानिदर्शयतिकिंसर्वत्रेत्यादि।यावज्जीवमग्निहो
त्रंजुहोतीत्यादिनित्यविधिषुसर्वांगोपेतप्रधानानुष्ठानसमर्थस्यैवाधिकारउतयावच्छक्यांगोपेतप्रधानानुष्ठा
नसमर्थस्यापीतिविचिंत्यविनियोगानुसारेणोवाधिकारस्यतिर्यगधिकरणोनिरंगत्वादंगवैकल्येसाध्यनियो
गासिद्धेःसर्वांगोपसंहारसमर्थस्यैवाधिकारइतिपूर्वपक्षयित्वाऽधिकारवाक्येप्रथमंप्रधानमात्रानुष्ठानसं
मर्थस्यैवाधिकारप्रतीतेस्तदनुसारेणांगेषुशक्त्यनुसारस्यकॅत्वाच्छक्यांगानुष्ठानेपिसाध्यनियोगसिद्धेःसं
भवाच्छक्यांगोपसंहारसमर्थस्याधिकारइतिसिद्धांतितं।अमुंविचारंनित्यकाम्यप्रकरणेस्वयमेवप्रपंचयिष्यति

त्वयितुमुचित २

।तथामतिचेति।अग्निहोत्रादिनित्यविधिष्वेवकिमशक्यांगांतरवत्कालस्यापिकदाचित्परित्यागउतनियमेनो
७ पादानमितिविचिंत्यनित्येष्वशक्यांगपरित्यागस्यांगीकारात्कालस्यापिकदाचित्परित्यागइतिपूर्वपक्षंकृ
त्वाकालस्यतुतःसिद्धांगत्वेनानुपादेयत्वात्तत्रचयथाशक्तिसंपादनस्यासंभवात्कालएवतत्कर्त्तेमिति य
कालेसांगकर्मविधानाच्चकालव्यतिरिक्तांगेष्वेवयथाशक्तिप्रयोगःननुकालइतिकालस्यनियमेनोपा
7 दानमितिराद्धांतितं।मुख्याभावइति।अग्निहोत्रंजुहोतीत्यग्निहोत्रकर्मविधायतत्रदध्नाजुहोतिपयसाजु
होतीतिद्रव्यविहितंकस्यचनद्रव्यस्यापचारेकिंकर्मोत्सृज्यंकिंवाद्रव्यांतरंप्रतिनिधायसमापनीयमिति
विचार्येकर्मशास्त्रद्रव्यशास्त्रयोरन्योन्यमापेक्षत्वादेकशास्त्रत्वात्द्रव्यापचारेद्रव्यांतरेणापिकर्मानुष्ठानेशा
स्त्रार्थानुष्ठानासिद्धेःकर्मोत्सृज्यमित्याशंक्यनिरपेक्षस्यैवकर्मणोनियोगसाधनत्वात्तदाक्षिप्तद्रव्याणां
वकर्मसाधनत्वश्रवणान्निरपेक्षसाध्याभेदेनोभयोर्भिन्नशास्त्रत्वात्द्रव्यापचारेप्याक्षिप्तद्रव्येणोकर्मा ७
नुष्ठानेपिप्रधानशास्त्रार्थत्वसिद्धेःद्रव्यांतरंप्रतिनिधायसमापनीयमितिराद्धांतितं॥तद्वेति।तद्वोपर्ममा नीय
नंद्रव्यंपूर्वद्रव्यसदृशमेवोपादेयमुतयत्किंचिदितिविचिंत्ययेनकेनापिद्रव्येणकर्मनिष्पत्तेरविशेषाद्यत्किं

विदितिपूर्वपक्षपित्वामहृष्टाद्वेमुरम्मादृत्वावयवबाहुल्येनतेनकर्मनिर्वृत्तौमुख्यशास्त्रार्थानुसारात्सहृष्टमेवो
पादेयमितिपरिहृतं।तदर्थस्यैवदार्थस्य।नन्वनेकाधिकरणविरुद्धभयेनकथमफलसाधनज्ञानस्यकाम्य
त्वंतदभावेवाकथंतत्कामस्यनियोज्यत्वमित्याशंक्याहातइति।नित्यनैमितिकाधिकारेषुफलसाधनत्वाभावेपि
भवन्मतेविधिरंसिद्धेरेवप्रयोजनत्वात्तत्साधनज्ञानंतदनुष्ठानार्थमपेक्षितमित्यर्थः।नन्वर्थज्ञानकामस्याध्याप
नविधिनियोज्यत्वेऽध्ययनात्सर्वमेवतदनुष्ठानार्थमथेजिज्ञासावक्तव्यासूत्रकारेणात्वध्ययनानंतरंसाभिहिता
ऽतःसूत्रविरोधइतिशंकनेएवंतहीति।अथाध्ययनानंतरंअतःअध्ययनविधेरर्थज्ञापवर्यंतत्वादित्यर्थः।प
रिहरतिनेति।अध्ययनार्थजिज्ञासापाःसोत्रजिज्ञासातोनभिन्नत्वादित्यर्थः।जिज्ञासाभेदपरंवार्तिकमाहप
थेति।उपनीतस्याध्ययनात्पूर्वमितिशेषः।श्लोकंव्याचष्टेप्रथममिति।तत्तज्ञानमिच्छन्नितिप्रथमजिज्ञासाभिहि
ता।।तेभ्यएवेति।अर्थज्ञानोपायस्यस्वरूपमपरिज्ञानादध्ययनविधिविहितंतन्मुपायंवृद्धेभ्योनिश्चितेत्यर्थः।अ
१४ न्वयेतितदानींप्रकृतिप्रत्ययविभागेनपदार्थेनिर्णीयोपयोगिनीहितीयेत्यर्थः।पदेइति।पदैरभिहितानांपदार्थाना
मेववाक्यार्थबोधकत्वादित्यर्थः।प्रतीयमानइति।आपाततःसामान्याकारेणेतिशेषः।वाक्यार्थविशेषेति।अपं

वाक्यार्थः अयं वेति पूर्वपक्षसिद्धांतविशेषपातंत्रीयाजायते निर्णयो योपायन्यायनिबंधनरूपमीमांसाशास्त्रप्रव
र्तनइत्यर्थः। भाष्यसंमतिमप्याह यथोक्तमिति। इदं सूत्रमिति शेषः। अध्ययनमंतरेणेति। तस्मिन्नसत्येव भव
तीत्यर्थः। ननु निर्णीतवेदप्रामाण्यस्यैवाध्ययनेऽधिकारसंभवात्प्रामाण्याप्रामाण्यविंताऽध्ययनात्पूर्वं प्रा

विनीति तत्साधकं तदनंतरभावितया सूत्रकारेण प्रथमाध्याये निबंधव्यमित्याह प्रामाण्येति। वेदवाक्यार्थान्वे
ष्यान्वयानन्वयविरोधनिमि त्तं प्रामाण्याप्रामाण्यविंतात्वध्ययनानंतरभाविन्येव। सामान्याकारेण प्रवृत्तां विं
तां त्वधिकृत्यायं शंकाग्रंथः। आकातिपत्तिः कालातिक्रमः। प्रसक्तामुपसक्तिं परिसमाप्य प्रकृतमुपसंहरति त
दलमित्यादिना॥ एवमध्ययनविधौ नियोज्यमुपपाद्येदानीं अध्यापनविधिप्रवृत्तिवेलायामाचार्यकस्य प्रती
तेस्तत्कामस्यासंभवात्तत्रैव नियोज्यो न संभवतीति दूषयति प्रत्युतेति। अस्मादुपनीयेत्यादिवचनात्। अनंतरमे
ति॥ किंच प्रमाणांतरेत्यादि श्लोके इत्यर्थः। अर्थज्ञानस्य नियोज्यविशेषणत्वासंभवान्न तत्कामस्य नियोज्यत्व
मिति मुखांतरेण शंकते अथेति। प्रतिबंधापरिहरति तुल्यमिति श्लोकं व्याचष्टे यदेवेति। यो हि ममेदं कार्यमिति
नियोगं मन्यते स नियोगप्रतिसंबंधितया तस्यैवमेव फलं कामयत इति तदेवैस्यावच्छेदकं न त्वन्यत्तत्स्य नियो

गानचयादितिभावः॥विषयफलंकरणफलं॥तुषविमोकवदिति क्रियाफलत्वमात्रेदृष्टांतः।अध्ययनेति।अध्ययन।
स्यस्वाध्यायप्राप्तिद्वारादृष्टेनैवद्वारेणार्थज्ञानोपायत्वाज्ज्ञानंतत्फलमितिभावः॥प्रतिबंधापरिहरतितन्नेति।अध्यापन
नानंतरमेवत्वध्यापकमाचार्यमितिव्यपदिशंतिअतस्तदध्यापनफलमेवनतुनैयोगिकमित्यर्थः।अनंतरंचस्वर्ग
मइतिपदुक्तंतदेवेदानीमाहकिंचेति।स्वर्गकामोयजेतेत्यादिषुपुरुषार्थत्वपामाणांतरावगतेस्वर्गपश्वादौकाम
नाजायतेनात्रतथेत्यर्थः।आहवनीयादिवदिति।आधानादिसंस्कारविशेषजन्यस्यैवाग्नेराहवनीयत्वेनतस्यालौ
किकत्वं॥आदिशब्दाद्गार्हपत्यादिगृह्यते।ननुमाभूदाचार्यकस्यमानांतरावगतिरनेनैवतद्वगतेस्तत्कामस्यनियो
ज्यत्वंस्यादित्याशंकामनूद्यपरस्पराश्रयमाहानैवेति॥साधिकारवाक्योपमानांतरप्रसिद्धगतिफलकामोद्देशेनकर्मवि
धानात्खलुवाक्यपर्यवसानंअत्रलाचार्यकस्यप्रमाणांतरागोचरत्वादनेनैववचनेनाचार्यकेतत्कामेवपरिज्ञातेतदु
द्देशेनाध्यापनविधिनावाक्यपर्यवसानंवक्तव्यंततश्चाचार्यकंकामसिद्धौतदुद्देशेनाध्यापनविधानाद्वाक्यपर्यवसा
नेतस्मिंश्चसवितत्कामसिद्धिरितिवव्यक्तःपरस्पराश्रयइत्यर्थः।ननुमाभूदध्यापनविधावाचार्यककामस्यनियो
ज्यताअध्याप्याध्यापनस्याध्यापनप्रयुक्ततेवनस्वविधिप्रयुक्ततेतिशंकतेस्यादेतदिति।नियोज्यस्यनियोगप्रतिसंबं

धित्वमेवन विषयप्रतिसंबंधित्वमतस्तत्संदृशापान विषयानुष्ठानहेतुत्वमित्यर्थः॥ तर्हि नियोज्यकृत्यं किमित्यत आह
२ किं त्विति। नियोगानुष्ठानमेतस्य कृत्यमित्यर्थः। तस्य कथं वियोगोनुष्ठेय इत्याशंक्य नियोगप्रतिसंबंधिनियोज्यस्व
भावादित्याह स एवेति। नियोज्यस्वभावादित्याह स एवेति॥ नियोज्यदशापन्नस्य नियोगोनुष्ठेय तथाप्रतीपतेतस्यसा
क्षादनुष्ठातुमशक्यत्वात्पातदनंतरं तत्साधनिकर्मणि तस्यैवाधिकारदशा भवतीत्याह प स्यैवेति। अधिकारो नाम
१ कर्मप्रतिसंबंधिनी मदीयताबुद्धिः। अनुष्ठानमिति निमिकारानंतरं तस्यैव कर्मणि कर्तृत्वदशा भवतीत्यर्थः। ननु नि
योज्यस्य साक्षादनुष्ठानहेतुत्वाभावेप्यधिकारित्वाद्धेतुत्वमस्त्येवाध्यायनेनु नियोज्याभावे नाधिकारासंभवा
त्कथमनुष्ठानमित्याशंक्य विषफलेनाधितत्साधनेकर्मण्यधिकारसंभवान्नियोज्याभावेप्यनुष्ठानसिद्धिरित्या
ह यज्ञवेत्यादिना। आधानइति आधाने नियोज्याभावेप्यग्निविनिष्पदकत्वे नाधिकारमात्रादेवानुष्ठानमि
त्यर्थः॥ अस्त्वधिकारमात्रादध्यापनानुष्ठानं तथाप्यध्ययनस्य कथं न स्वविधिप्रयुक्तिरित्यात आह तदाक्षिप्ते १
ति। तत्र्थे अध्यापनविधिन्यायेनाध्यापनविधावपि नियोज्याभावेपि अपिकाराद्यानुष्ठानस्य सिद्धेर्न परप्रयुक्ति
रंगीकार्येति साम्येन परिहरति एवं तर्हीति॥ वावोपुक्तिर्वचनं। श्लोकं व्याचष्टे विनापि नियोज्यमिति। भवद्भिरि

त्यादिभिरध्ययनविधावध्ययनानंतरंमीमांसाश्रवणात्पू— र्वपाततोर्थप्रवीतिरूपोमीमांसाश्रवणाप्रयोजको
ऽविकारोसध्येऽगीकृतः सएवाध्ययनानुष्ठानहेतुतयाप्रथमतएवांगीकार्यइतिभावः।अध्ययनवि— नियोज्याभावे
पिफलाधिकारादेवानुष्ठानंयुज्यतइत्युक्तंतदेवज्येकरणांशेरागादेवप्रवृत्तिर्ननियोगादंगेषुतुविधिवइतिभवती
अत गीकृतमित्यर्थः।फलसंभवेसतोपिनियोज्यस्यानुष्ठानाप्रयोजकत्वादध्ययनविधोफलाधिकारादेवानुष्ठानसि
द्धेस्तदर्थेनियोज्यसदसद्भावचिंतावृथेत्याहफलेवेति॥यदिनियोज्यस्यानुष्ठानाप्रयोजकत्वादध्ययनविधौफला
धिकारादेवानुष्ठानसिद्धेस्तदर्थेनियोज्यसदसद्भावचिंतावृथेत्याहफलेचेति।यदिनियोज्यमंतरेणाप्यनुष्ठानसि
द्धिः तर्हि।विश्वजिदधिकरणेपिविषयानुष्ठानसिद्ध्यर्थंकर्तारंपरिकल्पनदर्थमधिकारिणंनदर्थंचनियोज्यपरिक
ल्पनंकृतंतत्कथमित्यत्राहयत्रस्विति फलसंभवेवखलुनियोज्यस्यानुष्ठानाप्रयोजकत्वंविश्वजितापजेनेत्यधिका
रवाक्येतुसाक्षात्फलस्याश्रुतत्वात्कर्त्रधिकारप्रणाडिकयातियोज्येकल्पितव्येनहिशेषणान्तरयैवस्वर्गस्यकल्पना
यत्वात्तदनुष्ठानार्थेस्वर्गकामनियोज्यपरिकल्पनंकृतमित्यर्थः।प्रकृतेतुफसंभवान्नैवमित्याहात्रत्विति॥उभयोर
पिविध्योर्वाक्यप्रतिपादितंसाम्यमुपसंहरन्नध्ययनस्यपरमपुरुकभावंनिगमयतितततश्चेत्यादिनाश्लोकेन।इदानी

मध्यापनाधिकारस्याध्ययनाधिकारांगभूतमीमांसाश्रवणप्रयोजकत्वं भवतैवांगीकृतं तद्बलात्कारेणोपभूताध्यापनप्रयो
१० जकत्वमप्यंगीकार्यमिति प्रतिपादयितुमुपक्रमते विचारस्येत्यादिना॥ श्लोकं व्याचष्टे आचार्यकमिति। आत्मला
भादिति। अध्यापननिष्पत्तिरध्यापनमात्रापेक्षिणी न विचारापेक्षिणीत्यर्थः। अध्ययनजन्येनाधिकारेणाध्ययन
जन्येनार्थज्ञानरूपेण फलेनेत्यर्थः। तदेवोपपादयन्निगमयति येन हीति। अध्यापनाधिकारस्यापि विचारप्रयोजक
10 त्वेन खल्वध्ययनस्यापि प्रयोजकत्वं सिध्येत्तदेव नास्ति विचारस्याध्यापनविधिप्रयुक्तेरिति शंकनेऽथोच्यतेति। कथ
मध्यापनविधिर्विचारस्य प्रयोजकस्तस्य स्वोपकारकत्वाभावादित्यत आह स हीति। अध्यापनं त्वर्थज्ञानरूपप्रयो
जनसाधनत्वेन हि हितं तन्नाहृत्यैवाध्यापनमध्याप्य न मध्यापनोपकारित्वतश्च तदानीमध्यापनं प्रयुंजानोऽध्यापन
विधिर्विचारमेतेनाध्ययनस्येतत्साधनत्वायोगाद्विचारमपि प्रयुंक्त इति भावः॥ अध्ययनगोचरमध्यापना
पेक्षं यावत्प्रवृत्तं। नाहृतत्वं अर्थज्ञानसाधनत्वं। दूषयति तदयुक्तमिति॥ विशिष्टस्यार्थज्ञानसाधनस्यानंगभावत्वा १०
ध्ययनानंगत्वात्। श्लोकं व्याचष्टे पथपोति। नियोगस्यार्थज्ञानस्य वोभयोः प्रयोजनत्वेनांगीकारात्त्वाध्याये
ध्येतव्यमुत्पन्नेनार्थज्ञानार्थमध्ययनं विधीयते स्वांगभूतोपनयनद्वारेऽध्ययनं प्रयुंजानोऽध्यापनविधिरध्यापनविधि

संनिधिपाठवत्त्वादेतदेववैयर्थमत एव घयोजना। येक्षम ध्ययनं प्रयुंक्तइत्यर्थज्ञानसाधनस्यैव प्रयोजकत्वं सिध्यतीति
भावः। नहि विचारस्य प्रयोजकत्वं कुतस्तत्राह तथापीति। स्वभावतोर्थज्ञानसाधनमध्ययनमनुपकारकत्वात्तेन वैषे
ण्यान प्रयुज्यते नेतत्साध्यमर्थज्ञानमपि न प्रयोज्यं अनुपकारकत्वादेव किंत्वध्ययनस्वरूपमेवेति भावः। अर्थज्ञानस्य साक्षा
दनुपकारकत्वेपि कथं विप्रयोज्यत्वं भवेदित्यत आह पदिर्त्विति। साक्षादनुपकारकस्यापि प्रयोज्यांतरशेषत्वेन द्वार
भवति प्रयोज्यत्वं तदध्ययनस्य नास्तीति भावः॥ प्रयोज्यशेषस्य तद्द्वारा प्रयोजकशेषत्वे दृष्टांतमाह॥ ज्योतिष्टोमेति। मंद्रदी
क्षणीयामनुब्रूयादिति दीक्षणीयायां ततयाविहितस्य वाङ्नियमस्य ज्योतिष्टोमापूर्वेणाङ्गभूतदीक्षणीयापूर्वद्वारे
णप्रयुक्तेत्यर्थः। न केवलमध्ययनानंगत्वमात्रेणानतद्द्वारार्थज्ञानस्य प्रयुक्तिरध्यापनांगित्वादपि न तद्द्वारेण प्र
युक्तिरित्याध्यापनमेति। न त्वंगार्थमंगप्रनुष्ठानं किंत्वंगप्रयोगार्थमेवेति भावः। ततः किंतत्राह यश्चेति। असावित्यर्थोऽध्यापन
विधिः। नन्वस्त्वर्थज्ञानस्याध्यापनेनाप्रयुक्तिस्तथाप्यध्यापनांगतया निर्वाहस्य तेन प्रयुक्तिः स्यादिति शंकते न।
न्विति। अंगमेवेति। अर्थज्ञानं साधयतोऽध्यापनस्य तत्फलोपकारीति भवेदंगत्वमंगीकृत्यैव प्रयोज्यत्वं नास्ती
ति परिहरति सत्यमिति। कथं प्रयुक्त्यसंभव इत्याशंक्य तत्संभवं श्लोकद्वयेनोपपादयति। नेन विना विचारमंतरेण प्र

धानस्यात्मसंभवञ्चाध्ययनस्वरूपनिष्पत्तिः। अन्यथापि तद्विचारासंभवेपि। तल्लाभेऽध्यापननिष्पन्नो। स्वात्मलाभे ध्या-
११ पननिष्पत्तौ। कार्यान्तरांगस्य कार्यान्तरस्याध्यनाध्ययनांगस्य। तस्य विचारस्य। श्लोकोक्तं तात्पर्यं तो व्याचष्टे अध्यापनं हि
त्यादिना॥ पश्वपूर्वमिति पशुच्छेदनतक्षणादिना पूर्विना यूपस्वरूपस्यानिष्पत्तेर्यूपप्रयोजकं पश्वपूर्वं तत्द्वारेणाऽतन्नि-
ष्टं छेदनादिकं यूपयुक्तं इत्यर्थः॥ ज्योतिष्टोमेनेति वाङ्नियमसहितमेव दीक्षणीय पूर्वं ज्योतिष्टोमापूर्वोपकारकं
न तु केवलमिति विद्याङ्नियमो ज्योतिष्टोमापूर्वेणाप्रयुज्यतेइत्यर्थः। पूर्वदीक्षणीमाद्वारेणायाङ्नियमस्य ज्योतिष्टोमा-
पूर्वप्रयोज्यत्वमुक्तं अत्र तत्साहित्येनेति नतु विचार्य। नन्वध्ययनांगोत्तरवदध्यापनांगस्य विचारस्याप्यध्यापन-
प्रयुक्तिः स्यादित्यत्र आह नेनेति। व्रतस्वर्गादीनिव्रतान्यदृष्टद्वाराध्यापनप्रसूह्य प्रशामकतयाध्ययनस्वरूपनिष्पाद-
कत्वादध्यापनप्रयोज्यानि नि भावः। अविधेति अध्यापनस्येति शेषः। तदेवोपपादयति कार्यान्तरेति। यद्यप्यध्यापनमे-
कं तथाप्यर्थज्ञाननिर्वर्तकत्वविशिष्टापन्नस्य विचारांगं न त्वध्यापननिर्वर्तकत्वविशेषापन्नस्य तत्र तस्यानुपयोग इत्यर्थः ११
। निगमयति तेनेति। अध्यापनविधेरर्थज्ञानसाधनत्वविशेषापन्नमध्यापनमप्रतिप्रयोजकत्वासंभवात्स्वाक्षादर्थज्ञानं प्र-
त्यपि तदसंभवाद्ध्ययनाध्यापनानुपयोगित्वेनाध्ययनांगभूतं विचारं प्रत्यपि तदसंभवात्तत्प्रयुक्तिर्विचारस्ये

त्ति निगमनाभिप्रायः केन तर्हि विचारः प्रयुज्यते लवाद्द किं त्विति। नन्वस्त्वध्ययनाधिकारेण विचारप्रयुक्तिः अध्यय
नस्य परप्रयोज्यत्वे किमायातमित्याशंक्य परिहरन्विचारस्य प्रयुक्तिरित्यादिना प्रक्रांतं प्रमेयमुपसंहरन्ति तद्दि
त्रितद्दृष्टीति श्लोकेन। अध्ययनमीमांसाश्रवणमध्यभे विनाध्ययनाधिकारस्य स्वानंतरभाविमीमांसाश्रवणप्रयोजक
त्वं स्यात्पूर्वभाव्यध्ययनप्रयोजकं तु न संभवतीति शंकते ऽथमन्य सद्इत्यादिना सन्यमध्ययनेधिकार इति। अध्यय
नेऽध्येतुः स्वाभिमतसाधनत्वमस्तीत्यर्थः॥ तदा त्वध्ययनात्पूर्वं नागत्पूम्पते नसायतेः। णाषाधिकारः ज्ञामानोहीति
सर्वो हि मदभिमतसाधनमिति ज्ञात्वैव च प्रवर्त्तत इत्यर्थो विद्वद्धिकारेति। अध्ययनावस्थायां अध्यापकस्तावन्मदाचा
र्यकसाधनमेतदिति ज्ञात्वैव प्रवर्त्तत इत्यर्थः। सांगे व्याकरणाद्यंगोपेते वेदार्थावगमादायातनतद् इति षः। सांगवेदा
ध्ययनात्स्वयमभ्यातेपाननोज्ञाने सति मक्षिमतसाधनमध्ययनमिति अध्येतुरधिकारे चावगते निर्णापपर्यंततया नस
ज्ञानस्यापेक्षितत्वया विचारस्तेनैवाधिकारेण प्रयुज्यत इत्यर्थः। अध्ययनप्रवृत्ति। वेलायां माणवकेन स्वाधिकाराप
रिज्ञानेपि ततानिन एव पनदभिमतसाधनमेतदध्ययनमिति ज्ञात्वा माणवकं तत्र प्रवर्त्तयंतीति माणवकाधिक
रणवमानवकस्याध्ययनप्रयोजक इति परिहरन्ति तदयुक्तमिति। सहस्रीतं श्लोकं व्याचक्षेपर्थयेवेति। आतुराणे।

क्षितंफलंगुडादि।मात्राऽग्रियवचनेन।स्वयमपरिज्ञातस्यापि परैः परिज्ञातस्य प्रयोजकत्वानंगीकारे दोषमाहय
१२ दि चैति।माहकः स्वाध्यायप्रापकः।एवंविचारप्रयोजकत्वबलेनाध्ययनस्य स्वाधिकारप्रयुक्तिमुपपाद्याध्यांप
नप्रयुक्तत्वे दोषमप्याह यदि चेति।अध्यापनविधिप्रयुक्तस्याध्ययनस्याध्येतृगामित्वेनांतरंगत्वादर्थज्ञानप्रयो
जनंनावार्यकं बहिरंगत्वादिति भवराद्धांतः एवं वानुष्ठानार्थं खलु प्रयोजनापेक्षा तस्यावमत्यावा।अंतरंग
12 त्वादर्थज्ञानप्रयोजनं स्वीक्रियेत अध्यापनप्रयुक्ते तु तेनैवाध्यापनानुष्ठानसिद्धेरनाकांक्षितत्वेनांतरंगमपि
तन्न स्वीकार्यमिति भावः।ननु पद्यर्थज्ञानं प्रयोजनं न स्यात् ततो मदर्थमध्ययनमित्यध्ययनेऽध्येतुरधिका
रानुदयेति मित्ताभावेनाध्यापनविधिर्निरधिकारः स्यात्तथा युक्तं सर्वेषां विधीनामधिकारपर्यवसानादिति शं
कते नन्वधिकारेति नि हि विधेः स्वाभावतः कर्मरापधिकारापेक्षा किं त्वनुष्ठानार्थमेव तत्त्वाशाध्यापनप्रयुक्त्ये
वसिद्धमिति नात्राधिकारकल्पनं नायुक्ते तिपरिहरति न अनुष्ठानेति।अन्यतोनुष्ठाभेपि व्याप्तिमात्रबलाद नला १२
धिकारपर्यवसानं शंकते स्यादेतदिति।।स्वयं तु न्यायगर्भं राप्रतिहेतुना दूषयति तदयुक्तमिति।।तदलाभेपि
फलप्रयुक्ताधिकारमनपेक्ष्यापिलघ्वात्मकत्वादध्यापनप्रयुक्त्येति भावः।सामान्यतो व्याप्तिमाह यस्येति

न्यायमनपेक्ष्यैव व्याप्तिमात्रबलेनान्यत्रादृष्टस्यार्थस्यान्यत्र साधनेऽतिप्रसंगमाह यदि वेति। नैवेनद्विभवन इति शेषः।
नैमित्तिकनिषेधाधिकारयोः फलं वैधुर्यं धर्मो धर्मयोश्चार्थो नर्थहेतुत्वमित्येतदर्थव्याख्यानावसरे प्रपंचितं। अध्यय
नस्य परप्रयुक्तत्वेऽर्थज्ञानस्य प्रयोजनत्वानुपपत्तेरधिकारासिद्धिं निगमयति तस्मादिति नन्वध्ययनविधेः पर
प्रयुक्तविषयानुष्ठाननयाप्रयोजनाकांक्षावेपि विषयस्वभावलब्धमर्थज्ञानं प्रयोजनं स्यादिति शंकते अथ विधी
ति अर्थज्ञानस्य विध्यनाकांक्षितत्वेतस्य स्वारसिकप्रयोजनत्वानुपपत्तेरध्यापनप्रयुक्ततया तन्निर्वृत्तिरेवाध्यय
नस्य प्रयोजनं स्यात्ततश्च स्वाध्यायस्यायननिर्वर्तकत्वेनाविवक्षितार्थत्वया पूर्वपक्ष एव स्थिरः न तु सिद्धान्तोदयः
स्यादिति परिहरति। अतत्परत्व इति। अध्ययनविधेरिति शेषः। अध्यापनपरत्वेन तन्निर्वृत्तिमात्रप्रयोजनत्वेन। नत
ध्ययनस्याध्यापननिर्वृत्तिमात्रपरत्वेपि वेदवाक्यानां पदशक्तिबलात्प्रतीयमानेष्वर्थेषु तात्पर्यं स्यात्। ततश्च
निर्णयार्थशास्त्रारंभ एव स्यादिति शंकते अथापि कथंचिदिति। शास्त्रारंभेपि दूषणांतरान्नमोस्त्विति परिहरति त
थापीति। अतत्परत्वात् न च वेदत्वमिति। अर्थज्ञानस्य विध्यनाकांक्षितत्वेन तदर्थविचारानुष्ठापकत्वाभावविधिव
लात्तस्यानुष्ठानमित्यर्थः। ततः किं तत्राह अवैधश्चेति। वेदमधीत्य स्नायादिति विहितं दारग्रहणोपविकं समावर्तनक

मे। तदेवान्वयव्यतिरेकमुखेनोपपादयति यदिहीति अर्थज्ञानावसानं अर्थज्ञानप्रयोजनपर्यंतं उत्कर्षे दिति स्नान
१३ स्यसमाप्तिविहितमध्ययनानंतर्यं अध्ययनविधिविरोधाद्बाध्यतेतिभावः। माभूत्स्नानोत्कर्षस्ततः किमित्याशं
क्यतथात्वे विचारस्याध्ययनानंतर्यं नियमो नियमेनारंभश्च न स्यादित्याह यदि परमिति। उक्तरूपकर्मानुष्ठानार्थ
मिति। दारपरिग्रहानंतरभाव्यावश्यकाग्निहोत्रादिकर्मानुष्ठानार्थं स्वेच्छाया विधिमंतरेणालौकिकेन रूपेण लोक
13 प्रमाणासिद्धेन स्वभावेनोपलक्षितेष्वित्यर्थः। उपदेष्टृवचनादिषु यथा कथंचिन्निर्णीते वेदार्थप्रामाणिकपुरुषवच
नादिष्वादिशब्दात्कल्पसूत्रपरिग्रहः। कदाचिदुपयांतरलाभे फलितमाह तथा सतीति स्वाध्यायस्याविवक्षि
तार्थत्वे मीमांसानारंभस्यैवाधस्तादभिहितत्वात्तदनियमरूपमिदं दूषणं कथं विवक्षितार्थत्वांगीकारप
क्षे द्रष्टव्यं। ननु विचारस्यावैधत्वे एवस्त्वयं दोषः सतु वैधत्वे वेति शंकते नन्वध्ययनेति। अस्तु नामाध्ययनांगं वि
चारः॥ तथाप्यध्ययनमात्रसाध्ये विधौ तस्यानुपयोगान्नूनत्वयुक्तताभावेनावैधत्वं तदवस्थमेवेति परिहरति सत्य १३
मिति। कथं स्वकरणांगभूतस्य स्वेनाप्रयुक्तिरित्याशंक्य स्वकरणांगभूतस्यापि कार्यांतरोपयोगितया स्वेनप्रयुक्ति
नैवरत इति दृष्टांतमुखेनोपपादयति। नवेत्यादिना तदेककरणकेनापि प्रयुज्यत इत्यन्वयः। करणेकेपितत्वा

ध्ययनानात्वेसाध्यांतरोपयोगपूर्वांगसाध्यांतरेणानप्रयुज्यत इत्यत्रायं दृष्टांतः। ज्योतिष्टोमेयोवृष्टिकामोयोन्नाद्यकामोयः
स्वर्गकामस्ससौभरेणस्तुवीतेति वृष्ट्यादिफलत्रयसाधनतया सौभनाम्ब्यं साम विहितं तत्सन्निधौ हीषिति वृष्टिकामा
य निधनं कुर्यात् ऊर्गित्यन्नाद्यकामाय ऊं इति स्वर्गकामायेति वाक्यं श्रूयते अत्र च हीषादीनि सौभनफलव्यतिरेकेणानए
थकफलसाधनतया विहितानि किंतु फलत्रयसाधनस्यैव सौभरस्य तत्तत्फलप्रतिनियमेनांगतया विहितानि इति
द्वितीयाध्याये निर्णीतं। तत्र यथा फलांतरसाधनभूतसौभरांगं फलांतरापूर्वेणानप्रयुज्यते तद्वदर्थज्ञानोपयोग्यध्य
२ पनांगस्य विचारस्यनाध्ययनविधिना प्रयुक्तिरित्यर्थः। निधनं नाम साम्नः पंचमोवयवः। कार्यांतरोपयोगिनो विचार
स्य साक्षाद्विधिसिद्ध्यनुपयोगेपि विधेनर्थज्ञानसाधनीभूताध्यपनविषयकत्वेन तादृशविषयसिद्ध्ये स्वयमेन वि
धिर्विचारमाक्षिपतीतिशंकते अथेति। इयं शंका प्रागुक्तन्यायसाम्येन परिहर्तव्येत्याह तदिति। तदेवन्यायसाम्यं दर्श
यति। यद्यपीति। स्वाभावतोर्थज्ञानसाधनस्याप्यध्ययनस्य तेन वेषेणाध्यापनानुपयोगित्वात् यथा तदप्रयुक्तिर्वि
चारस्य तद्वदत्रापीति भावः। विचारस्य विधिसिद्ध्यनुपयोगात् तदप्रयुक्तिं मुक्त्वा विध्युपयोगांगीकारेपि तत्प्रयुक्तिर्नेश्वर
त इत्युपपादयति। यद्यपीत्यादिना। विधिर्हि ममेदं कार्यमिति केनचित्सुनुषेणाप्रतीतः स्वयं तस्यानुष्ठेयः सन्नस्विध्य

थेकारणमिति कर्जेव्यतां च प्रयुंक्ते अध्ययनविधेस्तु नादृष्टकल्पनेत्येतत् पुरुषाभावान्नयाजादिनियोगवत्तस्यानुष्ठेयत्व
१५ मेव नास्ति कारणानुष्ठापकत्वं तु दूरेहरतमिति भावः। न संभवतीति स्वयैवांगीकृतमिति शेषः। नन्वध्ययनविधिर्विष
यस्वभावलब्धमर्थज्ञानं स्वविषयप्रयोजनतया स्वयं स्वीकृत्य स्वसिध्यनुपयोगिनमपि विचारं तदर्थं प्रयुंक्ते इति
विचारो वेदे घटएवेति संकेतस्यादेतदिति स्वीकार एव न संभवतीति विकल्पं दूषयति तदयुक्तमिति। तत्र विनि
15 युंक्त इति। साधनतयेति शेषः। प्रमाणांतरेत्यध्ययनस्यार्थज्ञानसाधनत्वे लोकप्रमाणसिद्धमित्यर्थः॥ नन्व
ध्ययनेनैव ज्ञानं संपादयेत् ननु लिखितपठितादिनेति नियमस्यानन्यलभ्यत्वात्तत्र विधेर्व्यापारएव स्वी-
कार्ये शब्दार्थ इत्याशंक्य तदानीं स्वांगीकारविरोध इत्याह अवघातादिवदिति तादर्थ्येन तत्साधनत्वं लभ्यते वे
ति लोकप्रमाणादेवेत्यर्थः। निगमयति तस्मादिति। विचारस्यावैधत्वे को दोषस्तत्राह इतिनतद्बलेनेति। माभू
त्साम्रोत्कर्षः ततः किमित्याशंक्य तथात्वे विचारस्याध्ययनानंतर्ये नियमो न नियमेन नारंभः स्यादिति १५
पूर्वोक्तमेवानियमरूपमापत्तेदित्याह अध्ययनेति आनंतर्यप्रयोजनपरमिति अथशब्देनाध्ययनानंतर्य
मुक्तं अतः शब्देन विचारस्यार्थज्ञानप्रयोजनकत्वमुक्तमिति भावः महाप्रकृतमुपसंहरति तस्मादिति अथालो

किं कमाचार्यकफलकमुपनयनांगकं भवदभिमतमध्यापनमेव नास्ति प्रमाणाभावादिति वक्तुमुपक्रमते कश्चेति प्रमा
णमाशंकते यदीति स्मृत्यनुमितश्रुतिस्वरूपमाह उपनीयेति स्मृ.तिवचनं यच्छब्दाद्युपबंधादनुवादकमेव न तु विधायकं वि
धायकत्वेप्यध्यापनविधिपरमेव नाध्यापनविधिपरमिति दूषयति तदयुक्तमिति इज्यार्जनार्थप्राप्तत्वादिति इज्यमर्जेयन्
ब्राह्मणो याजयेदध्यापयेत्प्रतिगृह्णीयादिति वचनादध्यापनं इज्यार्ज्जनोपायतया प्राप्तमित्यर्थः। यच्छब्देन चेति यत्तद्
दिशब्दानां प्रसिद्धार्थपरतया विधेयत्वप्रतिबंधकत्वं य एवं विद्वान्पौर्णमासीं यजत इत्यादौ दृष्टमिति भावः। वचनस्या
ध्यापनविधिपरत्वे दृष्टान्तमुखेनोपपादयति यथेवेति अन्नाद्यकामं याजयेदित्यत्र णिच्प्रत्ययान्तयाजनसमभिव्याहृ
तोपि लिङ्शब्दो याजनस्य प्राप्तत्वान्न तद्विधिपरः अन्नाद्यकामस्य नियोज्यस्य यजनविधावेवान्वयसंभवात्तद्वि
धिपर एवेति शेषास्त्रे निर्णीयत इति भावः। एतया। दृष्ट्या प्रयोजकव्यापारपरः शब्द इति। प्रयोजककर्तृव्यापाराभिधायि
णिच्प्रत्यय इत्यर्थः। अध्ययनविधिपर एवेति इज्यार्जनार्थप्रवृत्ताध्यापककलामे उपनीय शिष्याधीयतेति स्मृतिव
चनार्थ इति भावः। उपनयनमप्यध्ययनांगमेव तत्कर्तृमाणवकसंस्कारत्वान्न तदध्यापनांगमित्याह उपनयनमि
ति। उक्तेन न्यायेन प्रत्यक्षश्रुतिवचनमप्यध्यापनविधिपरमेवेत्याह एतेनेति ननु तत्र श्रुतावुपनयीतेत्यात्मनेपदं

नयतेर्न्नित्वात्त्वनितनितः कर्त्रभिप्राये क्रियाफल इत्यनेन सूत्रेण विधीयते तेनोपनयनस्याध्यापनांगत्वेन तत्फलस्येवोप त
१५ नफलत्वात्तस्य चोपनयनकर्तृभूताचार्यगामित्वाद्युज्यते ऽध्ययनांगत्वे तु तत्फस्याध्येतृगतत्वात्क्रियाफलस्या
न्यगामित्वेन नात्मनेपदं सिध्येत् अतोध्यापनांगमेवोपनयनमिति शंकते ननु चेति नात्र नयतेः स्वरितेत्त्वादिनात्मने
पदं किं त्वाचार्यकरणोर्थे संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः इत्यनेन सूत्रेण तत्त्व फलस्य
15 कर्णज्ञानभृतिविगणनव्ययेषु निय इत्यनेन सूत्रेण तच्च फलस्य कर्तृगामित्वे पूर्वसूत्रेणैव सिद्धेन कर्तृगामि
त्वेप्यात्मनेपदं सिध्यर्थं तन्नाध्ययनांगत्वेप्युपपद्यते न त्वध्यापनांगत्व इति दूषयति नेति अकर्त्रभिप्रायत्वात्क
र्तृगामिन्यपि फलेऽत्मनेपदं यथा स्यादित्येवमर्थत्वात् नन्वत्र वृत्तिकारसंमतिमाह यथाहुरिति निगमयति तस्मादि
ति ननु तमाचार्यं प्रचक्षत इत्यध्यापनस्याचार्यफलकत्वश्रवणान्नेदं वचनं इज्याजेनार्थं प्राग्ध्यापनानुवादपरं किं भा
तु पृथगध्यापनविधिपरमित्याशंक्यन्त्यर्थः शिष्यमध्यापयतीति तस्यानुषंगादाचार्यकमपि सिध्यतीत्यनुवा १५
दपरं न तु तदर्थं पृथगध्यापनविधिपरमिति सदृष्टांतमाह अनुषंगादिति चातुर्मास्ये वैश्वदेवपर्वणि तप्ते पय
सि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रुतं अस्यार्थः तप्ते पयसि दधि प्रक्षिपेत् तद्देवघनीभू

तमाभिसूाभवतितयाविश्वदेवान्यजेततत्रजलावयवप्रचुरंवाजिनाख्यामपिद्रव्यमुत्पद्यतेतेनवाजिनोयजेतेति ।अत्रपयःसंस्कारत्वादध्यानयनस्यापसएवनूपनसमत्याभिज्ञानेनामिक्षोत्पादादामिक्षाशेषभूतमेवदध्यानयन मनुषंगाद्यथावाजिनंसाधयतितथेदमपीत्यर्थः ॥ आचार्यत्वस्यपराभिमतमलौकिकत्वंफलत्वंचांगीकृत्यैवतद् र्थोध्यापनविधिर्निनाकृतः इदानींनतदलौकिकंनापिफलंकिंतुआचार्यशब्दस्तुपाचकादिशब्दवदध्यापनक्रि यासंबंधनिबंधनःस्मृतिवचनमपिशब्दप्रवृत्तिनिमित्तप्रदर्शनपरमेवेत्याह किंचनचेतिननुमाभूदाचार्यकार्थम ध्यापनंअथापिब्रह्मलोकादिफलशेषतयावचनांतरेणविहितंविधादनाल्मकमध्यापनंतत्प्रयुक्तमध्ययनं स्यादितिशंकते ।अथापीतियद्यप्यस्योपनयनांगकत्वाभावान्नवेधाध्यापनप्रयोजकत्वमुपपद्यतइतिवक्तुंशा ।कांतथापिप्रकारांतरेणपरिहरन्तितथापीतिनियोज्याभावात्प्रयाजादिनियोगवत्प्रयोजकत्वमेवनघटतइति भावः ।ननुनियोज्यानाभावेपिफलसाधनत्वस्यश्रवणात्तावन्मात्रेणाधिकानोदयेसत्यध्यापनानुष्ठानेतत्प्रयु क्तिरध्ययनस्यस्यादित्यत्राहअधिकारेति ।अध्यापनस्यपनप्रयुक्त्यापूर्वोक्तन्यायेनवेधत्वंविचारस्यादित्याह विचा न रस्येति ।इदानींपूर्वोक्तन्यायसाम्येनउभयोनपिविधयोःप्रयुक्तिसंभवेप्यध्यापनप्रयुक्त्याअयणेन्यायानुगुण्यंवातद्

वेयुक्तमितिकस्यचिन्मतमाशंक्यनेकाश्चेदित्यादिनातद्देवोपपादयति।तथाहीतिश्लोकेनस्वमहिम्नास्वसामर्थ्येन।तद्द्वा
१६ रेणाज्ञानद्वारेण।अपुरुषार्थत्वादितिस्वर्गादिवत्सुखानुरूपत्वाभावादित्यर्थः।नचैतेषामिति।श्रुत्यादिविनियोजकप्र
माणाभावादित्यर्थः।उपकारकमात्रत्वादितिविद्याविधुनस्योपनकर्मानुष्ठानासंभवात्तदुपकारकत्वंज्ञानस्येत्य
र्थः।अंगमेवेतितमाचार्यमवस्नतइतिविनियोजकवाक्यासंभवादित्यर्थः।ननुशेषिणोपिप्रयोजकत्वंनशेषित्व
16 मात्रेणकिंतूपकार्यत्वेनतच्चाग्निहोत्रादेनावार्यकस्य।वज्ञानमध्यापनेवर्ततेत्यविशिष्टमितिनोभयोनप्यध्यापन
प्रयोजकत्वेवैषम्यमस्तीत्यतआहनचेति।यद्यप्युपकार्यस्यापिप्रयोजकत्वंसंभवतितथापिशेषेणासहसंबंधस्य
श्रुत्यादिभिर्दृष्टिप्रतिपन्नतयातस्यप्रयोजकत्वेसंभवतिनाप्रतिपन्नसंबंधस्यतस्ययुक्तमितिभावः।आभिमा
दध्यापनंप्रतिशेषिणीविनियोजकप्रमाणसद्भावात्वाजिनेनूपकार्यमात्रंनतद्भावात्।अंगद्वारेण।अंगत्वेन
तिपावत्।तस्यस्वांगतयावतंप्रतिस्वस्यप्रयोजकत्वमित्यर्थः।उपकान्तद्वारेण।उपकान्ततयेतिपावत्।भवदुक्तन्या १६
यानुगुण्यमेवनतुनवेतिदूषयतितदयुक्तमिति।तिष्ठतुतावद्व्यवहितंप्रयोजकमाचार्यकमप्यैहोत्रादिकंवसं
निहितप्रयोजकयोस्त्वध्यापनोर्थज्ञानयोरर्थज्ञानस्यैवाध्यापनप्रयोजकत्वेन्यायानुगुण्यमितिभावः।नकर्मांगज्ञा

नेयथाप्याचार्यमतेज्ञानमुत्तरकर्मांगमिति। अग्निहोत्रादेन प्यंगद्वारेणोपप्रयुक्तिः संभवतितथाप्यत्रतदनंगीकारेणोप
पिहारः। ननुज्ञानस्याप्यपुरुषार्थत्वात्प्रयोजकत्वंनसंभवतीत्युक्तमेवेत्याशंक्यासुस्वरूपस्यापितस्य। तत्साधनतयापरंप
रंयापुरुषार्थत्वात्प्रयोजकत्वंयुज्यतइत्याह यद्यपीति दक्षिणालाभेति। आचार्यो यो यहितमाचरेदाचार्यो यवरोदेयइत्यादिशि
ष्यस्मृतिविहितदक्षिणालाभादिहेतुतयालौकिकस्यापितस्यपुरुषार्थत्वमितिभावः। परंपरयापुरुषार्थस्यापिप्रयोजक
त्वेगुरुमतमात्रसिद्धंदृष्टांतमुक्त्वासर्वाभिमतमुदाहरणांतरमाहनहीति। अर्थितंप्रार्थितंप्रकारांतरेणाप्यध्ययनस्य
स्वाधिकारप्रयुक्तिरेवयुक्तेत्याह यद्यपीत्यादिना संनिहितस्यव्यवहितस्यवाप्रयोजकत्वांगीकारेप्यर्थेज्ञानस्याग्निहोत्रादेरेव
वाध्ययनसमानाश्रयत्वेनांतरंगतयानघुक्तंनत्वध्यापनाचार्यकयोर्बहिरंगयोरितिभावः। ननुव्यवहितस्यप्रयोजकत्वांगीका
रेत्वाचार्यकत्वस्यैवनघुक्तंनत्वग्निहोत्रादेरित्यधस्तादुक्तमित्याह योपीति। अध्यापनविधेनित्यत्राचार्यकस्येत्यर्थः। क्रमभेद
मात्रमिति। अग्निहोत्रादि प्रथममनंगंप्रयुज्यपरत्वात्तदंगंप्रयुक्तेआचार्यकंतुप्रथममंगंप्रयुज्यपश्चादनंगमितिपौर्वापर्यभे
दमात्रमित्यर्थः। व्यवहितस्यप्रयोजकत्वेनकेवलमुभयोनपि अग्निहोत्रादेनैवप्रयोजकत्वेप्रागुक्तमंतरंगत्वमप्यधिकं
निमित्तमस्तीत्याह। समानेति। व्यवहितस्यप्रयोजकत्वमंगीकृत्यैतदुक्तंतदपिनास्तिसंनिहितस्यज्ञानस्यैवतदुपपाद

नादित्याहनचेति। प्रपञ्चयिष्यत इति स्वसिद्धान्तप्रतिपादनावसर इति शेषः। सिद्धमेकदेशिमतं दूषयति सम्प्राप्य पुनर्नन्वध्यापन
१७ प्रयोजकत्वानुपपत्तिं प्रतिपादयति कथं चेति। आचार्यकविधिरध्यापननियोगः कथं वा न प्रयुञ्जीतेत्यत्राह समानेति यो
हि विधिं स्वस्यानुष्ठेयतया प्रत्येति स एव तत्सिद्ध्यर्थं तत्कारणमिति कर्तव्यतां चानुतिष्ठति नान्य इति भावः। नन्वध्यापको
17 माणवकमध्ययने तत्फलदर्शनेन स्वकार्यसिद्ध्यर्थमेव प्रवर्तयतीत्यन्यकार्यस्यापि तस्यानुष्ठानप्रयोक्तृत्वं युक्तमित्याशं
५५ कामतृ घनथापि प्रदर्शितस्यैव फलस्यापि न प्रयोजकत्वं स्यान्नाध्यापककार्यस्येति पनिहन्ति यदीति श्लोकेन। स्य
माणवकस्य स्वाधिकारप्रदर्शनादध्यापनफलप्रदर्शनात्तत्र न पाणो कारे सति। ननु माणवकाधिकारप्रदर्शनस्याध्याप
ककार्यार्थत्वात्तदेव प्रयोजकं स्यादिति शंकां दृष्टान्तमुखेन करोति स्थपतीति नोदं वा स्थमयेचरुं निर्वपेदिति प्रकृत्येन या
निषादस्थपतिं याजयेदित्यत्रैव वर्णिकमध्ययनानधिकारिणोऽप्यत एवाविदुषः स्वाधिकारानभिज्ञं निषादस्थपति
मधिकृत्येष्टिर्विहिता तत्र यथा स्वप्रयोजनसिद्ध्यर्थमृत्विग्भिरनुष्ठापनेन निषादाधिकारण एवेष्टेः प्रयोजकः तथा माण १७
वकाधिकार एव प्रयोजक इत्यर्थः। अथेदानीं माणवकाधिकारप्रदर्शनेन स्वकार्यसिद्ध्यर्थमध्ययनानुष्ठापनेऽध्यापन
विधेरेव प्रयोजकत्वमङ्गीकृत्यापि तन्मतं पूर्वपक्षे निरधिकारत्वादध्यापनविधेरधिकारप्रदर्शनासंभवात्तन्मुखेन

प्रयोजकत्वंनसंभवतीतिदूषयन्तिपूर्वपक्षइतिश्लोकेन। ननुपूर्वपक्षेप्यध्ययनविधेःफलप्रयुक्ताधिकारासंभवेपि
नियोगप्रयुक्ताधिकारसंभवात्तत्प्रदर्शनमुखेनानुष्ठानंस्यादितिशंकतेनन्वितिपरिहरन्तिनेति। यस्यहिनियोगःका
र्यतयाप्रतीयतेतस्यैवासौस्वसाधनेऽधिकारंजनयतिनान्यस्येतिभावः। कथंमाणवकस्याध्ययननियोगोनकार्यइत्य
त्राहअनियोज्यत्वादिति। अध्ययनविधेरनियोज्यत्वंपूर्वोत्तरपक्षद्वयेपिभवतीति। कृतंतस्यापूर्वत्वमेवनतुका
र्यत्वंनापिनियोगत्वमितित्वन्मतमर्यादेतिभावः। नन्वध्ययनेफलप्रयुक्तस्यनियोगप्रयुक्तस्यवाधिकारस्यासं
भवात्प्रदर्शनेनानुष्ठानासंभवेपिस्वकार्यसिध्यर्थमध्यायकेनयेनकेनापिप्रकारेणानुष्ठापनसंभवात्परप्रयु
क्तत्वसिध्यतीतिशंकते। अथेतिउपायान्तरेणबलात्कारादिना। विश्वजित्यप्येवमेवयाजनविधिप्रयुक्त्यैवानुष्ठान
सिद्धेर्नियोज्यपरिकल्पनंनस्यादितिपरिहरन्तितथासतीति। अनुष्ठानसिद्ध्यइतिश्रुतनियोज्यकेषुदर्शपूर्णमासा
दिविधिषुप्रथमंनियोज्यान्वयेसतितन्निमित्तंतत्साधनेधिकारोदयःतदुपदनिमित्तंचविषयानुष्ठानंततेनचनि
योगकार्यनिर्वाहइतिक्रमस्थितिः। अश्रुतनियोज्यकेषुविश्वजिदादिषुप्रथमंनियोगेसामान्यतःकार्यतयाप्रति
पन्नेतन्निर्वाहायविषयानुष्ठानापेक्षातदर्थमधिकारापेक्षातदर्थंचनियोज्यापेक्षातेनतत्रदार्कोक्षाक्रमेणकर्त्रेधिका

रिनियोज्यपरिकल्पनमितिक्रमस्थितिनितिभावः ननु विश्वजितो निरधिकारत्वे द्रव्यार्जनस्यैवासिद्धेर्योजकानयाजयेयुः
१८ न अतः परप्रयुक्तिरेव संभवतीतिशंकते अथेति। अनर्थकत्वात् द्रव्यार्जनरूपप्रयोजनासिद्धेः पक्षेऽनर्थकत्वात् विश्व
जितो निष्फलत्वात्। कथं तेषां प्रयोजनं न सिध्यतीत्यत आह नहीति। न्यायसाम्येन परिहरन्ति तद्वत्रापीति। आचार्यक
रणमाचार्यकं अपेक्षितमिति शेषः। अध्ययनविधेर्निरधिकारत्वात् पूर्वपक्षे परप्रयुक्त्यसंभवं निगमयति। न
चेति ननु पूर्वपक्षेऽध्ययनस्य निरधिकारत्वात् दक्षिणाप्रदानाभावेनाचार्यकस्यापुरुषार्थतया च तदर्थोध्यय
नप्रयुक्तिर्माभूत् ब्रह्मलोकप्राप्तेः स्वतः पुरुषार्थतया तदर्थाध्यापनविध्यंतप्रयुक्तिः स्यादित्याशंक्याध्ययन
स्य निष्फलत्वेऽध्यापनमपि नोक्तफलहेतुः। ततश्च स्वानुष्ठानमेव न सिध्यति अध्ययनानुष्ठापनं तु दूरे इत्याह॥
विद्यादानेति पुरुषार्थप्रापकविद्यादानमेव ब्रह्मलोकप्राप्तिहेतुरिति वचनाभिप्रेतत्वात् नेदृशविद्यादानेनोक्त
फलहेतुरिति भावः। महाप्रकृतं निगमयति। तस्मिद्धमिति। अत एव तदवलंबेन प्रवृत्तो भवन्मतपूर्वोत्तरप १८
क्षावनुपपन्नावित्याह नैवमिति॥ एवं गुरुमतं तागीकृतमर्यादयैव तन्मतं निराकृत्य स्वाभिमतो पूर्वोत्तरप
क्षौ वक्तुं प्रतिजानीते तस्मादिति। गंभीरामाध्यस्येमनेत्यनेन मतांतरस्य तहेयतीत्पमभिप्रेतं प्रतिज्ञातमर्थं प्रतिपा

18

दर्शयितुमुपक्रमते स्वाध्यायइत्यादिना तत्र लिङादिप्रत्ययानां तावद्विधिर्भावनाचोभयमपि वाच्यं तत्र विधिः प्रेरणात्मको
लिङादिव्यापारः। भावना तु पुरुषप्रयत्नः। उभयोश्चैकप्रत्ययवाच्यतया प्रथमं संबंधः। भावना च स्वभावादाकांक्षात्रयव
तीप्रथमं भाव्यं पश्चात्करणमनंतरं चेतिकर्तव्यतामपेक्षते। ततश्च प्रेरणात्मकस्य विधेन पुरुषार्थे पुरुषस्य प्रेरयितुम
शक्यतया विधिसंबंधबलाज्ज्ञापनायाः पुरुषार्थ एव भाव्यतयावतिष्ठते। इत्थं स्वमतमर्यादाक्रमस्थिते स्वयं पूर्व
पक्षराद्धांतौ रचयितुमुपोद्घाततयाध्ययनविधिवाक्यार्थं निरूपयति। स्वाध्यायइति। समानपदोपात्तमिति। एक
भि पदोपादानलक्षणया प्रत्यासत्त्या प्रथममेव भावनासंबंधार्हमपीत्यर्थः। पुरुषार्थेयं पुरुषार्थरूपं। अधिकरणमन्वयि
तुं संशयमाह। तत्रेति। अध्ययनानंतरं नियमेन मीमांसारंभणीया उत नेति प्रथमं संशयः। उक्तस्य संशयस्य तदर्थो द्रष्ट
व्यः। विश्वजिदादिन्यायेनेति विश्वजिता यजेतेत्यत्र विध्यवरुद्धायां भावनायां लिङ्प्रत्ययप्रतीतायां पुरुषार्थरूप
भाव्याकांक्षितायां सत्यामश्रुतमपि फलमध्याहृत्य कल्प्यमानमपि तत्सर्वापेक्षितत्वात् स्वर्ग एव स्यादिति तत्र
निर्णीतमित्यर्थः। अक्षरसंस्कारेति। अध्ययनाद्विधिवदक्षरग्रहणपदावधारणपदार्थपरामर्शद्वारेणेत्यर्थः
।वाक्यार्थज्ञानं वेदवाक्यार्थनिर्णयः। पूर्वपक्षं तावदाह। तत्रेति। न्यायादिति सस्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वादिति

सूत्रसूचितन्यायादित्यर्थः। न्यायं नेत्राभिसिद्धं विवरीतुं सिद्धान्तप्रतिपादनक्रमं तावदनुवदति यद्यपीत्यादिना दृष्टपत
१९ इति वस्तुस्वभावाल्लभ्यते। अतः स्वर्गो न कल्प्यत इति भावः। शक्नोतीति परंपरया पुरुषार्थत्वाद्भाव्यत्वमुक्तमित्यर्थः। दृ
ष्टे अवघातेनेव तुषवदध्ययनसाध्यतया प्रसिद्धे अदृष्टं प्रोक्षणासंस्कारवन्न तत्साध्यत्वेनाप्रसिद्धं स्वर्गरूपं प्रयोजनं। एवं
सिद्धान्तमाविष्कृत्य परदनीतं विवरयति। तत्पाप्नोति। शास्त्रस्य विधेः प्रमाणान्तराप्राप्त एवार्थे प्रवर्तकत्वं न तु प्रमाणान्तरशि
19 ष्टे तत्र तु तेनैव प्रवृत्तिसिद्धेरिति भावः। तादर्थ्ये अर्थज्ञानार्थत्वे। नन्वध्ययनस्य ज्ञानार्थत्वे प्राप्तेप्यध्ययनेनैव तत्संपादयेदि
ति नियमं शास्त्राप्राप्तत्वात्तत्र विधेः साफल्यमाशंकते। यदीति। परिहरति नैवमिति। अक्रत्वर्थत्वादिति। अध्ययनविधे
रनारभ्याधीतत्वाद्धि नियोजकक्रत्वभावादक्रत्वंगमित्यर्थः। अक्रत्वर्थे तथाध्ययने नियमानुपपत्तिं वक्तुं क्रत्व
र्थत्वयैवावघातादिषु नियममाह अवघातादयो हीति। क्रतावेव क्रत्वपूर्वशेषतयेत्यर्थः। तमेव नियमं दर्शयति अव
घातेनैवेति। तंडुलेति। अपूर्वसाधनत्वेनाविशेषिते स्वनिर्वर्त्ये केवलं तंडुलस्वरूप इत्यर्थः। तत्र हेतुमाह प्रमाणेति १९
तंडुलस्य नानोपायसाध्यतया प्रतिपन्नत्वादवघातेनैव तंडुलनिर्वृत्तिः स्यादिति नियमः प्रमाणान्तरविरुद्ध इति भावः।
निर्लुंवनं विदलनं। अवघातस्य तंडुलमात्रद्वाध्ययनस्यार्थज्ञानमात्रे नियमः प्रमाणान्तरविरोधादनुपपन्न इत्या

हृ एवमिति। यद्यपि ज्ञानार्थे नियमासंभवेपि क्रत्वपूर्वशेषतया ध्ययने पि नियमो वर्णयितुं शक्यते सोपि तच्छेषत्वस्यैवाभावा
न्नयुक्त इत्याह। यदि परमिति। ज्ञानस्य भाव्यत्वानुपपत्तेः स्वर्गस्यैव भाव्यत्वं फलितमिति निगमयति तन्नियमेति ननु मन्ति त्तिरं
तिहवै प एता रात्रीरुपयन्तीत्यर्थवादे प्रतिष्ठानूपफलश्रवणात्तेषैव रात्रिसत्रक्रतोः फलैः फलं न त्वत्यन्ताऽश्रुतः स्वर्गस्त
द्वदत्राप्यर्थवादिकमेव फलं स्यादिति शंकते अथेति। निर्देशादिति फलमात्रेयो निर्देशादिति सूत्रैकदेशोपादानं। आत्रे
यस्तावदाचार्यः श्रुतत्वात्प्रतिष्ठामेव फलं रात्रिसत्रस्य मन्यत इत्यर्थः। अनुमानं कल्पनं। आर्थवादिकमेव फलमध्यय
ने दर्शयति इह त्विति। यं यमिति तत्तत्क्रतुप्रतिपादकवेदभागाध्ययनेन तत्तत्क्रतुफलमवाप्यत इत्यर्थः। त एनं तृप्ता आयु
षा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन च तर्पयन्तीति पूर्वपठितश्रुतिशेषभूतायाः श्रुतेरर्थमनुसंधत्ते तेपि
तन इति। न स्वाग्नेभ्यः परममिति। सर्वावयवसाध्यतपःफलं प्राप्नोतीत्यर्थः। अर्थवादानामध्ययनान्तरशेषतया नाध्ययन
स्य तत्फलकत्वमतस्तत्र स्वर्ग एव कल्प्यत इति परिहरति अत्र ब्रूम इति। जपयज्ञो ब्रह्मयज्ञाध्ययनं प्राप्तस्य दृढीकरणार्थमध्य
यनं धारणाध्ययनं। गुरुमुखात्स्वाध्यायप्राप्त्यर्थमध्ययनं स्वीकरणं। ननु विधिप्रत्ययेन प्रेरणात्मको विधिः प्रतीयते स ए
व शाब्दभावनाख्याचार्थभावनावदाकांक्षात्रयवती तस्याश्च समानप्रत्ययोपात्तार्थभावनैव भाव्यतयावतिष्ठते। अर्थभावना

समीहितसाधनं प्रशस्त्यज्ञानं त्विति कर्त्तव्यताप्राशस्त्यं च यत्रार्थवादः श्रूयते तत्र सा सा लभ्यते यत्र तु न तत्रातिदेशेनेति स्थि-
२० तिः तत्र श्चाध्ययनेऽर्थवादाभावेऽप्यतिदेशेनार्थवादिकं फलं लभ्यत इति नेत्स्वर्गः कल्प्य इत्याशंक्याह वोदकादिति। अतिदेश-
प्रमाणात् शाब्दभावनायाः प्राशस्त्यस्यैवेतिकर्त्तव्यतात्वान्न देवातिदिश्यते न फलमित्यर्थः। अश्रुतस्वर्गस्यैव भाव्यता ततः कि-
मित्यत्राह तस्मादिति। अनुवचनमात्रेण। गुरुमुखानूच्चारणमात्रेण नार्थनिर्णयपर्यन्तेन। शास्त्रार्थसमाप्तेरध्ययनशा-
20 स्त्रार्थानुष्ठानसिद्धेरित्यर्थः। प्रयोजनवशेन कर्मानुष्ठानार्थं तन्निर्णयापेक्षया। नन्वनारंभनियमेनैव पूर्वपक्षे प्रवर्त्तयि-
तव्ये किमित्यनियमेन प्रवर्त्यत इति शंकते नन्विति। अध्ययनस्य स्वर्गार्थत्वे स्वाध्यायस्य तन्मात्रनिर्वर्त्तकतया स्वार्थवि-
वक्षाभावाद् विवक्षितस्य वा निर्णीनोऽपितत्वाच्च न तदर्थविचारोऽप्यनुज्ञेति भावः। अन्यार्थत्वेऽप्यध्ययनस्य परदृशाक्तिस्वा-
भावलभ्यार्थपरत्वानतिरोद्धुं शक्यत इति परिहरति नैष दोष इति। तद्देवोपपादयति यथेति। तस्मादनियमेनैव पूर्वपक्ष-
पर्यवसानमाह। तस्मिद्धमिति। अत्यंतापत्तिपत्रं स्वर्गादिफलं परिकल्प्याध्ययनस्य तत्साधनत्वकल्पनाद्वाध्ययनानु- २०
निष्पादितया प्रमाणान्तरप्रसिद्धार्थज्ञानस्यैव प्रयोजनत्वाश्रयणात् द्वावाद्युक्तमित्याशयेन सिद्धान्तमाह। अत्रोच्यत इ-
ति। ननु नियमविधित्वं दूषितमेवेत्याशंक्य मनूघनायं साक्षान्नियमविधिः किं त्वपूर्वविधिरेवेति नियमस्य चपश्चा

तस्मात्तदेवलभ्यतयानविधेरानर्थक्यमपि इति परिहारे इति। अकृत्वर्थतया नियमस्य प्रयोजनमात्रत्वात्तदेवपश्चाल्लभ
भ्यत्वान्नन्न दूषणमित्यन्वयः। वाक्यार्थ एवेति। अध्ययनेनैवार्थज्ञानं संपाद्यं कृत्वियज्ञानमध्ययनेनैव संपाद्यमिति वाक्या
र्थः स्यादित्यर्थे अतदर्थस्याकृत्वंगस्य। कथं तर्हि वाक्यार्थ इत्यत्राह। अप्राप्तेति। अध्ययनेनार्थज्ञानं संपादयेदित्येवं वाक्यार्थः
॥अप्राप्तविधित्वमेवोपपादयति यावदिति। उपनीतस्य कर्मानुष्ठानोपयिकज्ञानसंपादनार्थं तज्ज्ञानसमर्थ्यमार्थतोऽर्थ
ज्ञानोपायपरिग्रहस्तावदुपायगतसामर्थ्यादिपरामर्शसापेक्षतया विलंबितः। अध्ययनं। तु प्रत्यक्षश्रुतिविहिततया ततः
पूर्वमेवोपनीतमधिकृत्य प्रवर्तनेन तत्प्रवृत्तिवेलायामुपायांतराणामप्राप्ततया तन्निवृत्तिफलकोऽयं नियमविधिर्न संभवति
किं त्वप्राप्तविधिरेवायमिति भावः। ज्ञानोपायानुष्ठानमिति लिखितपाठः हि तेष्विव चनानीत्यर्थः। तावन्नतः पूर्वमेव। अस्त्व
पूर्वविधित्वं नियमफलकत्वं कुतस्तत्राह विहितेति। असति त्वध्ययनविधावुत्तरकर्माणि स्वानुष्ठानोपयिकज्ञानार्थं
ज्ञानोपायान्नाक्षिपेयुः सति तु तस्मिन् तत्सिद्धज्ञानवतोऽधिकारित्वाल्लब्धत्वात् नोपायान्तरान्वेष इति कृत्वादेव नियमः फलि
ष्यतीति भावः। तदापादितज्ञाने इति। पुरुषे इति शेषः। इति न्यायेनेति। अपशूद्राधिकरणसिद्धान्तन्यायेनेत्यर्थः। नियमभाषा
अपूर्वविधित्वेप्यस्य फलतो नियमविधित्वं तादृशविध्यंतरप्रतिपादनमुखेनोपपादयति घश्येति। इमामगृभ्णन्रशना। त

६ धनूपार्थस्वीकारः लिंगेन गर्दभरशनाशेषतयाप्राप्तस्यमंत्रस्यतत्रबाधश्चेतिस्वार्थहानान्याथास्वीकारप्रासवाधलक्षणदोषापुंजंतद्रसर्थः परिसंख्यायावा
न्यार्थत्वेदोषत्रयमभिहितं इदानीनायं परिसंख्या मंत्रस्यगर्दभरशनायांप्रापकंचलिंगमेवविधिः किंत्वपूर्वविधिः परिसंख्यात्वस्वपमेवसंपत्स्यातइत्याह
श्रुतेश्चेति। प्राप्तस्यखलुपरिसंख्यामंत्रस्यगर्दभरशनायांप्रापकंचलिंगमेवतच्चविलंवितप्रवृत्तीतिश्रुतिप्रवृत्तिवेलायांतत्रतस्याप्राप्ततयानत
नामतस्यपूर्वंआयुषिविदथेषुकव्येत्यादिमंत्रः इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानामादत्तइतिश्रुत्याश्वरशनाद
२१ नेविनियुज्यतेलिंगात्वविशेषेणाश्वरशनागर्दभरशनादानयोर्विनियोगः प्रतीयतेअत्रश्रुतिविनियोगाभावेपि।
लिंगादेवाश्वरशनाशेषत्वस्यापिसिद्धत्वात्तदर्थविनियोगविधेरानर्थक्यप्रसंगाद्गर्दभरशनाशेषत्वनिवृत्तोविधेस्तात्प
र्येवक्तव्यंसाचफलतएवेत्यंगीकर्त्तव्यमित्यर्थः। किमितिफलतः परिसंख्यासाक्षाद्वाक्यार्थत्वेकोदोषइत्यत्राहनहीति
2 ।तस्यावाक्यार्थत्वेएवंवाक्यविपरिणामःस्यात् अनेनमंत्रेणगर्दभाभिधानींनादद्यात्इतिनतश्चविधिनूपस्वार्थप
रित्यागः निषेधेनलिंगंतस्यगर्दभरशनाशेषत्वंप्रापयितुंक्षममितिस्वतएवगर्दभरशनातोमंत्रस्यनिवृत्तिःसिध्य
तीतिअस्यफलतः परिसंख्याविधित्वात्व्यपदेशइतिभावः। तयाध्ययनविधिरपिफलतोनियमविधिरित्याह। एव
मिति। नन्वध्ययनसंस्कारादित्तज्ञानवंतंपुरुषमधिकृत्यक्रतूनांप्रवृत्तावपिनाध्ययनस्यक्रत्वंगत्वंकिंतुज्ञानस्यैवेत्या
हनचेति। ननुज्ञानस्यक्रत्वंगत्वेतदंगस्याध्ययनस्यापितद्द्वारेणावश्यंगभूतावघातादेरिवक्रत्वंगत्वस्यादितिशंकाह २१
सौतप्रदर्शेनमुखेनपरिहरतियथेति। आहवनीयेजुहोतीत्यादिभिरग्नीनांक्रत्वंगत्वेपितदर्थस्याधानस्यनतन्मुखेन
तदंगत्वंस्वशेषिभूतानामाहवनीयादिद्रव्याणांक्रतोभिन्नकालनिष्पाद्यतयास्वस्यापिक्रतौवैहिरेवानुष्ठेयत्वाद
त्परिसंख्यासंभवतितस्याश्वरशनाशेषत्वमपितदानीमप्राप्तमितितत्परतयायमपूर्वविधिरेवकिंतस्यविधेरभावेलिंगान्मंत्रस्यरशनाद्वयेशेषत्वंस्या
त। श्रुतिसंभवेत्वनेनप्रथमतएवाश्वरशनाशेषत्वेमंत्रस्यासिद्धेनततद्विरोधे

नारभ्याधीतत्वाच्चेत्याधानाधिकरणो निर्णीतं तन्न दूरत्वापीति भावः। द्रव्यस्याकर्मकालेत्यादिकमाधानाधिकरणासिद्धं
तत्सूत्रं॥ अध्ययनसंपादितज्ञानस्यैव क्रतुशेषत्वेन तद्द्वाराध्ययनस्यापि तत्क्रतुरूमतेप्यंगीकार्यमित्याह। एकदेशिनेति त्रै
वर्णिकोद्देशेन विहितोपनयनांगकाध्यापनविधिनास्वांगभूतोपनयनद्वारा वेदाध्ययनस्यैव प्रयुक्तेस्तत्संपादि
तज्ञानवंतमेवाधिकृत्योत्तरकर्मप्रवृत्तेस्तत्ज्ञानमुत्तरकर्मांगं नाध्ययनमित्यंगीकार्यमित्यर्थः॥ ॥एवं नियमानंगी
कारे सिद्धज्ञानवतोधिकाराल्लाभादुत्तरकर्माणि स्वानुष्ठानसिद्ध्यर्थं ज्ञानं तदुपायं ल्लो किं कानप्यानियमेनाक्षिपेयुः अत
तश्च शूद्रस्याप्यधिकारः स्यादित्याह। अन्यथेति। वैयात्याद्धाध्यायादध्ययनेनावैधेन। फलितमाह। तेनेति। तथा सत्यपीति
उपायनियतज्ञानस्यैव क्रत्वंगत्वेपि नोपायस्यांगत्वमित्यर्थः। कथं नत्तस्य क्रत्वंगत्वमुपपद्यतेत्याशंक्यतोध्ययनसि
द्धज्ञानवंतमेवाधिकृत्य कर्मप्रवृत्तिरुपपादितातेनैव न्यायेनेत्याह। नेनेति। अयं भावः व्रीहीनवहंतीत्यत्र व्रीहिभिर्यजेतेत
ति व्रीहीणामपूर्वसंबंधस्य पूर्वमेव निरूढत्वादवहननस्य च तत्प्रकरणपाठात् व्रीहीणामपूर्वसाधनत्वलक्षणाल
माश्रित्य तद्द्वारेणा तस्य क्रत्वंगत्वं युज्यते अत्र तु कर्मणाम ध्ययनसिद्धज्ञानोपजीवनेन प्रवृत्त्या पश्चात् तज्ज्ञानस्य क्रत्वंगत्वा
वगमादध्ययनविधिप्रवृत्तिवेलायां ज्ञानस्य क्रतुसंबंधनिरूढेः अपूर्वीयत्वालक्षणाद नारभ्याधीतत्वाच्च न तन्मुखेन।

ध्ययनस्य तदंगत्वमिति। सिद्धान्तश्लोके। न निगमयति तत्किंद्धमिति। तेन विधेरानर्थक्याभावेन नन्वर्थज्ञानार्थत्वम
२२ ध्ययनस्यायुक्तं तस्यासार्वत्रिकत्वान्नियमविधित्वं वायुक्तम्। एवं हि नियमः स्यात् अध्ययनसंपादितज्ञानवंतमेव क्रतवो
धिकुर्वन्तीति तथात्वे च दोषप्रसंगादिति शंकते। कथमिदानीमित्यादिना। दुर्मादीनामिति। हुं फट् श्रौषडित्यादीनां
22 नैवार्थो दृश्यते। ब्राह्मणादिभिरिति। तेषां तत्र ज्ञानोदयेपि स्वानुष्ठानानुपयोगादपुरुषार्थत्वान्नतादर्थ्यमध्ययन
स्येत्यर्थः। आनर्थक्यमदृष्टार्थत्वं वेति। याजने ब्राह्मणमात्रस्यैवाधिकारात् क्षत्रियवैश्ययोरनधिकृतकर्मपरि
ज्ञानस्य याजनेप्यनुपयोगित्वेनापुरुषार्थत्वात्तत्परवेदभागस्याध्ययनस्य नैष्फल्यं स्वर्गार्थत्वं वास्यादित्यर्थः। क
थं वेति। नावगुरेदित्यादिविधेर्वाक्यार्थः अवगोरणनिरत्याप्रत्यवायपरिहारं भावयेदिति॥ तत्र रागादवगोरणप्र
वृत्तस्य तत्रानिष्टप्रदर्शनमंतरेण निवर्तयितुमशक्यतया तत्कारणान्प्रत्यवायो भवतीत्यर्थात् सिध्यतीति तत्रार्थि
के वाक्यार्थे नियमवर्णनं शाब्दे वेति तत्र प्रथममनूद्य दूषयति यदि तावदिति। नान्यस्येति। अन्यावगोरणानुष्ठानेपि २२
प्रत्यवायोनवभतीत्यर्थः। कोहीति। अनिष्टज्ञानकारणत्वात् तत्प्रतिपादकतद्भागाध्ययनमेव न सिध्येदित्यर्थः। इति
पं शंकते। ग्रथेति। शास्त्रार्थत्वान्नाक्षाद्वाक्यप्रतिपाद्यत्वात् दूषयति तथा सतीति। तस्य प्रत्यवायस्य तावत्त्वात्तथैव

संभवात् सर्ववर्णसाधारणत्वाद् अनधीतवेदैरप्यनुष्ठेयत्वात् कथं चेति। अत्राध्ययनेन स्वाध्यायविधिवाक्यं गृहीत्वा तद्
र्थज्ञानवता वाध्ययनं विना फलाय भवतीति नियमः स्यात् ततश्च प्रथमम् अध्ययनानुष्ठानं विना तद्वाक्यार्थसंपत्त्यसिद्धेः प्रथमं वेदा
ध्ययनं वक्तव्यं ततश्चाध्ययने सत्यध्ययनमित्यात्माश्रयः स्यादित्यर्थः। ननु क्रतुषु सर्वेष्वर्थज्ञानार्थत्वासंभवे पि स्वर्गार्थम् अ
ध्ययनं स्यादिति शंकते। अर्थेति। तर्हि सकलवेदाध्ययनस्याप्येकरूपफललाभाय स्वर्गार्थत्वम् एव स्यादिति दूषयति तथा
सतीति तन्न गमपतितस्मान्नेति परिहरति तत्रेति। नास्माभिः क्रतुज्ञानम् एवाध्ययनस्य प्रयोजनम् अंगीक्रियते किंतु ज
तु जपपारायणादि विध्यपेक्षितं पद अध्ययनगृहीतस्वाध्यायेन संपादयितुं शक्यं न सर्वम् अध्ययनप्रयोजनम्। इष्टे
चैतस्मिन् प्रयोजने संभवति नादृष्टः स्वर्गः कल्प्यः। किं तत् सर्वम् अध्ययनेनैव संपाद्यम् इति नियमश्चोपपद्यत इति नोक्त ए
दोष इति भावः। विध्यंतरोपयोग्यपेक्षितम् इति विध्यन्तरोपयोगितया तैरपेक्षितम् इत्यर्थः। जपयज्ञो ब्रह्मयज्ञः। अहरह
रिति नित्याध्ययनविधिः। पर्जयित्वेति नैमित्तिकः। वेदस्वरूपावधारणं स्वाध्यायप्राप्तिः। तदनुरोधेन तत्प्रयोजनो
द्देशेन। नियमक्रमं दर्शयति ज्योतिष्टोमेत्यादिना। मंत्रेषु क्रत्वियपदार्थप्रकाशकेष्वनुष्ठानार्थं स्मृत्यपेक्षाकाले त
त्तदनुष्ठेयपदार्थस्मारका भवंतीत्यर्थः। प्रगीतमंत्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रं। अप्रगीतमंत्रसाध्यगुणि

निष्कगुणाभिधानं शास्त्रं तदुपात्तेन ध्ययनोपात्तैर्मंत्रो। नश्वमेधादिषु अश्वमेधप्रतिपादकवेदभागेषु जयपद्मादी
२३ ति तदध्ययनस्यार्थज्ञानार्थत्वे पूर्वोक्तदोषादेतदेव प्रयोजनमिति भावः। अध्ययनस्य नानाप्रयोजनत्वे आचार्यैसं
मतिमाह आह चेति। गुरुकोसेशादध्ययनेऽध्याध्ययने। विचारः प्रयोजनं विचारः। धारणं धारणाध्ययनं। सि
द्धिशब्दस्य प्रत्येकमभिसंबंधः। फलान्तरकल्पनास्वर्गकल्पनां अर्थज्ञानफलकाध्ययनविधौ तु स्वाध्यायप्राप्ति
23 पर्यंतेन अंगीभूतमध्ययनमर्थज्ञानोपकारितयात दंगभूतामीमांसावो भयमपि विधीयते तत्र प्रथमे मां शेनि
यमासंभवेपि द्वितीयांशे नियमः संभवतीत्याह अध्ययनविधाविति। ग्रहणान्तस्य प्राप्तिपर्यंतस्याध्ययनविधि
नाध्ययनविधायकवाक्येन शास्त्रादाविति धर्मजिज्ञासासूत्रे। विचारः कृत इति मीमांसारंभणीया न वा तदर्थं
मध्ययनविधिनामीमांसा विधीयते न वा तदर्थं वाध्ययनमर्थज्ञानार्थं स्वर्गार्थं वेति एवं विचार इत्यर्थः। चादेषु
निषमप्रकारं दर्शयति अर्थवादेष्विति प्ररोचितं प्रसंशितं। जीवात्मपरमात्मपरेषु उपनिषद्भागेषु प्रथमं जी २३
वात्मपराणां नियमप्रकारमाह उपनिषत्स्विति। क्रतूपयोगीति शरीरव्यतिरिक्तस्य देहान्तरभाविफलोप
भोगयोग्यस्य नित्यात्मनः परिज्ञानाभावे क्रतुषु प्रवृत्तिरेव न सिध्यतीति तत्ज्ञानस्य क्रतूपकारित्वं। भूता।

नां पृथिव्यादीनां भोक्तृत्वानामिंद्रियाणां च स्वातंत्र्योदेहस्यांपरायिककफलं यारत्नौकिकफलं परमात्मपरेषु वाक्येषु त
त्त्वज्ञानस्य क्रतूपयोगासंभवेन तत्र नियमाभावेपि साक्षादेव पुरुषार्थसाधनतयात्र नियम इत्याह यानित्विति अ
कर्तृभोक्त्रितिं अयास्त्समस्तकामतया कर्मणामकर्तासततास्यः संसारतयात त्फलानामभोक्ताव सर्वेश्वर इत्य
र्थः। स्वयमेव साक्षात्सर्वोश्वकामानित्यभ्युदय फलत्वमस्याम्नातं न स पुनरितिमोक्षफलत्वमित्यर्थः। सर्वे
षामेतेषां नियमानां पूर्वप्रतियादितमार्थिकत्वं स्मारयन्नियमवर्गानामुपसंहरति फलतइति। ननु जपया
गयागादिविधिभिः स्वाध्यायप्राप्तिरपेक्षिता क्रतुविधिभिस्त्वर्थज्ञानमिति उभयमप्यध्ययनस्य प्रयोजनं त
तश्चाध्ययनेन स्वाध्यायप्राप्तिं संपादयेत्तेनार्थज्ञानं चेति वाक्यभेदः स्यादित्याशंक्य परिहरति नवेति स्वा
ध्यायसंस्कारभूतेन व्रीहीनूपस्यवहननादिवत्स्वाध्यायप्रतिशेषभूतेन अपेक्षितं उत्तरविधिभिरिति शेषः
॥ एकस्यैव वचोभंग्यांपातकनूपपाचाक्यप्रवृत्त्या सर्वार्थलाभेन सर्वप्रयोजनलाभेन॥ ननु स्वाध्यायप्राप्त्यर्थत्वेत्व
ध्ययनस्यैवं वाक्यविपरिणामः स्यात्तूपः स्वाध्यायस्त्वमध्ययनेन प्राप्नुयादिति तदा स्वाध्यायस्याध्ययनं प्रत्युद्दे
श्यत्वानुवाद्यत्वप्रधानत्वानि स्युः। अध्ययनस्यनुतं प्रत्युपादेयत्वविधेयत्वगुणत्वानि अर्थज्ञानार्थत्वेत्वध्य

यनेनार्थज्ञानं संपादयेत्तत्स्वाध्यायेनेतिवाक्यविपरिणामः स्यात् तदा च स्वाध्यायस्याध्ययनं प्रत्येवोपादेयत्वविधे
२४ यत्वगुणत्वानिस्युः। अध्ययनस्य तु तं प्रत्युद्देश्यत्वानुवाद्यत्वप्रधानत्वानिस्युः। तत्र श्च वाक्यभेदः नैकरूप्यं कथ
मित्याशंकामनूद्य परिहरति यदीति। पदद्वयार्थयोः अध्ययनस्वाध्यायपदार्थयोः। गुणप्रधानेत्युपाद [redacted] पलादेरुद्देश्यस्य
देश्योपलक्षणं। सर्वथैव इति न स्वाध्यायोद्देशेनाध्ययनं विधीयते नाप्यध्ययनोद्देशेन स्वाध्यायविधिः किंतु स्वा
24 ध्यायाध्ययनेन विध्यंतरापेक्षितं संपादयेदित्येकरूपैव वाक्यप्रवृत्तिः स्वाध्यायप्राप्तिरप्यर्थज्ञानवदपेक्षित
प्रभेद एव अपेक्षितसंपादनं चाध्ययनस्य स्वाध्यायसंस्कारमुखेनैवेति स्वाध्यायस्य प्राधान्यमध्ययनस्य तच्छे
षत्वं च सिध्यतीति न वैरूप्यमिति भावः। ननु निरूढं प्रत्य निरूढस्य शेषत्वं स्वाध्यायस्य शेषतया विनियोजकप्र
माणाभावेन निरूढिरस्ति न तस्त च्छेषत्वमध्ययनस्य न संभवतीति कश्चित् आह तदनुवदति कश्चिदिति। भूत
भावीति भूतोपयोगि संस्कार्यं यथा कंडूयनोपयुक्ता कृष्णविषाणा चात्वालप्रासनेन तया भाव्युपयोगि च यथा भा
विपुरोडाशोपयोगिनो व्रीहयो अवहननेन। अत्र तु तादृशोपयोगो नास्तीत्याह नहीति अर्थज्ञाने क्रत्वंगभूते। विनि २४
योजकं श्रुत्यादिकमिति शेषः। ननु विनियोजकाभावेप्यध्ययनविधिवाक्यमेव स्वाध्यायमप्यर्थज्ञानशेषतया विनि
य

युंक्ता मित्याशंक्याहनचेति। संस्कारविधिः पूर्वं विनियुक्तसंस्कार्योद्देशेन संस्कारं विनियुंक्ते नतु स्वयं संस्कार्यमन्यत्र विनियो
क्तुं क्षमते वाक्यभेदप्रसंगात् यथा सक्तून् जुहोतीति द्वितीयाश्रुत्या संस्कारविधित्वेन शंकितोपि होमविधिः स्वस्य संस्का
रविधित्वनिर्वाहाय पूर्वमविनियुक्तान् संक्तूंन स्वयमन्यत्र विनियोक्तुं न क्षमते वाक्यभेदप्रसंगादेवं तद्वदध्ययनविधि
रपि स्यादिति भावः। दूषयति तदेतदिति। अनुपासितगुरोः संप्रदायपरिहीनस्यामात् प्रियस्य न तु विद्वदभिमतस्येति भावः।
श्लोकं व्याचष्टे पडिहीति। अयं भावः यद्यध्ययनेन स्वाध्यायं संस्कुर्यादिति वाक्यविपरिवृत्तिः स्यात्तदा स्वाध्यायस्या
र्थज्ञाने विनियोजकांतराभावात् स्वस्यापि विनियोजकत्वानुपपत्तेः संस्कारविधित्वमेवोच्छिद्येतेति भवदुक्तदोषः
स्यादेव नैवं विपरिवृत्तिः। किं त्वध्ययनेन दृष्टसामर्थ्यानुसारेणार्थज्ञानं भावयेदिति वाक्यविपरिवृत्तेर्न दोष इति। न
न्वध्ययनस्यार्थज्ञानार्थत्वेऽर्थज्ञानस्यापि क्रतुं प्रति दृष्टोपकारितया तेनैव सामर्थ्येन क्रतुनैव साक्षात्पुरुषार्थतया। तत्फ
लं वा किमित्यध्ययनफलं न स्यादिति शंकते किमितीति। तावन्मात्रेति। परिहरति नेति। अध्ययनविधेर्दृष्टप्रयोजना
र्थत्वे नैरर्थक्यं नियमविध्यात्मपरेण न खलु परिहृतं तत्तत्र्यवयावत्यां दृष्टसाध्यपरंपरायां उपायांतरप्रसक्तिः तत्र त
न्निवृत्त्यर्थं नियमविधिः। अपरीयोनान्यत्र विधिव्यापारवैयर्थ्यप्रसंगात् एवं च स्वाध्यायप्राप्तावर्थज्ञाने च ति

स्विन पाठ हितैषिवचनाद्युपायांतनसंभवादर्थज्ञानपर्यंततं नियमविधिराश्रयणीयः। ततः परं त्वज्ञातुरनुष्ठानासंभवे
तेन ज्ञानस्य क्रतुं प्रत्यव्यभिचारितोपायतया नैयत्यस्यैत्स्वत एव सिद्धेः न तत्र विधिव्यापारस्समाश्रयणीय इत्यध्ययन
२५ विधिरर्थज्ञानपर्यंत एवेति भावः। अन्यत एवेति। विधिव्यापारमंतरेणेति शेषः। तदेव विवृणोति ज्ञानस्येति।
न क्रतुं प्रयुक्तमिति क्रतुं प्रत्यशेषतया न तत्प्रयुक्तमित्यर्थः। एवमध्ययनस्यार्थज्ञानपर्यंतत्वोपपादनात्तस्य स्वा
ध्यायसंस्कारतातस्य चार्थज्ञानशेषता सिध्यतीति प्रतिपादितमेवोपसंहरति तेनेति येनैवं विधस्स्वाध्यायस्या
र्थज्ञाने विनियोगः। अतोस्मिन् वाक्ये स्वाध्यायस्य संस्कार्यत्वेप्युपादेयत्तया तद्गतैकत्वस्याविवक्षितत्वदेक
शाखाध्ययने ध्ययनशास्त्रार्थनिवृत्तिः सिध्यतीत्ययेर्थोधिकरणांतरप्रतिपादितनयेन युक्तमित्याह। अत ए
वेति उपादेयतयेति उद्देश्यगतानु संख्यावाक्यभेदप्रसंगात् ग्रहं संमार्ष्टि इत्यत्र ग्रहैकत्ववदविवक्षिता उपादे
यगतातु विशिष्टविधिलाभाद्वाक्यभेदाभावेवँ न विवक्षितेति भावः। नन्वेकेनैव वाक्येन स्वाध्यायस्यार्थज्ञानं
प्रत्युपादेयत्वमध्ययनं प्रति संस्कार्यत्वं च कथं सिध्यतीत्याशंक्य तादृशदृष्टांतप्रदर्शनमुखेनैतदुपपादयति तद्यथे २५
ति। स्तोत्रं नाम गुणिनिष्ठगुणाभिधानं तच्च पदकदंबकरूपाणामृचां हृत्यं सामास्तुवत इत्यत्र गीतिरूपं साम विनि

युक्तं त्वाचां नु न तत्र विनियोजकं प्रमाणमस्ति तत्र साम्नः स्तुतिसाधनत्वं स्वस्वरूपोत्कर्षाभिव्यंजकतया तत्संस्कारकत्वमृचां
स्तोत्रशेषत्वं चांतरेण न संभवतीति ऋचां साम संस्कार्यत्वं स्तोत्रं प्रत्युपादेयत्वं । चैकेनैव वाक्येन यथा सिध्यतीति भावः
। तथा स्थलेति । चयने चरूमुपदधातीति श्रूयते अत्र चरूपधानं किमारादुपकारकं उत संनिपातीति विचारे संनिपा
तित्वे द्वितीयाश्रुत्या चरुसंस्कारकत्वं वक्तव्यमुपधानस्य तत्वायुक्तं चरोरन्यत्रा विप्रयुक्ततया सक्तुवन्निरूप्य भावे
न तच्छेषत्वानुपपत्तेः अत आरादुपकारकमेवेत्यापतितं तत्वायुक्तं अदृष्टार्थत्वात् अतो दृष्टार्थत्वाभावात् संनिपाति
त्वमेव तथा हि यद्यपि चरोरन्यत्र न वाक्यांतरेण विनियोगोस्ति तथापि चरूपधानस्य दृष्टसामर्थ्यपरामर्शे सति दृ
काद्युपधानवद् वितिवि निर्वर्तकत्वदर्शनात्तच्छेषतया चरूपधाने वाक्येन विनियुक्ते सति तस्य तत्साधनत्वं स्वस्य च
नुसंस्कारका रकत्वं चरोश्चितिशेषतां चांतरेण न सिध्यतीति तदुभयमप्येकेनैव वाक्येन यथा सिध्यति तथाध्य
पन विधाविति भावः । अविनियुक्तेपि चरौ वितिवाक्यांतरेणेति शेषः । स्थूलनिर्वर्तकत्वाभावादिति । स्वस्य केव
लक्रियानुपपत्तया चितेश्च द्रव्यनिष्पाद्यतयेति भावः ननु भवता चरूपधानस्य संस्कारकमेत्वमुक्तमाचार्यैस्त्वर्थक
र्मत्वव्यपदेशादारादुपकारकत्वमेवाभिहितमिति प्रतिभातीति तत्कथमित्यत आह अत एवेति अर्थकर्म साक्षादपूर्वसाध

नेकर्मैलभतइत्युपचारवृत्त्येतिशेषः। उपचारेचहेतुरुक्तः पूर्वेविनियुक्तेत्यादिना। अर्थकर्मणएपयाति। उपधानस्यार्थक
२६ लपी र्मत्वेसत्यप्यर्थः। प्राधान्यमिति। चरो इतिशेषः। ननुपरमार्थत इति। प्रयाजादिवत्क्वाप्यपूर्वसाधनत्वाभावादितिभा
वः। पूर्वोक्तं त्वितरसंस्कारकर्मभ्योवैलक्षण्यं यस्मास्यतिसंस्कार्यत्वितिर्यैकोसाध्यं स्थलनिर्वृत्त्यादितस्यैत्यर्थः।
प्रसंगान्मतांतरं निरस्यति। एतेनेति। सामविनियोगेनैवसामर्थ्यादृचामपिस्तोत्रविनियोगोपपादनेन। अध्य
26 यनविधौवाक्यभेददोषाभावं निगमयति तत्सिद्धमिति। नन्वध्ययनस्यनानाप्रयोजनत्वेमाभूद्वाक्यभेददोषः
कल्पनागौरवंतुस्यादितिशंकतेनन्विति। इति न्यायादितिप्रवर्तकैकरसोविधिःपुरुषार्थसाधनेकर्मणिपु
रुषंप्रवर्तयितुंप्रशक्नुवंस्तस्यैकमेवफलंकल्पयति नानेकमनपेक्षितत्वादन्यापि कल्पनेकल्पनागौरवमिति
भावः। कल्प्यस्यैलेखलु कल्पनागौरवं। अत्रतुविध्यपेक्षितानांनानाप्रयोजनानां अध्ययनविधिसाध्यत्तयाप्र
माणांतरेणैवक्लृप्तत्वान्नकल्पनागौरवमितिपरिहरतिस्यादेतदितिपद्वारं येनद्वारेणायेनोपायेनस्वाध्यायप्रा
प्तिरूपेणावेतियावाघदपेक्षितंयदुत्तरविधिभिरपेक्षितंएकप्रयत्नेनानायासेनकल्पनांविनेतियावत्। सर्वार्थ २६
लाभात्सर्वप्रयोजनसिद्धेः वैरूप्यचेतिपूर्वसिद्धस्यैवानुवादः। उत्तरविध्यपेक्षितं अध्ययनेनसंपादयितुंशक्यंतत्स

र्वेमस्य प्रयोजनं यतः अत एतदपि प्रयोजनमध्ययनविधिलभ्यमित्याह अत एवेति अयं भावः एकेन कर्त्रो
नानापदार्थाननुष्ठापयतो विधेननुष्ठेयपदार्थानामनुष्ठानक्रमोपेक्षितः यत्र साक्षात्क्रमसमर्पकं प्र
माणमस्ति तत्र तद्वेवोपादत्ते यत्र तु न तत्रानुष्ठानक्रमसिध्यर्थं अनुष्ठानहेतुभूतस्मरणक्रममपेक्षते तेन
त्र मंत्रक्रमे तु सति तेनैव क्रमेण स्मरणं यत्र तु सोपि नास्ति तत्र तु विधानेन चरितार्थानामपि निपतत्क्रमा
णां विधिवाक्यानां स्मारकत्वमाश्रित्याध्ययनविध्यध्यापितस्वस्वक्रमेणैव स्मारकत्वमित्यप्याश्रीय
त इति विध्यंतरापेक्षितस्मरणक्रमोप्यध्ययनविधिप्रसादल्लभ्य इति। ननु कथं विधायकानां स्मारक
त्वं व्रत इत्याशंक्याकांक्षाबलाद्योग्यतया वेत्याह शाक्यत्ते चेति वाक्यतदर्थयोर्वाच्यवाचकभावसंबंधा
त्पत्तिसंबंधिवाचकदर्शनेन वाच्यस्मृतिराविरस्तीति भावः। अस्तु विधायकानामपि स्मारकत्वोपपा
दनमत्र विध्यंतरापेक्षितं प्रति अध्ययनविधेः कथमुपयोग इत्यत्राह अस्मिंश्चांश इति। स्मारकत्वा।

शेषिविध्यंतरापेक्षितस्मरणक्रमणाद्वाध्ययनविध्युपयोगाद्इति भावः। अंगत्वमितिस्मरणक्रमंप्र
२७ तीतिशेषः। अध्ययनविध्यध्यापितक्रमविशिष्टैरेवेत्यर्थः। नन्वध्ययनविध्यध्यापितविधाय
कवाक्यक्रमस्यविधानद्वारेणैवोत्तरविध्युपयोगः किमिति न स्यादित्यत्राह नहीति। परस्परनि
27 रपेक्षैरेवविधिवाक्यैस्तत्तत्कर्मपरिज्ञानसिद्धेर्वि। धिवेलायां नक्रमोपेक्षितइत्यर्थः। स्मरणमुखे
नवाकथमुत्तरविध्युपयोगः तत्राह स्मरणमिति। तेषां वाक्यानां स्मरणेनानुष्ठानोपयुक्ते। फलतीसा
धयतीत्यर्थः। विधायकानामपि स्मारकत्वे सूत्रभाष्यकारसंमतिमाह तदेतदिति व्याख्यातं
व्याख्यातवान्। परार्थः सर्वविध्यपेक्षितपूरकइत्यर्थः। यदनेनैव वेदेन संपादयितुं शक्यं त
स्मैतत्संपादनार्थमेष समाम्नातः इदमध्ययनेमित्यर्थः। प्रतिपत्तुं स्मर्तुं त्वेष समम्नायते अध्याय २७

ते। अत्रस्मरणे तु वाक्यक्रम उपकरोतीत्याह प्रतिपत्तुमिति। यत्र तु विधिवाक्यक्रमो मंत्रक्रमश्च संभवति
त्र ।तत्र विध्यपेक्षितस्मरणक्रमे मंत्रक्रमस्यैवोपयोगः न विधायकक्रमस्येत्याह यत्रेति। अनन्यार्थत्वा
त् स्मरणाव्यतिरेकेण प्रयोजनांतरशून्यत्वात् ननु विधायकवाक्यक्रमस्य कुत्रोपयोग इत्यत्रा
ह। तत्रेति। अध्ययनविध्यध्यापितक्रमेणैव जपादिकार्यमिति भावः। स्वतंत्रनानाक्रतुप्रतिपादक
वेदभागक्रमस्यापि प्रतिपाद्यक्रतुषु क्रमासंभवात् जपादावेवोपयोग इत्याह तथेति। प्रासंगिकं समा
पयति अलमिति। अध्ययनविधेरक्रत्वर्थत्वेपि फलतो नियमसिद्धेरर्थज्ञानार्थत्वमुपपादितं
तन्निगमयति तस्मादिति। इदानीमक्रत्वर्थस्याप्यध्ययनस्य दृष्टेपि प्रयोजने साक्षादपि नियमउ
पपद्यत इत्याह नवायामिति इत्थमर्जयन् ब्राह्मणो याजैर्दध्यापयेत्प्रतिगृह्णीयाद्वा प्राङ्मु×ये×र
खोन्नानि भुंजीतेत्यादिषु यथाप्रतिग्रहेणैवोपायेन द्रव्यप्राप्यात् नोपायांतरेण॥ उपायांतरेण

तुप्राक्कवनप्रत्ययेयादित्यक्रत्वर्थत्वेपिसाक्षान्नियमउपपद्यतोत्तदध्य पनविद्यावपिस्यादित्य
२८ र्थः।यद्यपिसाक्षात्पुरुषार्थेपिनियमःसंभवतितथाप्यार्थिकनियमएवन्यायसहइत्याहफलत
एवेति।इदानीमध्ययनस्यनानाप्रयोजनशेषत्वमुपसंहरतितस्मादिति।यतोवश्यानुष्ठेयज
पयज्ञाद्यपेक्षितमध्ययनमतोध्ययनस्यापिनित्यत्वंसिध्यतीत्याहअतएवेति।एतदेवाहतत्फल
28 स्येति।कर्माधिकारस्यकर्मानुष्ठानयोग्यत्वस्यआवश्यकत्वमुपपादयतिअसतीति।का
म्यादिप्रतिपादकवेदभागस्यावश्यकजपयज्ञाद्युपयोगात्तदध्ययनस्याप्यावश्यकत्वंसिद्ध
तिइत्याहसर्वस्यापीति।सर्वस्यावेदस्यसर्वस्याःशाखायाः।एवंन्यायसिद्धमेवाध्ययनस्यनित्यत्वंस्मृतिवा
क्यैरनूद्यतेइत्याहतथाचेतिवेदात्रजायतइतिद्विजन्मनोद्वितीयंजन्मवेदाध्ययनाधीनंतद्यावन्नास्तीत्य २८
र्थः।सिद्धान्तंनिगमयतितस्मादितिप्रक्रान्तंप्रकरणंसमापयतिआचार्येति॥ ॥इतिश्रीमद्रामा
नुजाचार्यविरचितेन्यायरत्नमालाव्याख्यानेनायकरत्नेप्रयुक्तितिलकव्याख्यानंसमाप्तं॥ ॥

संप्रति वेदप्रामाण्यप्रसिध्यर्थं स्वतः प्रामाण्यं परतस्त्वाप्रामाण्यमाचार्यैरुक्तं तदधिकृत्य प्रकरणं प्रवर्त्तयति विज्ञानस्येति आ
चार्यमतेपि तच्छिष्यविप्रतिपत्तिनिमित्तमवान्तरभेदमाह तत्रेति स्वतः प्रामाण्यमित्यत्र स्वतः शब्दार्थे प्रामाण्यशब्दार्थे च विप्र
तिपद्यन्त इत्यर्थः भवति उ स्यते अर्थतथात्वमिति ज्ञाने न पदार्थो यादृशो भासते तस्य वस्तुतस्तथावस्थितत्वं प्रामाण्यमित्यर्थः
तत्र प्रथमं स्वाभिमतं मतं निर्धारयति आत्मवाचीति संप्रतिमतानामनुपपत्त्या स्वमतिं दूषयितुं तत्रेति अर्थतथात्वमेवार्थाव्यभिचारि
त्वं स्वतः पदस्यावर्त्यमाह न गुणादिति स्वकीयकारणमात्रप्रयुक्तत्वं प्रामाण्यस्याभिधाय तस्य गुणप्रयुक्तत्वे अप्रामाण्यस्येव
स्वकारणप्रयुक्तत्वं स्यात् अतश्च दोषमाह यदि हीति पीतशंखज्ञाने शंखांशे सत्यपि तांशे त्वसत्यं अत्र च कारणदोषस्य विद्य
मानत्वाद् गुणलेशोपि नास्ति ततश्चात्र गुणस्य प्रामाण्यप्रयोजकत्वे गुणाभावादंशे सत्यविषयत्वं न स्यादित्यर्थः प्रामाण्यस्य स्व
कीयकारणप्रयुक्तत्वे अप्रामाण्यस्य च दोषप्रयुक्तत्वे त्वयं दोषो नास्तीत्याह दोषाधीनेत्विति एकदेशिमतमुपसंहरति तस्मादिति
जायत इत्यस्य प्रतिपक्षं निराकरोति नत्विति किन्तत्राह नहीति भातीति पक्षे स्वप्राक्स्य स्वकीयवचनत्वमयुक्तं ज्ञानव्यतिरिक्तस्य प्र
काशकत्वायोगात् ततश्च स्वशब्दो ज्ञानवचन इति वाच्यं तस्मात् घटोयं पटोयमिति विषयमात्रं प्रकाशते न तु स्वरूपं स्वधर्मभूतं प्रामा
ण्यं वा प्रकाशत इति भानपक्षे स्वतः प्रामाण्यमयुक्तमित्यर्थः स्वतः प्रामाण्योपपादनस्य प्रयोजनं वदन्नेकदेशिमतमुपसंहरति परत

२९ 29 स्त्विति यथार्थत्वमिति वक्तृगुणाभावे ऽपि सिद्धमिति शेषः एकदेशिमतमाचार्यग्रंथानुगुणं न भवतीति दूषयति अस्मिन्निति स्वीयात्का
रणात्प्रामाण्यं जायत इत्यस्य प्रतिपक्षस्तु केवलं गुणात्प्रामाण्यं जायत इति पक्षः तन्मते तत्र च दूषणं वक्तव्यं न तत्र दूषणमभिहितं गु
णज्ञानाधीने प्रामाण्ये ऽनवस्थादिदूषणमुक्तं अतो नायं पक्षो ग्रंथानुगुण उपयुक्त इति भावः तर्हि श्लोकोक्तानवस्था कदाचिद्घटते कदा
त्तु नेत्यत्राह गुणज्ञानाधीनेत्विति प्रामाण्यज्ञानस्यापि गुणज्ञानाधीनं प्रामाण्यं तस्यापि तथेत्यनवस्थेत्यर्थः श्लोकांतरानु
गुणमपि नास्तीत्याह तथेति स्वतः प्रामाण्यपक्षे ऽपि अप्रामाण्यनिवर्त्तने प्रामाण्यदृढीकरणार्थं दोषाभावो ऽवधार्यः तदवधारणं
गुणज्ञानाच्चेत्तत्प्रामाण्यावगतिरपि दोषाभावावगतिद्वारा गुणज्ञानपूर्वकमित्यनवस्था प्रसज्यत इत्यर्थ इति वा यद्यर्थः दो
षाभावावधारणार्थं गुणज्ञानमुच्यते दोषनिवृत्तये वा नाद्यो दोषानुपलब्ध्यादिभिरेव दोषाभावनिर्णयात् न द्वितीयः अज्ञातेने
व गुणेन दोषनिवृत्त्युपपत्तेः अतो नानवस्थेति परिहारार्थः परपक्षे परतः प्रामाण्यपक्षे स्वतः प्रामाण्यपक्षे ऽनुगुणस्य ज्ञायमानत्व
नियमाभावादनवस्था नास्तीति वदता परतः प्रामाण्यपक्षे तन्नियमो ऽस्तीत्युक्तं भवतीति ज्ञानपक्ष एवाश्रित इत्यर्थः अपरे प्रामाण्य राम०
मप्रामाण्यं च परत एवेति वदन्तो नैयायिकाः तस्मादेकदेशिमतमनुपपन्नमिति निगमयति अत एवेति मतान्तरमप्युपन्यस्यति अ २९
न्ये त्वाहुरिति निश्चयो ज्ञानं अर्थक्रियाज्ञानात् प्रवृत्तिसामर्थ्यज्ञानात् तथा च ज्ञानस्य ज्ञानान्तरेण निश्चयो ऽस्मादेतस्यापि ज्ञानान्तरा

देवनन्तुसन्ततिः स्यादित्यनवस्थाप्रसंग इत्यर्थः। अर्थान्यथात्वज्ञानात् तन्मतं निष्कर्षयन्ति दूषयितुम् अस्मिन्नपि पक्षे इति दूषयति
अत्रेदमिति ज्ञानस्वरूपादेव ज्ञानस्य प्रामाण्यं जायत इत्यस्य पक्षस्यवति पक्षस्तावदप्रामाण्यं दोषज्ञानाद्बाधकज्ञानाद्वा जायत इ
तिवक्तव्यं तच्चानुपपन्नं नहिन जतज्ञानस्य पूर्वं स्वकारणात्प्रमाणतयोत्पन्नस्य पश्चादप्रामाण्यं दोषज्ञानाद्बाधकज्ञानाद्वा जायते
किं तु स्वकारणादुत्पद्यमानमप्रमाणमेवोत्पद्यते बाधके नतु भूतं विद्यमानमप्रामाण्यं पश्चात्व्याप्यत इत्यर्थः। नन्वप्रामाण्यं न
वस्तुतोऽन्यथाभूतार्थनिश्चयः किं तु सर्वज्ञानस्य तथाभूतार्थनिश्चायकत्वव्यापनं तद्विपर्ययस्यातथात्वव्यापनं वा तच्च बाधकज
न्यमित्यप्रामाण्यं परत इति शंकते नन्वर्थस्येति न तदुभयमप्रामाण्यं पूर्वज्ञानस्य किं त्वन्यथाभूतेऽर्थे तथाभूतेऽर्थे तथाभावनिश्च
यः तद्विपर्ययस्यान्यथाभावो वा तदुभयमपि पूर्वज्ञानस्य न बाधकाधीनं किं तु स्वाभाविकमेव अतोऽप्रामाण्यमपि स्वत एव प्राप्तमि
तिपनिह्नुतिमत्यमिति। त्वन्मते ग्रंथानुगुण्यमपि नास्तीत्याह तस्मादिति। अर्थान्यथात्वहेतुभिर्दूनत्वतिमिरादिभिर्ये दोष इन्द्रिया
दीनां जायते तत्ज्ञानादित्यर्थः। अप्रमाणज्ञानमुत्पन्नावेवाप्रमाणं न तु पश्चादप्रमाणीक्रियत इति पूर्वमुक्तमिति भावः। इदं न जतमि
ति निश्चिन्वतो न जतज्ञानस्य योऽयं निश्चायकत्वाभावः तदप्रामाण्यं तद्बाधकापन्नमतोऽप्रामाण्यं परतो जायत इति शंकते अथेति तन्नि
श्चायकत्वाभावो नाम निश्चयप्रध्वंसः स च ज्ञानजन्मानां ज्ञाततानां स्मरणाविनश्वनतया स्वाभाविकः न तु बाधकापन्नः ततश्चाप्रामाण्यं

२

३० स्वतः प्रामाण्यमिति परिहरति तदयुक्तमिति। इत्यमेकदेशिमतं निराकृत्य पूर्वं प्रतिज्ञातं स्वमतं परिशोधयति तस्मादिति॥ अवगम्यते
प्रतिभाति अप्रमाणत्वमित्यवगम्यत इति संबंधः। शंकते नन्विति प्रथमं न्यायविरोधमाह नहीति गृह्णातीति अस्वयंप्रकाशत्वादिति शे
षः। तथा च प्रामाण्यं स्वतो भातीत्यनुपपन्नमित्यर्थः। ग्रंथविरोधमप्याह तथा च नन्विति इत्यमगृहीतेन प्रमाणमित्यगृहीतेन व्यवहा
30 रः प्रवृत्तिः प्रामाण्यग्रहणात्पूर्वं ज्ञानं स्वरूपेणैव प्रमाणमित्यगृहीतमेवस्थितं अथापि तस्यामपि वेलायां स्वकार्ये प्रवृत्त्यादि
षु निरपेक्षं सत्प्रमाणं तत्रैः पश्चात्प्रमाणमिति गृह्यते तत्तत्रश्च तस्य स्वतो भानमयुक्तमित्यर्थः। विरोधांतरमप्याह तथा निश्चयात्मके
ति निश्चयरूपवस्तुत्वात्प्रामाण्यस्येति शेषः। जन्मैव प्रामाण्यं जन्मैव यदि प्रामाण्यं नाम अर्थाव्यभिचारित्वादिलक्षणो ज्ञानधर्म इत्यत्रा
गो क्रियते तदा स्वतो भासनमनुपपन्नं किंतु विषयधर्मः कश्चित्प्रामाण्यं नाम सोऽपि प्रामाण्यमित्येवमाकारेणाज्ञानसंवंधि न यावा
न स्वतः प्रतीयते किंतु तत्स्वरूपं ज्ञानादेव प्रतीयत इति स्वतो भासनमनुपपन्नमिति परिहरति हरतीति अत्राभिधीयत इति॥ वस्तुतस्तदानी
मगृहीतप्रमाणमपि विविच्यमानं परमार्थतो यत्प्रामाण्यतया पर्यवस्यतीत्यर्थः। भावकतया निरूपकतया निमित्ततयेति यावत् लब्धप्रामा
ण्यपदाभिनीयं प्रामाण्यमिति पदे नलब्धाभिधेयत्वमित्यर्थः। नन्वर्थगतं तथात्वं तत्कथं ज्ञानप्रामाण्यं संभवतीत्यत्राह। इदमिति एतद्धे राम०
यनीत्यमेवाप्रामाण्यमित्याह अतथाभूतेति स्वाभिमतं स्वतः प्रामाण्यं परतोऽप्रामाण्यं च निष्कर्षयति तेनेति पूर्वस्मिन् ज्ञाने योऽर्थो ३०

यथावभासते तत्सत्तथात्वं तेनैव ज्ञानेनावगतमितीति तस्य स्वतस्त्वं अन्यथात्वं तु मिथ्याज्ञानेन पूर्वज्ञानादवगम्यते किं तु तथात्व
मेव अन्यथात्वं तु पश्चाद्बाधकप्रत्ययादित्ति न वगम्यत इति तस्य परतस्त्वमित्यर्थः प्रतिपादितार्थपराचार्यश्लोकानाह । अ
हुश्चेति । अप्रामाण्यस्य परतस्त्वोपपादनपरा इमे श्लोकाः तथाहि पूर्वविज्ञानं मिथ्येति तेनैव ज्ञानेन न ज्ञायते किं तु प्रमाणाज्ञानेने
व तेनापि तथात्वमेव प्रतीयत इति अप्रामाण्यं न स्वतः किं तु ज्ञानान्तरप्रतीयमानत्वात्परत एवेत्यर्थः अप्रमाणां पुनः स्वार्थ इत्य
स्यापव्यमेवार्थः न स्वार्थस्य स्वार्थस्यान्यथाभावः तथात्वमिव पूर्वेण ज्ञानेन नोक्तः न गृहीतः अतोऽप्रामाण्यस्य स्वतस्त्वं नास्तीति निश्च
यः बाधकज्ञानेन तु तथात्वं न प्रतीयते तस्य गृहीततया नैष्फल्यप्रसंगात् अन्यथात्वं तत्प्रतीतया बाधकेन प्रतीयत इत्यप्रामाण्यस्य प
रतस्त्वमित्यर्थः स्वभावेन स्वरूपेण । यन्त्र अपात् अन्यतरनिराकरणप्रविशेषादित्यर्थः निरूपणमेवेति न तु जननं अतः प्रतिभास
स्तन्नमेव प्रोक्तमितिभावः पूर्वोक्तं ग्रंथविरोधं परिहरति यत्विति । अनेनाकारेण ग्रहणादिति वस्तुतः प्रामाण्यमस्तिनेति अनेनाकारे
ण ग्रहणं नास्तीति भावः इति कारणात् एतन्न ज्ञायत इत्याह तथा चेति न नु यदि प्रामाण्यं स्वतः तर्हि तत्र यानि प्रमाणाभूतज्ञानानि तेषामे
व विषयग्रहणसमये प्रामाण्यं गृह्यत इति वक्तव्यं यानि त्वप्रमाणभूतज्ञानानि तेषु प्रामाण्याभावेन तद्ग्रहणसंभवान्न द्विपन्नीतमप्रा
माण्यमेव परिशेषात्कारणदोषाद्यनुसंधानात्सर्वज्ञानोत्पत्तिसमय एव गृह्यत इति वक्तव्यं ततश्चाप्रामाण्यमपि स्वतः प्राप्तमिति

३१ शंकते नन्विति तिं पनहरतिमेव मितिं यदि प्रमाणाभूतेष्वपि ज्ञानेषु प्रामाण्यानुग्रहस्तावदाम: यदि वा तेष्वेव प्रमाणज्ञानात्प्रामाण्यग्र
हणं तदा तत्प्रमाणज्ञानेषु तद्ग्रहणाभावात्पनिरोधादप्रामाण्यं स्वतो गृह्येतेति पर्यनुयुञ्जमहे न त्वेवं किंतु ज्ञानमात्रं स्वविषयमात्रं
गृह्णत् तत्र सर्वत्र विद्यमानमविद्यमानं वा प्रामाण्यं स्वतः प्रतो गृह्णात्येवेति न प्रामाण्यमिति शेषः ततश्च प्रामाण्यं स्वत एव पूर्वं गृही
31 तं पश्चात्कारणदोषादिना येषु ज्ञानेषु अपोद्यप्रामाण्यं गृह्यते तत्प्रमाणमिति निश्चीयत इत्यप्रामाण्यपनत इत्यर्थः अस्मिन्नर्थे संम
तिमाह यथाहेति श्लो सर्गिकस्याभाविकं अनागंतुकमित्यर्थः अत एवायं विचारः कारिकायां ज्ञानमात्रसाधारणे न प्रवृत्त इत्याह न
चेति संशयस्यज्ञातवदुत्पत्तिसमय एव तथात्वप्रतीतेः स्मृतेस्त्वनुभवपारतंत्र्येणार्थतथात्वातथात्वयोस्तदधीनत्वात्तत्परिवर्जने
न निश्चयात्मकसर्वज्ञानविषयोयं विचार इत्यर्थः प्रमाणज्ञानाधिकारेणैव विचारप्रवृत्तौ विचारस्यैव नैष्फल्यं प्रसज्यत इत्याह यदी
ति। ज्ञानमात्राधिकारेण विचारप्रवृत्तौ साफल्यमित्याह ज्ञानमात्रं त्विति। शंकते नन्वर्थतथात्वमात्रमिति अबाधितानुभवपारतं
त्र्यात् स्मृतेरपि प्रामाण्यप्रसंगः स्यादित्यर्थः अंगीकारेण परिहरति सत्यमिति स्मृतिव्यतिरेकेणैव प्रामाण्याभ्युपगमान्न ताव राम॰
न्मात्रं प्रामाण्यप्रयोजकमित्यर्थः तदर्थस्य च तथाभावः प्रामाण्यमिति प्रकरणोपक्रमे कथं प्रतिज्ञातं तत्राह अस्मिंस्त्विति वेदप्रामाण्यो
पयोगिन्यस्मिन्प्रकरणे तावन्मात्रोपपादनेनैव वेदप्रामाण्यसिद्धेस्तावन्मात्रमेव चिंत्यत इत्यर्थः। तत्रैव चिंतयितुकामस्सामान्येन प्रमा ३१

ग्राशत्वार्थं तावदाह प्रमाणशब्दो हीति अननुसंधीयमानश्चासौ तथाभूतार्थश्च तस्य निश्चायकं यत् ज्ञानं तद्वाचीत्यर्थः त्रितयमिति। अर्थ
प्रमाणांतराधिगततया अननुसंधानं अर्थतथात्वं ज्ञानस्य तन्निश्चायकत्वं च त्रितयमपि प्रामाण्यमित्यर्थः भावकं निमित्तमितियावत्। ए
वं चोक्तेषु त्रिष्वंश्येष्वंशेषु योऽर्थतथात्वांशस्तत्रैव स्वतः परतो वेति विचारः नान्यत्रास्त एव वेदप्रामाण्योपयोगीति प्रतिपादयति तत्रेत्यादि
नांतत्रयप्रथममननुसंधानांशो विचाराप्रवृत्तिमाह तत्र यदेतदिति अयमर्थो ज्ञानान्तराधिगतस्येत् अधिगततया प्रतीयेत स्मृतिगोचरार्थ
वत् न च प्रतीयत इति योऽयमनुपलब्धिगम्यमित्यर्थः नन्वर्थतथात्ववत् ज्ञानस्वरूपगम्यं किमिति न स्यादित्यत्राह न ज्ञानस्वरूपादिति कु
त इत्याशंकां तदुपपादयति न हि घटस्येति तस्य घटग्रहणमात्रोपक्षीणत्वादननुसंधानांशे सामर्थ्यं नास्तीत्यर्थः। तर्हि गुणज्ञानात्तदव
गतिः स्यादिति परतो भवत्वित्यत्राह नापीति तेषां दोषप्रतिबंधोपक्षीणत्वादननुसंधानांशे सामर्थ्यं नास्तीत्यर्थः तस्यापि ज्ञाततारूपस्य न त
स्मात् ज्ञानादवगतिः नापि गुणादिज्ञानादिति न तत्रापीयं चिंता तथात्तानांशस्यापि स्वयंप्रकाशत्वान्न तत्रापि स्वतः परतो वेति चिंतेति भावः
ततश्च नन्वतथाभूतमित्यादिग्रंथेनार्थतथात्वलक्षणमप्रामाण्यमाशंकितं तत्प्रतिपक्षभूतं यदर्थतथात्वरूपं प्रामाण्यं तत्रैवांशे स्वतः प
रतो वेति चिंतेत्याह यदेवेति नन्वत्र प्रकरणेऽर्थतथात्वलक्षणमेव प्रामाण्यं तदेव स्वतो भातीत्यभिमतं चेत् तर्हि पूर्वमभिहितो निश्च
यात्मकप्रामाण्योत्सादनमित्यादिपूर्वपक्षग्रंथविरोधः कथं परिहृतः स्यादित्यत्राह यस्त्विति अविरोधमेव दर्शयति तथा हीति नन्वर्थत

४

थात्वनिश्चायकस्य कारणगुणादेः कथं निश्चयजनकत्वमित्यत्राह यदेवेति ततः किं तत्राह निश्चयोपीति तस्मान्न विरोध इत्याह
३२ तेनेति एतदुक्तं भवति अत्र निश्चयशब्देन न विषयधर्मोऽभिधीयते किंतु ज्ञानविशेषः निश्चायकस्तु कारणगुणादिः तत्र च कारण
गुणादिभिः अर्थतथात्वरूपप्रामाण्यनिश्चयज्ञानमुत्पद्यत इति वचनं युक्तमेवेति किमित्येतन्न व्याख्यायते स्वतः प्रामाण्यं नाम स्वतो
जननमेव किं न स्यादित्यत्राह यदि पुनरिति इति वक्तव्यमिति नाङ्गीकृतेपीति शेषः अन्यथेति परतो जायत इत्युक्ते स्वतो जायत इत्येव
32 सिद्धान्तो वक्तव्यो नान्यथेत्यर्थः इत्थमेकदेशिमतं निराकृत्य स्वमतेन निर्णयं तस्य ग्रंथानुगुण्यं चाह प्रामाण्यं स्वत इति स्वमते न पूर्वप
क्षज्ञानाद्धानोपप्रतिजानातीति तदयमिति तत्र पूर्वपक्षमाह घटादिति असत्यपि घटे घटज्ञानोदयान्न घटज्ञानं घटतथात्वनिश्चायकमि
त्यर्थः ततश्च परतस्तन्निश्चयोऽङ्गीकर्तव्य इत्याह तेनेति तत्ज्ञानोत्तरभाविनी तत्तदर्थसाध्या क्रियायाश्चार्थादेवोत्पत्तुमर्हतीति कार्य
भूतयार्थक्रियया कारणभूतेर्थस्य तथात्वे निश्चिते पश्चात्पूर्वजनितज्ञानस्य प्रामाण्यनिश्चय इत्यर्थः नन्वर्थक्रियाज्ञानस्याप्यर्थक्रि
यान्तरज्ञानात्प्रामाण्यनिश्चये नवस्थास्यादित्याशंक्य तत्र स्वतः प्रामाण्यांगीकारान्नानवस्थेत्याह अर्थक्रियाज्ञानं त्विति पूर्वज्ञानस्य व्य रामः०
भिचाराशंकासंभवात्खलु तत्प्रामाण्यनिश्चयार्थमर्थक्रियाज्ञानमपेक्षितं अत्र तु तदाशंकाभावादपि तथात्वनिश्चायाय नान्यदपेक्षि
तमिति स्वतः प्रामाण्यमित्यर्थः तथा संवादात्कारणगुणात्स्वत निश्चयमाह तथेति ननु स्वतो निश्चयः कुतो न स्यादित्याशंक्य पूर्वो ३२

र्थं व्यवहितं व्यभिचारं दर्शयति न स्वतस्तस्येति। एवं प्रामाण्यस्य परतस्त्वमभिधाय प्रामाण्यस्यैव स्वतस्त्वमिति पूर्वपक्षांतरमाह अ
निश्चिते चार्थ इति। निर्णायकानामर्थक्रियादीनामभावे ऽर्थतथात्वानिर्णयाद् प्रामाण्यं स्वाभाविकमिति तस्य स्वतस्त्वमित्यर्थः॥ पुत्तंपंतरमे
पाह किं चेति प्रामाण्यनामार्थतथात्वं तन्निश्चयाभावो ऽप्रामाण्यं स च निश्चयप्रागभावरूपः स चानादित्वान्न दोषेण जन्यते तु शक्यत इ
ति न तत्ज्ञानेन निर्णेतुं शक्यत इत्यतो ऽप्रामाण्यं स्वत एव स्यात् प्रामाण्य निश्चयज्ञानस्य भावरूपतया कारणगुणसंवादार्थक्रियाज्ञाना
दिभिर्जननात् प्रामाण्यं तु परत एव निर्णीयत इत्यर्थः॥ पूर्वपक्षमुपसंहरति तत इति। एवमप्रामाण्यं च स्वत इति शेषः। सिद्धांतस्वरूपमा
ह सिद्धान्तस्त्विति। न ज्ञानानामर्थक्रियादिभिर्व्यभिचारनिश्चयमुखेनार्थनिश्चायकत्वं किंतु स्वभावत एव धियां तत्पक्षपातस्वभावादि
त्यर्थः। स्वतो निश्चयाशंको दोषमाह। यदीति। निश्चयस्य स्वाभाविकत्वाभावे न विज्ञानोत्पत्त्यावधि तत्तदर्थो निश्चयाद्धीयमानमपि ज्ञानम
विद्यमानप्रायमिति सर्वं जगज्ज्ञानाद्यमेव स्यादित्यर्थः। ननु माभूत् स्वतो निश्चयः परतस्तु स्यात् तत्र किं कथमांध्यमित्यत्राह नहीति। ज
लाहरणाद्यर्थक्रियाज्ञानं स्वयं निश्चितार्थमेव सत्कारणानया घटज्ञानस्यार्थं निश्चिनुयात् तत्र शक्यं स्वस्यापि पूर्वज्ञानाविशेषादित्य
र्थः। अविशेषमेव दर्शयति। यथेति। एवं चार्थक्रियाज्ञानस्यापि ज्ञानांतरेणोपपाद्यता त्वर्थस्य निर्णयः तेनानवस्था तदवस्थेति भावः। तथा
र्थक्रियया नन्वर्थक्रियाशब्देन ज्ञानपूर्वकप्रवृत्तिमात्रं नोच्यते किंतु तत्प्रवृत्तिसाध्यं सुखादिकं तद्गोचरं ज्ञानं अर्थक्रियाज्ञानं तादृशं ज्ञा

३३ नं च स्वत एव स्वार्थप्रमाणं व्यभिचाराभावात् न हि सुखदुःखानुव्यवसायज्ञानानां व्यभिचारसंभवः एवं च ज्ञानेन सुखे निश्चिते तेन स्वहे
33 तुभूतार्थव्यापारो निश्चीयते न च पूर्वज्ञानस्य याथार्थ्यं निश्चीयत इति नानवस्थेति शंकते अथेति ज्ञानमेव सुखात्मकमिति ज्ञानमे
व सुखमेवेत्यर्थः । न तज्ज्ञानं सुखज्ञानं । स्वात्मनि स्वार्थोपरिहरतीति तथेति तथा सति तादृशस्य ज्ञानस्याव्यभिचारनिश्चयात् स्वतः प्रामाण्ये
न स्वार्थक्रियायाः सुखस्य स्वतस्तन्निश्चयो भवतु नाम तथापि पूर्वज्ञानस्य याथार्थ्यं तथा दुर्निरूपं सुखपर्यन्तायाः अपि स्वार्थक्रियायाः स
त्त्वाभावेन सुखस्यार्थव्यापाराव्यभिचारितया तस्यैव तेन निर्णेतुमशक्यत्वेन तद्बलादर्थनिर्णयस्य दूरतरत्वादित्यर्थः । किं चार्थ
क्रियालक्षणानुमानप्रवृत्तेः पूर्वमेवार्थस्य कश्चिन्निर्णयोऽङ्गीकार्यः । अन्यथा व्याप्तिग्रहणस्यैवासंभवादनुमानाप्रवृत्तेः तत्र वा
र्थनिर्णयो नार्थक्रियया तस्याग्रहीतव्याप्तिकतया नानुमापकत्वात् तस्मात्तत्र स्वतः प्रामाण्यमंगीकार्यमिति यत्पश्चादपि तथै
व भवत्वितीत्युक्तं तत्रैवाह अपि चेति गृहीताविनाभावयेति जलाहरणार्थक्रिया घटरूपार्थपूर्विका तादृशार्थक्रियात्वात् याता
वदेतादृश्यर्थक्रिया सा तदर्थपूर्विका एवं गृहीताविनाभावयेत्यर्थः । ततः किं तत्राह अनुमानमिति ततोऽपि किं तत्राह न चेति फलि राम०
तं दर्शयति नेनेति सामान्यतो व्याप्तिग्रहणसमये घटज्ञानात्स्वतो घटनिश्चयाभावे व्याप्तिग्रहणमेव नस्यात् कुतोऽनुमानमित्यर्थः । इ
त्यमर्थक्रियाज्ञानस्य निश्चायकत्वमुपपाद्य तद्वदेव संवादकारणगुणज्ञानयोरपि निश्चायकत्वं नास्तीत्याह एवमिति एते वार्थक्रिया ३३

ज्ञानवत्त्वयं निश्चितत्वार्थे एव पूर्वज्ञानं निश्चितुपातां तत्राशङ्कते योऽपि पूर्वज्ञानाविशेषादिति भावः अविशेषमेवाह नापीति न शक्य
त इति पूर्वज्ञानवदेवेत्यर्थः पूर्वोक्तदोषमुद्धरति यद्यपीति निश्चयो नाम ज्ञानजन्यो विषयगतोऽतिशयोऽभिप्रेतः निगमयति तस्मादिति
नन्वप्रामाण्यं दोषजन्यं चेत्तत्तानेन निश्चेतुं शक्यते न तद्दोषजन्यं यतो दोषज्ञानस्य तन्निश्चायकत्वं न संभवतीत्यप्रामाण्यस्य परतस्त्वं नुप
पद्यत इति पूर्वोक्तमेव दूषणमाशङ्कते नन्विति परिहरति उच्यत इति अयमर्थः अन्यथात्वं अविद्यमानार्थप्रकाशकत्वं तच्च दोषान्वयव्यतिरेकानुवि
धायितया दोषजन्यमिति दोषनिश्चयेन तन्निश्चीयत इत्यर्थः स्वतःप्रामाण्यप्रतिपादनस्य प्रयोजनमाह वेदेऽपीति ननु स्यान्नाम स्वतःप्रामा
ण्यं परतस्त्वेवाप्रामाण्यं च तथाप्यप्रामाण्यं कथं दोषैकनिमित्तं गुणाभावप्रतिपत्तिनिमित्तं किमिति न स्यात् दोषस्येव गुणाभावस्यापि सा
हचर्यसंभवादिति शङ्कते कथं पुनरिति अस्तु गुणाभावनिमित्तमप्रामाण्यं ततः किं तत्राह तस्मादिति उपलक्षणानिश्चयः उपलक्षणसंभ
वादिति अप्रामाण्यस्येति शेषः परिहरति इदमभिधीयत इति न्यायानुसारेणाप्रामाण्यस्य दोषनिमित्तत्वं प्रतिपादयितुकामः प्रथमं तावन्न्या
त यमाह दृष्टानुसारिणीति दृष्टानुसारिणी प्रमाणप्रतिपन्नार्थानुरोधिनी अस्त्वेवं न्यायः ततः किं तत्राह वेदस्येति स्वतःप्रामाण्यमिति बोधा एप
त्मकत्वेन स्वतःप्रमितिरित्यर्थः ततोऽपि किं तत्राहानेनेति एतदुक्तं भवति यद्यपि साहचर्यमुभयोरप्यविशिष्टं शुक्तिरजतादिज्ञाने तथाप्यप्रा
माण्यस्य गुणाभावप्रयुक्तत्वे संप्रतिपन्नवेदप्रामाण्यविप्लवप्रसंगाद्दोषप्रयुक्तत्वमेषितव्यमिति। ननु साहचर्यविशेषात् दृष्टविरोधेऽपि

गुणाभावप्रयुक्तं किमिति तस्मादित्याशंक्य तदानीमतिप्रसंगमाह अन्यथेति ज्ञानत्वस्येत्याह चर्यैदर्शयति सर्वेष्विति तस्मादतिप्रसंग
३४ सद्भावाद्यथाज्ञानत्वमप्रयोजकं एवं गुणाभावोपीत्याह तत्रयथैवेति नास्तिकाशंकामनूद्य परिहरति कुतः सिद्धमिति स्वतइतिचेदि
तिपरतस्त्विष्टे पूर्वोक्तदूषणसद्भावादितिशेषः निगमयति तस्मादिति किंच गुणाभावस्याप्रामाण्यहेतुत्वे गुणस्य प्रामाण्यहेतुत्वं
34 स्यात् तच्च नयुज्यतइति तत्तदभावस्याप्रामाण्यप्रयोजकत्वमित्याशयेनाह अपि चेति तत्रप्रथमं याथार्थ्यस्य गुणप्रयुक्तत्वं निराक
रोति गुणाभावेपीति तथाभूतानां सत्यानां अतः प्रामाण्यस्यान्याप्रयुक्ततयास्वकारणप्रयुक्तत्वमेव परिशिष्यतइत्याह स्वकारणा
देवेति तत्राप्रामाण्यस्यापि गुणाभावप्रयुक्तत्वासंभवाद्दोषएवतद्धेतुरंगीकार्यइत्याह दोषादिति एवं चांगीकारे शुक्तिकारजता
दिज्ञानानामंशे याथार्थ्यमंशान्तरेत्वयाथार्थ्यं च युज्यतइत्याह तथासतीति सप्रयोजनं प्रकरणार्थमुपसंहरति तस्मादिति ग्रंथकर्ता
विज्ञानस्य प्रमाणत्वं स्वतइति प्रतिज्ञातं प्रकरणं परिसमापयति पार्थसारथिमिश्रेणेति मोहनिवृत्तये संशयनिवृत्तये ॥ ५ ॥ ॥ इति
न्यायरत्नमालाव्याख्यानेनायकरत्ने स्वतःप्रामाण्यनिरूपणं ॥ संप्रत्यभिहितान्वयनिर्णयाख्यं प्रकरणमारभमाणो वाक्यार्थसंविदइति वार्ति
ककारीयैर्न्यायरत्नाचार्याभिमतयुक्तिभिः ॥ व्युत्पन्नस्य पुरुषस्य तावल्लोके वाक्यादर्थप्रतीतिर्जायतएवेति सार्वजनीनमेतत् तत्र तावद् एम०
वैयाकरणाभिमतं तन्मूलमाह केचित्तावदिति क्रमिकेणश्रुतैर्विनाशिभिर्वर्णैः प्रत्येकं योगपद्येन च वाक्यार्थप्रतीतेरसंभवात् ३४

न्नईर्णाभिव्यंग्यमेखंडं स्फोटाख्यं शब्दतत्त्वं तन्मूलमेवेति ज्ञेयमिति। अविभागमखंडं व्यंजकध्वनिभेदात् व्यंजकवर्णभेदाद्वृत्तौ पदवि
पर्यासात्मनावगम्यमानं। वर्णविपर्यासे सति पदज्ञानात्मना पदविपर्यासे सति वाक्यज्ञानात्मनाभिव्यज्यमानं विपर्यासो नाम वर्णपदस्था
नेवर्णान्तरपदान्तरनिवेशः। तस्य तस्य नानारूपस्या संप्रतिवोद्दैकदेशि विज्ञानवादिनोभिमतं तन्मूलमाह अन्ये त्विति ते हि मन्यंते वि
ज्ञानमेकमेव तत्तत्तदुपरागात्प्रतीयमानं वाचकं शब्दज्ञानं वाच्यं द्रव्यक्रियात्मकार्थज्ञानं च विज्ञानादभिन्नं विज्ञानात्मकमेव अतो वा
क्यमपि ज्ञानं वाक्यार्थोपि ज्ञानमिति एवंविधंशब्दगोचरं तदनंतरं शब्दगोचरं वाक्यात्मकज्ञानं तद्ए तदुक्तं भवति शब्दात्मकं ज्ञानं वा
क्यं अर्थात्मकं ज्ञानं वाक्यार्थ इति अस्मिन्मते वाक्यवाक्यार्थरूपयोः पूर्वोत्तरज्ञानयोर्मतांतरवत्तत्प्रतिपाद्यप्रतिपादकभावः संबंधोभि
मतः। किंचान्य इत्याह कार्यकारणभावश्चेति अगृहीतसंबंधस्य वाक्यार्थप्रतीत्यभावाद्वुत्पत्तिरप्यपर्णीया सा च पक्षद्वयेपि वाक्यस्याखं
डत्वेन पदभेदाभावात्कथमित्याह उभयस्मिन्निति तत्त्वतो वाक्यस्याविभागत्वेन पदभेदाभावेपि व्यंजकवर्णादिषु वस्तुतया परिकल्पिता
नां पदार्थस्तुत्वान्निरूपपद्यतेसे वाक्यान्तवाक्यार्थस्तत्त्वाद्युपायतया स्वीक्रियत इत्यर्थः। संप्रति नैयायिकवैशेषिकाभिमतं तन्मूलमा
ह अपरे त्विति इत्थं हि तन्मतस्थितिः वर्णानां प्रत्येकपदार्थवाचकत्वेऽतिप्रसंगात् आशुतरविनाशित्वेन समुदायग्रहणासंभवात्
पूर्वपूर्ववर्णानुभवजनितसंस्कारसचिवोंत्यो वर्णः पदार्थस्य वाचकः। तथैव पूर्वपूर्वपदानुभवजन्यसंस्कारसचिवमंत्यपदं

३५ वाक्यार्थस्य वाचकं तत्र निपतत्क्रमा वर्णाः पदं तादृशानि पदान्येव वाक्यं इत्यादिना मार्गेण पदवद्वाक्यमपि वाचकं इत्यन्व
यः सावयवं पदान्येव वाक्यावयवाः स्फोटवदखण्डं न भवतीत्यर्थः। अत्रापि पदार्थप्रतीर्वाक्यार्थप्रतीतेरंगमित्याह प्रतिलब्धसं
35 वंधेति प्रतिलब्धो ज्ञातः संबंधो येषां तथोक्तानि तान्येव वाक्यापेक्षयावयवभूतानि पदानि तेभ्यो जनिता पदार्थसंवित्तदु
पायकं वाक्यं। संप्रति स्वसंनिहितं गुरुमतं स्वमतं वाह पदान्येवेति तत्र वोद्रुमतनिरासस्तावदाचार्यैरेव कृत इत्याह तन्नेति सा
त्मनि क्रियाविरोधादिति वाक्यवाक्यार्थयोर्ज्ञानात्मकत्वे तयोरेव ज्ञानविषयत्वात् एकस्यैव विषयित्वं विषयत्वं च विरुद्धं ज्ञाना
द्भिन्नत्वे चास्मत्पक्षप्रवेश इति भावः। दूषणान्तरमप्याह वहिर्न्नवभासश्चेति ज्ञानमात्रत्वपक्षे तदाभासते अर्थस्तत्तद्विषयतयावहिः अतो ज्ञा
नार्थयोस्तादात्म्यमयुक्तमिति भावः नतु पदाद्वाक्यं भिन्नमभिन्नं वा अर्थोपि वाक्यार्थाद्भिन्नो भिन्नो वा यदि भिन्नः तदाखण्डवाक्यवादप्र
वेशः यद्यभिन्नस्तदा वाक्यं पदमित्यादिभेदानुपपत्तिरिति शङ्कान्तदूषणमाशंक्य परिहरन्ति पदपदार्थेति अनेकान्तवादाश्रयणेन अनि
यमाश्रयणेन भेदाभेदाश्रयणेनेत्यर्थः। नन्वनयोरत्यन्तभेदोत्यन्ताभेदो वा स्यात् कथं भेदाभेदावित्याशंक्य प्रतीतिवलात्तथैवाश्रयणं युक्त
मित्याह वाक्यं हीति एवं च पदपदार्थाभ्यां वाक्यवाक्यार्थयोर्भिन्नतया प्रतीतिसिद्धत्वेन दुरपह्नवत्वात् सर्वैरपि वादिभिस्तावदवश्यं निरूप रा प्र०
णीयेत्याह यद्यपीति समुदितानां पदानामेव वाक्यत्वात् समुदितानां पदार्थानामेव च वाक्यार्थत्वात् पदार्थेभ्यो वाक्यवाक्यार्थयोर्भेदोऽप्य ३५

ज्यते एकैकपदस्यावाचकत्वात् एकैकपदार्थस्य चावाच्यार्थत्वात् नाभेदोऽपि युज्यत इत्यर्थः । अवान्तरस्थित्युपपत्तेः भेदाभेदमध्यमा
वस्थितिरूपतृतीयप्रकारोपपत्तेरित्यर्थः । बहिर्भूतौ पृथग्भूतौ बहिर्भावश्चपदापहायस्वभावात् वाक्यस्य समूहिभावः तदर्थो वा
व्यतिषंगात्मकाद्वाक्यार्थस्य व्यतिषक्तता । संप्रति वैयाकरणाभिमतस्फोटतत्त्वप्रतीतिविरोधेन दूषयति निर्भागेति । शंकते पदवदि
ति । शंकां विवृणोति स्यादेतदिति । वर्णात्मकभागावगमे नानावर्णात्मकभेदप्रतीतौ अर्थप्रतीतेश्च वर्णेभ्यो नुपपत्तेरिति एकैक
स्माद्वर्णात्पदार्थप्रतीतावति प्रसंगः स्यात् समुदायस्य चासंभवादिति भावः । भागावग्रहस्य मिथ्यात्वादिति एकं पदमित्येकप्रतीते
र्भेदप्रतीतिर्मिथ्येत्यर्थः । नानात्वं सभागत्वं प्रतिक्षिपतीत्यर्थः अन्नमेवापायेति नत्येकैकस्मात्पदाद्वाक्यार्थावगतिः अतिप्रसंगात्
नापि समुदायात्तस्य युगपद्ग्रहणासंभवादिति भावः एककार्य्यनिमित्तकं इत्यादि शुद्धयोरपि वर्णयोरेकार्थोपाधिवशादेकपदत्व
मिति भावः । सेनेति देशैकादेकत्वं राजसूय इति पश्चिष्टि सोमात्मकानेककरणसंघातो हि राजसूयः स हि फलैक्यादेकत्वमुप
गत इति भावः व्यतिरेकमुखेनोपाधित्वमेवाह यद्वति अत एवेति प्रतिकूलतर्कप्रयोगेणापि पदस्फोटस्याप्रसक्तत्वं निरस्यति प्रत्य
क्षेणेति यदि स्फोटाख्यं तत्त्वं प्रत्यक्षं तर्हि शब्दप्रयोगानन्तरमुत्पन्नाश्रुतस्य न्नसाधारणेन प्रतीयेत न चैवं । तस्मान्नदसंभवद्वृत्तिमा
वः । निगमयति तत्रतावदिति । इत्थं स्फोटाख्यतत्त्वे प्रत्यक्षाभावमभिधाय संप्रति न केवलं तत्र प्रमाणाभावः योग्यानुपलब्धिः स्तद

भावे प्रमाणमित्याह प्रस्तुतेति अतः परमर्थापत्तेः तत्प्रामाण्यं निरस्यति न चेति श्लोकेन ततश्च वर्णानामेव वाचकत्वं तथेत्याह
३६ तेनेति नैरंतर्यपरिणामविलंबोच्चारितानां स्वरविशेषभाजां उदात्तादिभिः स्वरैः काकुस्वरैरप्यर्थविशेषावगमादिति भावः संह
तानां संस्कारद्वारा समूहीभूतानां मेकस्मृत्यारूढानां वा आनुपूर्वीविशेषशालिनां नियतक्रमाणां कारणतावच्छेदकत्वेनैवमित्यादौ
36 क्रमविशेषस्यार्थगत्यावगमादिति भावः न हि त्वन्मते अंशस्येव वर्णा इति संस्कारद्वारकं साहित्यमिति भावः तत्र वर्णसाहित्यस्याप्रतीतिव
र्णाः कल्प्यमानाः संस्काराः स्मृतिहेतुभावनाख्यसंस्कारविलक्षणा विवक्षिता इति शंकते एवं तर्हीति विलक्षणावद्वसंस्कारकल्पना
देकमेव शब्दतत्त्वं सुकल्प्यमिति भावः॥ अत्र यद्यपि शब्दतत्त्वपरस्य प्रत्यक्षसिद्धं तथापि तत्र विप्रतिपन्नो सत्यां कल्पत्वपक्षेपि बहुक
ल्पनादेककल्पनं युक्तमिति हृदयं परिहरति नेत्याहेति पूर्वोक्तनीत्या शब्दतत्त्वस्य प्रत्यक्षानुपलंभनिरस्तत्वात् न तत्र सुकल्पं संस्कार
णां तु प्रत्यक्षगोचरत्वात्तत्कल्पने प्रत्यक्षविरोधाभावात् शब्दतत्त्वकल्पनात्तत्कल्पनं न लज्जावहमिति भावः दृष्टविरोधाभावादनेक
कल्पनमिह न लज्जावहमित्याह अनेकमपीति न तु शब्दतत्त्वकल्पने प्रत्यक्षविरोधः संस्कारकल्पने तु बहुकल्पनात्तथापि संस्का
रेषु पक्षपातो भवतो निर्निबंधन इत्याशंक्य पक्षान्तरमादयति। यद्वेति स्मृतिहेतवः संस्काराः क्लृप्ताः संप्रतिपन्ना एते पि त एव न न द्विल राप्र०
क्षणा इत्यर्थः न तु तेषां संस्काराणां अनुभूतार्थगोचरस्मृतिजनकत्वमेव न तु वाकार्थप्रतिपत्त्युपयोगित्वमिति शंकते यदनुभवेति ३६

यतः प्रथमं श्रवणाप्रथमवतीतिः पश्चात्तस्मात्संस्कारादेव शब्दा वाचका अतः स्मृतिजनकत्वेनैव तेषामर्थप्रत्युपयोगित्वमिष्टमेवेति प
रिहरति नैव तेषामिति न तु संस्काराणां स्मृतिजननद्वारार्थप्रतीत्युपयोगोऽभिहितः स न घटत इति शब्दतत्त्ववादी शङ्कते नन्वनुभवव
दित्यादिना शब्दतत्त्वविदः प्रतिपन्ना इत्यसं तेनातत्र क्रमेण स्मृतानां वा वाचकार्थप्रत्युपयोगः युगपद्वाद्वेति विकल्प्य प्रथममनुभवप्रतिबंद्यादूष
यति नन्वनुभववदिति यथा क्रमेणानुभूतानां न वाचकत्वं तथा क्रमेण स्मृतानामपीत्यर्थः। द्वितीयमाशङ्क्य निरस्यति अथ क्रमेणेति
युगपत्स्मरणं नामोच्चारितवर्णानां क्रमानादरेण स्मरणं ततो जराशब्दोच्चारणे राजशब्दार्थप्रतीतिः स्यात् तथा वनशब्दोच्चारणे
नवशब्दार्थप्रतीतिः स्यादित्यर्थः। कुत इत्यत आह न चापीति न तु व्युत्क्रमोच्चारितानां जरादिशब्दानां न राजादिवाचकत्वमुच्चारणक्रम
स्याप्यङ्गत्वादित्याशङ्क्य ततः स्मृतियौगपद्येऽप्यनुपयोगात् इदानीं न दृष्टाङ्गत्वं स्यादित्याह अथ त्विति अदृष्टकल्पना अदृष्टाङ्गकल्पना
स्येवेति। शब्दतत्त्ववादिनमपि त्वया याप्रमाणविरुद्धा कल्पना यादित्ताता दृश्येवेत्यर्थः। अदृष्टकल्पनामेवाह संस्कारो हीति। क्रमान्तरे
पि व्युत्क्रमोच्चारणेऽपि एतन्निमित्तं संस्कारमात्रनिमित्तं। अस्तु व्युत्क्रमोच्चारणेऽपि संस्कारोऽस्ति तन्निमित्तं च युगपत्स्मरणं स्यात् तत्र
थापि तत्र दृष्टद्वारा उच्चारणक्रमोपयोगः स्यादित्यत आह किमपरमिति उच्चारणक्रमस्य क्रमरहितयुगपत्स्मरणस्य वन दृष्टद्वा
रकमुपयोगं पश्यामः लौकिकेषु कार्यकारणस्थलेषु दृष्टद्वारोपयोगस्त्व किंचित्कर इति तत्कल्पनागौरवमिति भावः। कश्चिदस

५

त्वयुच्चारणेन तत्क्रममेव केवलं स्मृत्यारूढं वर्णैरर्थप्रतीतिदर्शनादुच्चारणक्रमस्यादृष्टांगत्वमपि आश्रयामस्मि साहान चेति नामप्रा
३१ तिपदिकं राजशब्दो मध्यमपुरुषैकवचनमाख्यातं। किंच केवलवर्णानामेव पदत्वे तदतिरिक्तशब्दतत्वाभावेऽनिष्टांतरमप्या
ह यदिहीति जकाररेफयोरनुच्चारणावस्थापन्नयोर्युगपत्स्मृत्यारूढयोरुच्चारणक्रमस्मृतिक्रमप्रयुक्तभेदाभावात्सदभेदः तद्भे
दप्रयुक्तोऽर्थभेदश्च न स्यात् अतो वर्णातिरिक्तं पदं नियतक्रमवर्णाभिव्यंग्यं शब्दतत्वमेषितव्यमित्यर्थः। किंच भाट्टमते वर्णेषु क्रमएव
37 न संभवति तद्भेदप्रयुक्तोऽर्थभेदस्तु दूरे इत्याह नवेति नित्यत्वाद्देशक्रमाभावः नित्यत्वात्कालक्रमाभावः विभुत्वं तितन्न तत्र संचरंति
प्रतिभासंपंति चापदार्थशंकां निगमयति तदन्यदिति विलक्षणावभासेन नानावर्णविलक्षणतया प्रतिभासमानं वर्णास्तावदत्र
न गुणाः ते च व्यापका नित्याश्च ध्वनिस्तत्तद्व्यंजकः प्रतिवर्णं विलक्षणः क्षणिकश्च तत्क्रमस्तावद्दीर्घत्वादिवत् वर्णेष्वारोपितः ता
दृशक्रमविशिष्टा वर्णा एव पदं मतः क्रमभेदात्सदभेदः पदभेदाद्वाक्यभेदः तद्भेदाच्चार्थभेदसिद्धिः क्रमेणानुभूतानामपि वर्णानां तेने
वक्रमेणायुगपत्स्मरणं प्रयुक्तमित्याशयेन परिहरति श्रोत्येत इति॥ अयुगपदनुभववदिति पदच्छेदः दीर्घत्वादिवदित्यादिशब्दाद्ध्रस्व
ग्रहणं महत्वाल्पत्वे वेति वा शब्द इवार्थे विशिष्टानुपूर्वीसमालिंगितेति क्रमानुभूतेष्वपि पदार्थेषु तेनैव क्रमेण विशिष्टानां युगपत् राम०
स्मरणं प्रयुक्तं पंचषपाजामयानुष्ठिताङ्गोदावर्यां महानद्यां शतवारं समानुतांशतं पिपीलिकानां मयाहतमित्यादितया दर्शनादि ३१

तिभावः उच्चारणक्रमस्य क्वचिद्व्यभिचार उक्तः तं परिहरति एवमिति तात्कालिकोच्चारणक्रमाभावेपि पूर्वोच्चारणक्रमविशेषसंभ
वात्तत्क्रमेणास्मरणं युक्तमिति भावः फलितं दर्शयति तेनेति। अत्राचार्यसंमतिमाह। आह चेति तद्वशेनेति तत्क्रमवशेनानुपतं
तः अनुविदधानाः पदस्फोटनिरासमुपसंहरति तत्सिद्धमिति वाक्यस्फोटं निराकरोति भागावयवादिति प्रत्यक्षविरुद्धमनुपलब्धिबा
धितं चेत्युक्तमित्यर्थः। अस्तु नियतक्रमेभ्यो वर्णेभ्यः पदरूपेभ्यः पदार्थभेदावगतिः पदार्थसंसर्गरूपवाक्यार्थस्तु तदवगतिः कथमित्या
क्षिपति कथं तर्हीति नेत्यपि कैकदेशिमतेनोत्तरमाह पदार्थवदिति पदार्थेभ्य एव वाक्यार्थावगतिरिति स्वमतं उत्तरं व्यक्तीभवि
ष्यति वर्णानामेव पदे वाक्यव्यवहारवद्वाक्यमप्यर्थैकोपाधिकमित्याह तत्रेति पञ्चेति संघातिवर्णसमुदायरूपवाक्यादर्थप्रतिपत्तिर्न
युक्तेत्येतन्मतमाक्षिपति आहेति तर्कस्य विपर्ययपर्यवसानमाह न वाचस्तस्येति अपूर्ववाक्यश्रवणेनेति अश्रुतवाक्यस्यापि विदः
पुंसस्तदर्थे तस्य वाक्यस्यानुत्पन्नत्वात् दर्थप्रतीतिर्न स्यादित्यर्थः। वाक्यस्य पृथक् संगतिग्रहाभावेपि पदपदार्थसंगतेरेव तदुपका
रकत्वात् अपरो न कश्चिद्दोष इति शंकते अथ पदार्थेति पदपदार्थसमूहस्यैव वाक्यत्वे तदर्थत्वे च पदपदार्थव्युत्पत्तिरंगं स्यान्नाम समु
दायसमुदायिनोरत्यंतभेदाभावात् वर्णानामेव वाक्यत्वे तदर्थस्य च पदार्थातिरेकेनुपकारकत्वाद्व्युत्पत्तिरंगमेवेति पतिडरजित
दयुक्तमिति ननु नानुपकारकत्वमुपकारसंभवादिति शंकते पदार्थेति नैतस्योपकारकत्वं कार्यानुगुण्याभावादिति परिहरति नेते

३८ नेति तदेवाह नहीति उपकारः कारः कार्यानुगुण्यं। वाक्यार्थप्रतीत्यन्यथानुपपत्त्या पदार्थज्ञानजनितया किंचिदानुरूपं कल्प्यत इति शं-
कते कोपि नामेति दूषयति नहीति वर्णानामेव वाक्यत्वे तेषामेव वाक्यार्थबोधकत्वे पदपदार्थव्युत्पत्तेर्ईदृशोपकारकत्वाभावादीदृशो-
पकारकल्पनायोगात्। तथा चायमर्थः लौकिककार्यकारणस्थलेषु तत्कल्पनानुपपन्नेत्यर्थः। वाक्यवाक्यार्थयोरेव संगतिग्रहणांगी-
38 कारपक्षे दूषणान्तरमाह किंचेति नियतक्रम वर्णानामेव वाक्यत्वे गामानय गां बधान गां मुंच वा अश्वमानय अश्वं बधान अश्वं मुंचेत्यादि-
ष्वल्पैरेव तु पदैर्वृद्धवाक्यरचनात् वाक्यस्यैव वाचकत्वांगीकारे नैकवाक्यबाहुल्याद्वाचकशक्तयो बह्व्यः कल्पनीयाः स्युरित्यर्थः
। ननु चतुष्करीसावर्णेभ्यो वाक्यार्थप्रतीत्यनुपपत्तौ लोके तर्हि वाक्यार्थप्रतीतिरेव न स्यादित्येकदेशिनोभिप्रायमाशंक्यार्थप्रतीते-
रन्यतः सिद्धत्वादिति परिहरति न चेति यतोनुपपन्नेनिमंक्षेशामनुभवेमेत्यर्थः। अन्यतः सिद्धिमेवाह लोकप्रसिद्धेति कथं तैस्त-
त्सिद्धिरिति पृच्छति कथं पुनरिति। इत्थमेकदेशिमतं निरस्य प्रथमं गुरुमतमवतारयति तत्रेति पदान्येव वाक्यं पदार्था एव वाक्यार्थ इति
हि तन्मतं संगतिशालिनः अन्वयशालिनः अभिधीयन्त इति पदतः अन्वितेषु व्युत्पन्नैरन्वितार्थाः पदैरभिधीयंते। अतोन्वितार्थपराणि
पदान्येव वाक्यमिति टीकाकारमतानुवर्तिन आचक्षत इत्यर्थः। उत्तरश्लोकसंगतिमाह न चेति। व्युत्पत्त्यधीना शब्दार्थावगतिः। अत्रान्वि- राम॰
तार्थे व्युत्पन्नैरन्वितमेव वाच्यमिति भावः॥ श्लोकं व्याचष्टे विशिष्टार्थेति वाक्यजनितेन ज्ञानेन व्यवहरमाणस्य मध्यमवृद्धस्य विशिष्टवि- ३८

षयेवविशिष्टवाक्यार्थविषयेवसंविदुन्नीयतेतदनंतरंविशिष्टएववाचकत्वशक्तिर्निश्चीयतइत्यर्थः।पदान्यपिपदसंघातेतिपदसंघा
तस्यैववाक्यार्थत्वाद्वाक्यमेववाक्यार्थवाचकंयुक्तमितिभावः।नसंघातात्मनेतिसंघातस्यवाक्यार्थाभिधायकत्वेदोषसंभवात्प्रथममव
गतमन्वितवाचकत्वमावापोद्वापाभ्यांवाक्यार्थैकदेशान्प्रतिवाक्यैकदेशानांपदानामवसीयतइत्यर्थः।ननुसंघातात्मकमेववाक्यंतद
र्थवाचकंचकिमितिनस्यात्तत्राहव्यभिचारादिति।एकस्मिन्वाक्येपदान्तरप्रक्षेपेसतितद्वाक्यस्यपूर्ववाक्यार्थातिपातोव्यभिचारः।तथावा
क्याततदर्थयोस्संगतिग्रहणासंभवाच्चनवाचकत्वमित्यर्थः।संबंधग्रहणासंभवमेवाहआनंत्यादिति।आनंत्यंवपदान्तराणांवापनिमित्तं
त्वत्पक्षेऽप्येतद्दूषणंतुल्यंसमानमितिशंकतेभवत्पक्षइति।अनंतानांवाक्यार्थानांतदेवोपपादयति।अन्विताभिधायीत्यादिनापरिहरतिउच्यतइ
ति।एकेनोपलक्षणेनेति।अभ्यासवाऽन्तरार्थविवक्षायांहिगोपदस्यानंतार्थत्वंआकांक्षायोग्यतासंनिधिमत्त्वसामान्याकारविवक्षायांतुनाने
कार्थतेतिभावः।कथमव्यभिचारःतत्राह।अन्यादृशइति।एतादृशोपलक्षणरहितस्थलेयथाकांक्षितत्वंसंनिहितत्वंयोग्यत्वमितित्रीण्यु
पलक्षणानितथाप्येकोपलक्षणेनेतिवचनमितरोपलक्षणराहित्यपर्यवसानमिति।उपलक्षणोऽहउपलक्षितत्वमेकमेवानेकेषामपि
पदार्थानांसामान्यमाशंकतेसंघातरूपापीति।तस्यपदसंघाततत्तदर्थसंघातस्येति।आकांक्षितसन्निहितयोग्यपदान्तरसहितंगोपदंतादृशा
र्थात्मेतरव्यतिषक्तेस्वार्थेव्युत्पन्नंतादृशमर्थंवक्तुंवशक्तमित्यर्थः।परिहरतिसत्यमिति।शक्तिकल्पनागौरवादिति।किंचाल्पोरेवपदैरा

वाक्यैकवाक्यभेदेनेत्युक्तमित्यर्थः। किंचास्मत्पक्षे एकैकमेव गवादिपदं वाचकं तस्यानुत्पत्तिः स्तुशकाद्दमिति निर्धारयितुं शक्यत्वात्त्वत्पक्षे
३९ तु पदसंघातः तस्यैव वेदमिति निर्धारयितुमशक्यत्वाद्वाक्यार्थानुत्पत्तिर्दुःशकेत्यर्थः। ननु गौरश्वं त्वत्पक्षेऽपि समानं अतः पदानामर्थमात्रवा
चकत्वं युक्तमिति शंकते अन्विताभिधायित्वमपीति परिहरति तत्रेति वाक्येनान्वितप्रतिपादकं पदानामपि तत्प्रतिपादकत्वे त्वन्वितप्र
39 तीतिर्न मूला स्यादित्यर्थः आचार्याभिमतं मूलमाशंकते तत्रूपेणैवेति प्रमाणान्तरप्रतिपन्नानामपि पदार्थानां वाक्यार्थप्रतिपादकत्वमुक्ता
प्रतिपन्नानामेवेति विकल्पपक्षद्वयमपि क्रमेण दूषयति अदर्शनादित्यादिना श्लोकद्वयेन। तत्र प्रथमं दूषयति नहीति द्वितीयं शंकते अथान्य
त्रेति। कल्पनागौरवेण दूषयति एवं तर्हीति अदृष्टमतीन्द्रियं कार्ये त्रेयमिति यावत् गौरवं दर्शयति यदानीं तावदिति शक्तित्रयांगीकारादेकैव
शक्तिरंगीकार्येत्यर्थः। नन्वत्रापि कल्प्यशक्तिद्वयं कथमेकैवेत्याक्षिपति नन्विति तथापि शक्तित्रयकल्पनाभावाल्लाघवमस्त्येवेति परिहरति अस
त्यमेतदिति किं च शक्तिद्वयकल्पनमपि नास्तीत्याह किं च न एषा गतिरिति अन्वितपर्यन्तेति। अन्वितगोचरैव शक्तिः सान्वयपर्यन्ताभविष्यतीत्यन्वय
मंतरेणान्वितस्याभिधातुमशक्यत्वात् तत आक्षेपलभ्येऽन्वये न पृथक् शक्तिकल्पनं यथा जातिमात्रगोचरा शक्तिर्जातेर्व्यक्तिमन्तरेणाभिधातु राम०
मशक्यतया तत्पर्यन्तेत्यर्थः कथं चिच्छक्तिकल्पनास्माकमप्यन्विताभिधानपक्षे गुणमाह यद्यपीति प्रथमावगतानां प्रथमप्रतिपन्नानां अभ्यु
पेततात्पर्याणामर्थप्रतिपादनाभिप्रायेणाप्रयुक्तानां पदानामेवान्वितशक्तिर्युक्तेत्यर्थः। एवं च शाब्दत्वप्रसिद्धिरपि युक्तेत्यादित्याह यावद् ३९

त्वमपीति शाब्दत्वं शाब्दार्थत्वं तत्तथा पदप्रतिपाद्यताभावे शाब्दत्वं क्लिष्टं स्यात्स्यादित्ति किं न स्यादित्यर्थः। ननु शाब्दत्वं वाक्यार्थस्य न घटते यतः
पदार्थ एव तदाक्षेपकतया तत्र प्रथमा तांस्फुदित्यभिहितान्वयवादी शंकते नन्विति सामान्यं सर्वेकान्तकान्वययोग्यं यस्तु विशेषाक्षेपकता
सामान्यस्य ततः किं तत्राह विशेष एव हीति उक्तं विवृणोति पदार्थस्वरूपं हीति परिहरन्ति नेत्यादिना गोपदप्रतिपादितस्य पदार्थसामान्यस्य
यत्किंचिद्विशेषाक्षेप एव प्राक्किर्न तु नियत विशेषाक्षेपे पदान्तरोपस्थापितविशेषाक्षेपे तु शाब्दत्वप्रसंग इति भावः। अन्विताभिधानप
क्षे तु संनिधेरुपलक्षणत्वात्तस्य च शाब्दाधीनत्वान्नायं दोष इत्याह प्रत्यक्षेत्विति गौर्हि स्वपदेनेति एवमानयति रूपि स्वपदेनेति द्रष्टव्यं
संप्रति शाब्दोपस्थितेनान्विताभिधानेऽन्योन्याश्रयदोषं परिहरन्ति न चेत्यादिना। सर्वाणि हि पदानीति प्रथमं पदजातं श्रुतं तद्युत्सन्नि
समये सहानुभूतमनन्वितमर्थं स्मारयति पश्चात्तयोग्यतादिविमर्शे सति स्मृतान्रूढानि तान्येव पदानि पत्रस्यान्नार्थान्वितं स्वार्थम
भिदधतीति तदुक्तं प्रकरणशालिकायां पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकं॥ न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थबोधकमिति
अतो नेतरेतराश्रयदोष इत्यर्थः। प्राक्प्रतियोगिसंनिधेर्निमित्तभूतमर्थस्वरूपमिति प्राग्व्युत्पत्तिसमये प्रतियोगिनोऽर्थस्य संनि
धेः सन्निधानान्निमित्तभूतं शाब्दप्र... इति निमित्तभूतं वाच्यार्थं निमित्तभूतमिति यावत् तदेवार्थस्वरूपं स्मारयन्ति पदानि सहा
नुभूतयोरन्यतरदर्शनेऽन्यतरस्मरणं लोके दृष्टमिति भावः। यद्वा प्रतियोगिभूतस्यान्वयार्हस्यार्थान्तरस्य संनिधेः प्राग्वाच्य

४० भूतमर्थस्वरूपं स्मारयंतीति स्मरणोन प्रतियोगिसंनिधौ तदुत्तरकालं त्वमिदमितीत्यर्थः। ननु विश्वजितेत्यत्रासंनिहितेनापि स्वर्ग
कामपदेनान्विताभिधानं भवता [illegible]मिष्टं तत्कथं शाब्दसंनिहितेनैवान्विताभिधानमिति शंकते नन्विति परिहरति नेति। अध्या
हारेणाबुद्धिसंनिधानेनान्विताभिधानेन केवलं शाब्द एव संनिधिः किंतु बौद्धोपीति भावः तदेवाह नहीति अश्वशाब्दे शब्दानुप-
50 स्थितेः संवरणादिमिति तिसंक्रियत्वं विक्रियत्वामित्यादिमिरित्यर्थः शाब्दस्य संनिधेर्नियमेनानपेक्षितत्वेऽतिप्रसंगमाशंकते एवंत
र्हीति। नातिप्रसंगो नियामकसद्भावादिति परिहरति नैष दोष इति प्रमाणाभावादिति पुनराकांक्षामुत्थाप्यान्वये प्रमाणं नास्तीत्य
र्थः। शंकते कथमुभयोरिति संनिधाने सतीति न हि शाब्द एव संनिधिः प्रमाणान्तरसंनिधेरपि भवतोभिमतत्वादिति भावः पुनः
शंकते नन्वेवं विपर्यय इति शंकाद्वयं युगपदेव परिहरति न संभवतीति पुनरपि शंकते ननु तस्यापि इति। पुनरपि परिहरति तत
त्र एकवाक्यत्वावगमादिति यावंति हि पदानीति समभिव्याहृतपदानां संभूय कार्यानिरूपणमुत्पन्नेत्यर्थः पुनरन्तरमप्याह किं चेति उ एम.
रूममतमुपसंहरति तस्मादिति सिद्धांतमाह अत्राभिधीयत इत्यादिना श्लोकद्वयेन। अभिधानस्य अभिधाव्यापारो विषयः तस्मि
षाग्रहीतेन तद्विशिष्टमितिना ग्रहीतविशेषणा विशेष्ये बुद्धिरिति न्यायादित्यर्थः अत्र विशेषणांशप्रत्यायकप्रमाणांतरं च १८०
नास्ति शाब्देनैव चात्र दवगतोः शक्तिद्वयकल्पनागौरवमतः पदार्थस्वरूप एवाभिधाशक्तिर्युक्तेति निगमयति न चात्राप्याह

कंप्रमाणान्तरमिति। ननु पदानां पदार्थस्वरूपमात्राभिधायकत्वे त्वन्मते तदर्थान्वितप्रतीतेर्मूलाभावाद्वाक्यार्थप्रतीतिर्निष्प्रमाणिका
स्यादित्याशंक्याभिहितान्वयवादीतामुपपादयति नचैवमित्यादिश्लोकेन। ततएव पदार्थस्वरूपादेवाइदानीमभिहितान्वयवा
दीपूर्वपक्षिणा स्वपक्षेभिहितंदूषणमुद्धर्तुमनुवदति यद्येवमिति सामर्थ्येनपनिहन्तीति अन्योन्यमेतेनुल्योभिधानपक्षेपीतिश्लोके
नशब्दगोचरः पदगोचरः साम्यमेव दर्शयति यद्यपि गोपदार्थेनेति तयोरेव परस्परनियमइति सामान्याक्षेपक्तपदार्थसामर्थ्यलभ्यः
विशेषनियमस्त्वेकवाक्यतादिना इत्यर्थः यतो विशेषनियमस्त्वेकवाक्यतालभ्यः अतएवास्यपृथक्प्रमाणत्वमित्याह यतएवेति॥
एकवाक्यत्वस्य वाक्यार्थप्रतीत्युपयोगाभावेनुमानमात्रमेव परिशिष्यत इत्याह अन्यथेति फलितं दर्शयति तेनेति परिप्लवेरतीति
पदार्थसामान्यस्य सर्वान्वयार्हत्वादित्यर्थः असत्यामिति पदार्थसामान्यस्य संसर्गविशेषव्याप्त्यावविद्यमानायामित्यर्थः एकवाक्यता
याविशिष्टवाक्यार्थावगतिनियतनिमित्तत्वे संमतिमाह आह चेति अनियतानेकवाक्यार्थप्रतीत्युपप्लवेरतीत्यर्थः॥ अन्योन्यात्मव्यव
च्छेदात् समभिव्याहृताभ्यामन्योन्याभ्यामर्थान्तरव्यवच्छेदात् अन्वयव्यतिरेकाभ्यामन्वयव्यतिरेकाभ्यां लोके तात्पर्यमाहानुमानइति नन्वे
मावयोः साम्यमेव ननु त्वन्मते विशेषइत्याशंक्य प्रतिपादितं साम्यमनुवदन् विशेषं दर्शयति तेनेतदुक्तमित्यादिना महान्विशेषइत्यं
तेन। ननु पदार्थस्यापि वाक्यार्थप्रतिपादनशक्तिकल्पनान्तसाम्यमिति चेत्। नशक्तिमंतरेण सामर्थ्यादाक्षेपात् ननन्वेकवाक्यतायानिया

मकत्वे हि भवेदावयोः साम्यं न हि तत्क्रियामकं नियामकत्वाभावेति प्रसंगश्च नास्ति आकांक्षानाहित्यादश्रुते नान्विताभिधानाभावा
१४१ दितिशंकते अपेक्षाभावादितिश्रुते नैवान्विताभिधानमिति नियमभनंगीकुर्वतस्तवाकांक्षाया अन्विताभिधानोपलक्षणत्वांगीका
रेपि एकवाक्यताया नियामकत्वाभावे अतिप्रसंगस्तदवस्थ एवातश्चावयोः साम्येप्येवेति परिहरति नस्यात्साम्यपीति शंकोत्तरे विवृणो
ति स्यादेतदिति कस्यपाप्रइति येन वैषम्यं न स्यादिति शेषः अपेक्षाभावादाकांक्षाभावादिति ननु गोपदं स्वसामर्थ्यान्निष्टति पदोपस्थि
तेनैवार्थेनाचितं स्यात् न तु मानांतरोपस्थितेनेत्याशंका तन्मतविरोधान्नेत्याह न च पदस्य सामर्थ्यमिति इत्यत्वादिति। विश्व
जिदादाविति शेषः वैयाकरणैरपि पदान्तरसमभिव्याहारस्यान्वयनियामकत्वमंगीकृतमित्याह किंचेति इत्थं हि तदनुशासनं युगप
दधिकरणवाचिनो ईद्वइति द्वंद्वसमासः प्रतिशब्दं युगपदर्थद्वयप्रतिपादकः तस्योदाहरणं धवखदिराविति धवश्च खदिरश्चेति वि
ग्रहः तत्र धवशब्दः स्वार्थमभिधत्ते समाससहस्रानुसद्वितीयं साम्नानं लक्षयति एवं खदिरशब्दोपि तत्र केन सद्वितीयत्वमित्यपेक्षाया
मेकवाक्यताबलात्खदिरेणेवेति वक्तव्यं तद्वदत्रापीत्यर्थः वाचकत्वानभ्युपगमादिति तदभ्युपगमे हि केवलधवशब्दस्यैवोभयवा रा०म०
चकत्वादेकवाक्यताया नियामकत्वं न स्यादित्यर्थः शक्तिकल्पनासाम्यमंगीकृत्यापि दृष्टानुगुणत्वादभिहितान्वय एव ज्यायानित्याह
यद्यपीति आनन्तर्यस्य व्यवधानाभावमिति वाक्यार्थापेक्षया पदार्थानामानन्तर्यं पदानां तु व्यवधानमित्यर्थः तन्मतेप्येतदावश्यकमित्याह ४१

अन्विताभिधानवादेपीति एवमनंगीकारे दोषमाह अन्यथेति प्रथमं पदार्थस्तत्रूपावगत्यभावे पदान्तरोपस्थितेन पदार्थेनान्विता
भिधानं तदभिमतं तस्मादित्यर्थः। ननु त्वन्मते पदाभिहिताः पदार्था वाक्यार्थनिदानमस्मन्मते तु पदस्मारिताः पदार्थाः अतो वैषम्यमि
त्याशंक्याप्रयोजकमेतदित्याह तेनुतेरभिहिता इति पदानुसंधानमिति वा वाक्यार्थप्रतीतेः पूर्वस्मरणाद् इति शेषः इदानीमविवादस्थलान्त
रप्रदर्शनेनापि पदार्थप्रतीतेरेव वाक्यार्थप्रतीत्यानुगुण्यं द्रढयति किं चेति किंच त्वदुक्तयुक्तिरपि त्वद्धि प्रतीतेत्याह एतेनेति ननु पदाना
मेव बोधकस्वभावत्वात्साक्षाद्वाक्यार्थबोधकत्वं युक्तमिति तैरुक्तं तदतिप्रसंगेन दूषयति यत्विति अन्वितमनपेक्षितं अवान्तरव्यापा
र एव वाक्यार्थ इति संप्रगमाशंकते अथ तन्त्रेति तात्पर्यस्य लिङ्‌ विधिपरतात्पर्यस्यावान्तरव्यापारद्वारेणावान्तरापूर्वद्वारेण प्रवृत्तेरपित
थेत्याह तदत्रापीति ननु पदार्थप्रतीतेरेव वाक्यार्थप्रमाणत्वे पदानां वाचकत्वं तस्मात् तेषां स्मारकत्वेनापि पदार्थप्रतीत्युपपत्तेरि
तिशंकते नन्वेवमिति वादाभिस्येव केषांचित्संनिहान इत्याह भवत्वेवमिति तन्त्रतन्त्रत्थैवाचार्यस्य व्यवहार इत्याह तथा चेति भावना
यां श्रुत्यन्तरयातत्प्रतिपादको लिङादिप्रत्ययो भावनावचनः अपनेतु स्मारकत्वेनेकन्यायविरोधाद्वाचकत्वमेवेष्यतित्दाह अन्ये
त्विति प्रत्यासत्तिनिमित्तमिति अन्यथातिप्रसंगः स्यादिति भावः संबंधो विद्यत एवेति अतस्तस्य कारणत्वं युक्तमिति भावः तस्मादित्र
साधारणाद इति तस्यापि संबंधेच क्षुषानसाक्षानान्नसंनिधिमात्रं तेन्निमित्तमिति भावः चक्षुरादीनां संबंधप्रतिपादकत्वादिति न

८२ साध्यप्रतिपादनत्वयोग्यत्वादिति भावः। अन्यत्र शब्दव्यतिरिक्तस्थले इह शब्दे प्रमाणाद्यां परं पराणां नियोगमयति तस्मादिति। ननु संबंध
ग्रहणासमये योर्थो गृहीतः स एव पश्चादपि प्रतिपाद्यत इति गृहीतग्राहकत्वात् तस्मान्न कत्वमेव तेषां ननु वाचकत्वमिति शंकते गृही
परि तग्राहित्वादिति। हन्ति न गृहितेति संस्कारमात्रेति मात्रचा प्रसभिन्नाख्या वृत्तिः। ननु शाब्दज्ञानस्मरणयोर्गृहीतग्राहित्वमविशिष्टं अ
थापि स्मरणाद्विलक्षणं कुतस्तत्राह प्रत्युत्पन्नेति प्रत्युत्पन्नकारणजनितं संस्कारस्य तु तदानीमुत्पन्नेति नियमाभावात् तज्जन्यं ज्ञानं स्म
42 तिः। अयं तु सर्वोपि शाब्दप्रत्ययोनुवाद इति व्यवस्थापित इत्यर्थः। अत एवाचार्यैः शाब्दप्रत्यये स्मरणव्यवहारो व्योपचारिक इत्याह
अनुवादस्यापीति। उपचारे वीजं गृहीतग्राहित्वमुपसंहरति तेनेति। प्रतिपादितं प्रमेयजातं श्लोकमुखेन संगृह्णाति प्राथम्यमिति।
अतः प्रथमन्वितप्रतीतेः पदार्थनिमित्तकत्वाभावे पदमात्रनिमित्तकत्वे च इष्टे बाधप्रसंगेन दूषयितुमुपक्रमते किंचेत्यादिना। अभि
धानतः। अभिधा आपादेरणाद्योपाद्यन्वितप्रतीतिरिति गौणशब्देनेति शेषः। अन्वितप्रतीतेः शाब्दमूलत्वं भवतोभिमतमिति भावः। लाक्ष
णिकस्य पदस्यानन्वितत्वबोधकत्वं किं तु पदार्थस्वरूपस्मारकत्वमेव पदान्तरस्यत्वे तदन्वितपरत्वमित्युत्तरमाशंकते अथोच्येतेति।
निमित्तभूते वाच्यभूते न तु भवेन्नाममात्रकथंचिदन्वितप्रतीतिः सर्वपदलक्षणास्थले कथमिति व्युत्पत्तिर्यत्र तर्हीति तादृशस्थलं प्रश्नो
त्तरमुखेन दर्शयति अस्तिचेति श्लोकेन तदन्वितं चाभिधेयमिति तत्रैव सर्वेषां शब्दानां व्युत्पत्तिरित्यर्थः। लाक्षणिक इति सर्वेषां पदानां ८२

कार्यपरत्वादन्यत्र सिद्धार्थे लक्षणेत्यर्थः। तस्मात्सिद्धार्थस्थलेपदार्थनिमित्तैवान्वितप्रतीतिरेष्टितमान्यथेव सर्वत्रस्यादित्याह तेनाव
श्यमिति। ननु वेदे सिद्धार्थपरं वाक्यं नास्ति लोके सिद्धार्थपराद्वाक्यात्तदर्थप्रतीतिरनुमानादेव नदार्थज्ञानादिति शंकते अथतत्त्वेति
श्लोकेन सिद्धार्थेषु पदानामवोधकत्वं परेषां संप्रतिपन्नमिति पदेरितैस्तैतद्दृश्यतां परंतयामाचष्टे यथासिद्धार्थेषु नपदनिमित्तेति अनु
माननिमित्तत्वमुपपादयति वाक्यरचनाहीतिपोत्रुवेपीवाक्यरचनाविशिष्टार्थविवक्षापूर्विकावाक्यरचनात्वान्मदीयवाक्यरचनावत्
तथा विवक्षा च ज्ञानपूर्विका विवक्षात्वात् मदीयविवक्षावदन्यथा तद्ज्ञानमर्थेन अर्थस्यविवक्षानिमित्तज्ञाननत्वात् इत्येवमनुमानपरं
परया वाक्यार्थप्रतीतिर्नपदार्थनिमित्तेत्यर्थः लौकिककार्यपरवाक्यप्रतिबंधापनिहन्ति यत्रापीति श्लोकेन कार्यावगतिसंभवा
दिति कार्यान्वितवाक्यार्थावगतिसंभवादित्यर्थः ननूत्तमवृद्धेन वाक्ये प्रयुक्ते मध्यमवृद्धस्य वत्सयमं विशेषार्थपरे स्यातेन वाक्ये
न तमर्थमवबुध्य यस्मात् कुतश्चित्कारणादनाम्नत्वशंकायां तमेवार्थमनुमानपरंपरया विनिश्चिनोतीति तेन पदानां वाचकत्वशक्ति
पुरस्सरमेवानुमानात्कार्यपरपदानामन्वितपरपदत्वमंगीकर्तव्यमिति प्रतिवंदीमोचनमाशंकते अथोच्येत इत्यादिना श्लोके
ना। असौ वाक्यार्थो नान्यः अवाच्यभूतोन्योर्थः विशिष्टार्थविषयवाक्यदर्शनेन वाक्यश्रवणेन च वृद्धस्य माणस्य प्रवर्तमानस्य मध्य
मवृद्धस्य तद्विषयमेव विशिष्टवाक्यार्थविषयमेवं तत्सत्त्वमिति प्रथममिति शेषः वाक्यमाशतविशिष्टार्थतात्पर्यशम्यान् अत्

वाकस्य विशिष्टार्थपरत्वं तच्चाविगीतमध्यमवृद्धस्य चेष्टातो ज्ञानमुत्पद्यतां पश्चादनुमानप्रवृत्तिः कुतः अन्वितपरत्वं च कथ
८३ मित्याशंक्याह विशिष्टवाक्यार्थप्रतिपादके नेति वक्तुरनुमायेति अनाप्तत्वशंकायां सत्यां पश्चादनुमापेत्यर्थः अतो विवक्षानुमा
नानन्तरं अस्तु वाक्यस्य विशिष्टार्थपरत्वं पदानामन्विताभिधायित्वं कुतस्तत्राह तच्चेति अन्वयव्यतिरेकाभ्यामावापोद्वापाभ्यां भा
गशः भागानां पदानामित्यर्थः तर्हि त्वदुक्तप्रयेवनीत्यास्मन्मतसिद्धिः स्यादित्याह यद्येवमित्यादि श्लोके न विज्ञानमुपजायत इति पदा
43 नां वाचकत्वशक्त्या प्रथमं वाक्यश्रोतुरिति शेषः तदनन्तरं त्वदुक्तप्रयेवनीत्या तदेव ज्ञानं कुतश्चित्कारणादनाप्तत्वशंकायामनुमा
नेन स्थिरीक्रियत इत्याह तच्चेति अनुमानं तु न वाक्यमात्रात् किं तु विशिष्टवाक्यादित्यादित्याह विशिष्टवाक्येन चनयेति स च विशे
षो वाचकत्वशक्त्येत्याह वाक्यस्य चेति ततः किं तत्राह तेनेति अभ्युपगन्तव्यमिति अस्मन्मते तु विशिष्टार्थपरत्वमविवादमेवं त्वया
प्येतदंगीकार्यमनुभवसिद्धत्वात् तत्र पदार्थस्य द्वारत्वे वत्तव विवाद इत्यर्थः अस्त्वेवमेतावता त्वदभिमतसिद्धिः कुतस्तत्राह तत्रे
ति अतादृशो अन्विते सिद्धेर्थे पदार्थद्वारेणोवेति पदानां स्वस्वार्थवाचकत्वं पदार्थानां तु संसर्गबोधकत्वमित्यभ्युपगन्तव्यं अतो मि रम •
हितान्वयसिद्धिरित्यर्थः ननु पदे सिद्धार्थेषु वाक्येषु पदानां वाचकत्वमंगीक्रियेत तदा त्वदुक्तप्रणाल्या त्वदभिमतसिद्धिः स्यात् किं तु
पदानां केवलं स्वस्वार्थस्मारकत्वमेव ततः परमन्वितप्रतीतिः केवलानुमानादेव सिध्यतीति शंकते यद्युच्येतेति विशिष्टानु ८३

मानसंभवात् विशिष्टवाक्यार्थानुमानसंभवात् अनुमानप्रकारमेवाह तथाहीति पार्थिवो गच्छतीति वाक्यप्रयोक्ता पदार्थसंसर्गज्ञान
वान् आप्तत्वे सति प्रयोक्तृत्वात् इत्यनुमानेन पदार्थसंसर्गज्ञानानुमानं सिध्यतीत्यर्थः अस्त्वेवमेतावतान्वयनिर्णयः कुत इत्यत्राह एवमं
तरेणापीति पदानां पदार्थप्रतिपादकत्वं पदार्थनामन्वितप्रतिपादकत्वमंतरेणापीत्यर्थः पदार्थैर्निमित्तं वाक्यार्थस्येति पदैः स्वस्वार्थेषु
स्मारितेषु केवलानुमानेनैव तत्संसर्गज्ञानानुमानमतः पदार्थनिमित्तत्वान्नाभिहितान्वयसिद्धिरिति भावः तर्ह्येनैनैवमाद्येन कार्यप
रेपि वाक्ये पदानां स्वस्वार्थमात्राभिधायकत्वं संसर्गबोधस्तु केवलमनुमानादतोन्वितपरत्वं पदानां न सिध्यतीति दूषयति एवं तर्हीति न्याय
मार्गममेव दर्शयन् श्लोकं व्याचष्टे गामानयेत्यादिवाक्येष्विति तदितिसंबंधबोधः कुत इत्याशंकायां लट् उक्तरीत्यानुमानादेवेत्याह विनापीति अनुमा
नप्रवृत्तिस्तु पूर्ववद्द्रष्टव्या किंच कार्यपरेषु लौकिकवाक्येषु वक्तृसमवेतस्य वाक्यार्थसंसर्गज्ञानस्यानुमानगम्यत्वेन्वितवाचकस्य शब्दस्य स्वरू
वाक्यस्य पवाचित्वमपि त्वदभिमतं न सिध्यतीति सर्वस्यापि वैयर्थ्यात् नैनैव व्याप्तिग्रहणाद्देवदत्तसंभवात् तन्मात्रं न सिध्यतीति प्रतिपादयितु
मुपक्रमते किंच स्वरूपमात्रमपीत्यादिना अभिधेयमिति स्वरूपमप्यनुमानेनैव प्रतीतेस्तत्र शब्दशक्तिकल्पनमयुक्तमित्यर्थः प्र
लितं दर्शयति अर्थस्वरूपवाचित्वमिति श्लोकेनैनन्विंता वदस्मन्मतस्थितिः वृद्धव्यवहारेपि सर्वपदानां वाचकशक्तिग्रहः तथाहि प्रथ
मं तावद्गामानयेत्युत्तमवृद्धेन वाक्ये प्रयुक्ते परवा मध्यमवृद्धः प्रवर्तते पार्श्वस्थो व्युत्पित्सुस्तावदेवं निश्चिनोति अस्य प्रवृत्तिर्ज्ञानपूर्वि

कापव्रत्तित्वात मदीयप्रवृत्तिवदिति तच्च ज्ञानं शाब्दजन्यं शब्दानां तत्र भावित्वादिति तत्र च शब्दानां प्रवृत्तिविषयवाक्यार्थज्ञानेजन
४४ कत्वं वाचकत्वशक्त्यैव नान्यथेति वाचकत्वशक्तिं वाक्यस्य सामान्यतो निश्चिनोति पश्चादावापोद्वापाभ्यां वाक्यावयवानां पदाना
मन्विते शक्तिं निश्चिनोति इत्थं व्युत्पन्नेषु पदेषु कदाचित्कस्यचिदयथार्थवाक्यरचनामुपलभ्य सर्वत्र व्यभिचारशंकया वाचकशक्ति
55 प्रतिबंधे सति लौकिकवाक्ये विषयमनुमिनोति अस्य वाक्यरचना वाक्यार्थज्ञानपूर्विका आप्तवाक्यरचनात्वादिति तथा तत्र ज्ञानं अ
र्थाव्यभिचारिज्ञानत्वादिति इत्थं पूर्वं शब्दशक्तिप्रतिपन्नं पश्चात्कुतश्चित्कारणादनुमितं तमेव वाक्यार्थं पश्चात्तदेव वाक्यमनुवदती
ति तत्र शब्दानां वाचकशक्तिः स्वाभाविकोपपश्चादनुमानेपि न हीयते। अतोऽर्थात्स्वरूपवाचकत्वमस्त्येव अतो वाचकत्वात्प्रामाण्यं
च स्वरसत एव सिध्यतीति शंकते स्यादेतदित्यादिना तस्य मध्यमवृद्धस्य कल्पने व्युत्पत्तेरिति शेषः विचिकित्स्य विचार्य अवधान
यतीति व्युत्पत्तेरनुषङ्ग इति शेषः अनेन मध्यमवृद्धेनायं वक्ता उत्तमवृद्धः निश्चितवानिति कल्पयतीति प्रथमं वाक्यार्थप्रतिपन्नमर्थं
पश्चात्कुतश्चित्कारणाद्व्यभिचारशंकायामाप्तत्वनिश्चयपूर्वकमनुमानरूपादेव वाक्यान्मध्यमवृद्धो निश्चितवानिति व्युत्पत्तेः क रा म०
ल्प्यतीत्यर्थः तत्र तावत्स्वयमप्रतीता शब्दानां वाचकत्वशक्तिर्भातीति वक्तृज्ञस्य वाक्यार्थप्रतीतिरप्यव्यभिचारशंकाकलंकित
त्वान्मिथ्यात्वं मते हि केवलमनुमानाज्जायते अतः पदानां वाचकत्वं दुर्घटं वेदप्रामाण्येपि दूरम् इति दूषयति नैतत्सारमिति श्लोके ४४

नष्टान्नेरिति पंचमीभ्रांतिनिमित्ता तज्जनितेत्यर्थः न हि प्रयोज्यवृद्धस्येतिशाब्दानंतरं भाविनी प्रयोज्यवृद्धस्य वाक्यार्थविषया प्रतीतिः तिर्यग्दि
क्प्रसितस्तु नाकेवलवाक्यजन्येति निश्चितास्तत्तद्वाक्यस्य तत्र शक्तिं कल्पयेत् न त्वेवं किं त्वनुमानरूपादेव वाक्यात् तस्मान्न शब्दस्य श
क्तिकल्पिकेत्यर्थः अतिप्रसंगादिति । वृद्धशब्दजन्यप्रतीतिः ब्रह्मशब्दस्य शक्तिं कल्पयेदित्यर्थः न स्यादनवस्थयामनुमानप्रवृत्तेः पूर्वा
वस्थायां भ्रान्तकारणाजन्यप्रतीतेर्भ्रान्तत्वे दृष्टान्तमाह धूमायमाने इति नन्वपूर्वं वाचकत्वशक्त्या प्रतिपन्नः पश्चाद्व्यभिचारशंकया शक्तिप्र
तिबंधे सत्यनुमितः पुनरपि शक्त्युद्बोधे सतीति न वाकेनानूद्यते अतो वाचकत्वमंगीकर्तव्यमिति शंकते अथानुमितमिति दूषयति त
न्नेति पूर्वं शक्तिनिमित्ता प्रतीतिः स्वाभाविकी चेत् तर्हि पश्चादन्यानुवादः स्याच्छान्तु भ्रान्तेस्तु क्रमतः प्रमाणान्नास्तीत्यर्थः नन्वर्थप्रतीत्यन्य
थानुपपत्त्यानुवादकत्वं कल्प्यत इत्याह नन्वयत्वनुवादकत्वमिति अर्थप्रतीतिरीत्यानुमानिकीति भावः ननु वाचकत्वाभावेऽनुमानप्रवृत्तिरेव
न स्यात् न हि वाक्यात् किंचित् ज्ञानमनुमीयते अतिप्रसंगात् किंतु वाक्यार्थज्ञानं अतोऽनुमानप्रवृत्त्यर्थं वाचकत्वमंगीक्रियतामित्य
त्राह यदि परमिति ज्ञाने विशेषे तौ वेति मूलस्य वह्निर्वगोपदस्य साक्षात्वव्याप्तिज्ञाने नेत्यर्थः प्रतिपादितमर्थं निगमयत्यपत्स
सिद्धं परिशेषयति तस्मादिति अतो वेदप्रामाण्यसिद्ध्यर्थं लौकिकवचसामनुमानवेषमन्तरेणास्वतो वाचकत्वमंगीकर्तव्यमित्यर्थः
ननु वेदप्रामाण्यसिद्ध्यर्थं वाचकत्वमंगीकर्तुं न शक्यते तत्प्रामाण्यस्य वाचकत्वं प्रत्यनुपयोगात् अत तत्र तत्प्रामाण्यमस्तु मा वा वाच

४५ कत्वे तु प्रमाणांतरं वक्तव्यं तच्च नास्ति अर्थप्रतीतेस्तत्तदुक्त्या नित्या केवलमनुमानं न तथा संभवात् अतोनुमानं निराकुर्वतस्तवापि मते
नुमानतयैवार्थप्रतीतिसंभवाद्वाचकत्वं न संभवतीति प्राभाकरः शंकते ननु मा वा भूदिति लिंगरूपादेवास्तु वाक्यादर्थप्रतीतिमसिद्धं ततस्त
वैव मते वाचकत्वासिद्धिः आम्नातानाम्नातसाधारण्येनार्थप्रतीतिमसिद्धं ततो मम मते तु लिंगाभावे प्यर्थप्रतीतेर्वाचकत्वशक्तिरस्त्येवेति भा
वः प्रतिहन्तिस्मादेतद्वेति श्रुतो श्रवणे सतीत्यर्थः उत्सनुमर्हतीति विप्रलंभकवाक्यस्यार्थप्रतीतिमूलत्वाभावादित्यर्थः अनुसंतिं प्रचक्ष
त इति अनाम्नातवाक्यानामनाम्नाभेदाग्रहात्प्रत्यायकत्वव्यवहारमात्रं न तु प्रत्यायकत्वमिति त्वन्मतस्थितिरित्यर्थः ननूभयविधस्यापि वाक्य
स्य वाचकत्वे त्वन्मते आम्नातानाम्नातवैषम्यं कुतो प्रपद्यत इत्यत्राह। एतावानिति श्लोकं व्याचष्टे अनन्यमनस्कानामिति अनन्यमनस्का
नामित्यादिविशेषणोपादानेनानुसंधानेनास्तीति दर्शयितुं वाक्यश्रवणसमनंतरभाविनी विशिष्टमध्यमवृद्धस्य चेष्टामुपलभ्या
न्वितप्रतीतिस्तन्मूलतया कल्प्यते संप्रति त्वन्मते सैव न घटत इति वक्तुमुपक्रमते अस्तिहृत्वादि इति श्लोकं व्याचष्टे स्यादेतदिति अनेकां
तिकत्वादिति यायाविशिष्टार्थगोचरा प्रवृत्तिस्या विशिष्टज्ञानपूर्विकेति व्याप्तिर्नास्तीत्यर्थः व्यभिचारस्थलमाहस्याहीति इदं रजतमित्य
त्र शक्तिग्रहणानंतर स्मरणरूपं ज्ञानद्वयं न तु विशिष्टमेकं ज्ञानमस्ति प्रवृत्तिर्ग्रहणस्मरणयोर्भेदाग्रहणनिबंधनेति त्वन्मतमिति भा राम०
वः स्वरूपमात्रेणाभिहितेषु स्वरूपमात्रेण प्रतीतेषु अन्वयाग्रहणात् तत्र तु न्यामथीनामिति शेषः अनन्वयाग्रहणमपि भेदाग्रहणप्र ४५

भेदस्यैवं ननु गामानयेत्यत्र प्रवृत्तिमूलान्वयप्रतीतिरित्येवं तत्कथमनन्यथाग्रहणनिबंधना प्रवृत्तिरित्यत आह यो हीति पुरःस्थितवस्तुगो
चरं शुक्तिगोचरं रूप्यकारणानुपलब्ध्या रूप्यकारणमिंद्रियार्थसंनिकर्षः तदनुपलब्ध्या वा नहि चक्षू रजतसंयुक्तं किंतु शुक्तिसंयो
गि अतो न रजतज्ञानमैंद्रियजं किंतु स्मरणानुपमितिभावः अपकृष्टशुक्तिगोचरं न भवतीत्युपलक्ष्य अन्यथाभ्रांतस्थले प्रवृत्तिहेतुत्वमि
त्यस्य कल्पयतीत्यनेनान्वयः अदृष्टकल्पनाविशेषेपीति भेदाग्रहणस्य प्रवृत्तिहेतुत्वमन्यथा दृष्टं तत्कल्पनांगीकारेपीत्यर्थः॥ अवग
त्यनुसारि अनुभवानुसारिकल्पयिता अभंगीकृत्य। स कथं रूप्यप्रवृत्तिहेतुभावेपीति शुक्तिकारजतस्थले प्रवृत्तिहेतुत्वं त्वन्मते रूप्य
मित्यर्थः। अनैकान्तिकाव्यभिचारिणा तत्कारणत्वेनान्वितसंवित्कारणत्वेन। अन्यथा रूप्यमपीति मध्यमवृद्धप्रवृत्तिस्थले हि वाक्यप्रयो
गित्वस्यान्वितसंविन्मूलत्वं कल्प्यते अन्यत्र तवापि न रूप्यमिति भावः सामर्थ्यं शब्दसामर्थ्यं ननु गामानयेत्यत्र प्रवृत्तिर्भेदाग्रहनिबंधना अ
विसंवादित्वादिति शंकते तद्युच्येतेति अनैकान्तिकत्वेन दूषयति तदयुक्तमिति सैवेयं ज्वालाद्यसंजातमिति प्रवर्त्तमानो न विसंवाद्यत इत्य
तइत्यर्थः। अथापि भेदाग्रहनिबंधनेपि त्वन्मतमर्य्यादापातिकसंवादस्थलोदाहरणं तत्र परं श्लोकद्वयं पठति विधूमेति अप्रामाण्यं वेदस्य
वाक्यार्थप्रतीत्यादिति अन्वितार्थप्रतीत्यादित्यर्थः इदं त्वदंगीकृतयुक्तिकलापविरोधादन्विताभिधानं त्वन्मत एव विरूद्धमस्मन्मते कथंचि
त्संभवति तथापि प्रबलयुक्तानां तत्र विरोधादनुपपन्नमिति दूषयति तदेवमिति दृष्टबाधादिति दृष्टबाधोत्र दीर्घतरवाक्यशब्दानामनुसंधानेप्य

४६ र्थानुसंधानमात्राद्वाक्यार्थप्रतीतिदर्शनात्तद्विरोधः नतु कथं शक्तिकल्पनागौरवं मतद्वयेपि शक्तिकल्पनासाम्यादिति प्रभाकरस्या-
क्षिपति कथं पुनर्नित्यादिनाभवतोन्विताभिधानमनंगीकुर्वत इति यद्यप्यन्विताभिधानमस्मन्मतविरुद्धं तथाप्यस्मन्मतदूषणाभि-
निवेशादनभिमतमपि बलादंगीकुर्वतो भाट्टस्येति शेषः। ननु पदप्रतिपादितेनान्विताभिधाने द्वारमित्यादावेकपदप्रयोगे कथं त्वन्मतेन्विता-
भिधानमित्याशंक्य तत्राप्यध्याहृतपदप्रतिपादितेनान्विताभिधानं घटत इति परिहरति नन्वेवमिति भवन्मतइत्यनेन भाट्टमते अध्याहृतपद-
५६ प्रतिपादितेनान्विताभिधानं गुरुमतेतु बुद्धिसन्निहितेनेति सूचितं परिहरति उच्यत इति क्लृप्तमिति पदार्थानामेव परस्परान्वयार्हत्वा-
न्तत्सामर्थ्यं क्लृप्तमित्यर्थः। नियमकल्पनादिति अक्लृप्तकल्पनात्क्लृप्तकल्पना क्लृप्तस्यैव नियमकल्पनं लघीय इत्यर्थः।
अक्लृप्तमिति। स्वरूपाभिधानसामर्थ्यमुभयवादिसंप्रतिपन्नं अन्वितत्वसंप्रतिपन्नमित्यर्थः। एकवाक्यतयेति एकवाक्यतापान्नियाम-
कत्वमधस्तादुक्तं। श्लोकोव्याचष्टे पदानां तावदिति पदार्थस्वरूपे शक्तिकल्पनमित्यन्विताधानेपि स्वरूपाभिधानस्यावर्जनीयत्वादित्य- राम०
र्थः। पूर्वपक्षोक्तं दूषणमनूद्य परिहरति पदैरिति तर्हि कीदृशस्य सन्निधिरपेक्षितस्तत्राह स्वाभिधायकेति स्वाभिधायकेन पदेनैकवाक्यभूत-
यत्पदान्तरं तदधीनः प्रयुक्तं वाध्याहृतं वा पदसंदानं तदुपस्थापितः स्वसन्निधिंगमित इत्यर्थः। पीनो देवदत्तो दिवा न भुंक्त इत्यत्र रात्रिभोजन- ४६
मेवानुपपत्तिशांतये कल्प्यते न तु रात्रौ भुंक्त इति वाक्यं इति प्रभाकरः। तत्रापि वाक्यमेव कल्प्यं श्राद्धोत्ताकांक्षाशब्देनैव परिपूर्यत इति

न्यायादितिभाष्यः तत्रपतः इशब्दोपस्थापितस्यैवान्वयांगत्वमतः कृतार्थापत्तेः शाब्दगोचरत्वमितिसूत्रस्थमित्याह यत इतिशब्दस्यैवकल्प
नादितिविश्वजिदधिकारतो स्वर्गकामपदमेवाधिकारिसमर्पकंकल्पितमित्यर्थः। अतएवास्मन्मतेशाब्दविकाररूपऊहोपियुक्त इत्याह
तथाचेति अग्नयेत्वाजुष्टंनिर्वपामीतिप्रकृतावाम्नातोमंत्रः सौर्ययागेप्यतिदिष्टः तत्रमंत्रप्रकाश्याग्न्यभावादग्निपदेनिवृत्तेसूर्यादिपदा
ध्याहारादूहसिद्धिरुपपन्नेत्यर्थः। अन्यथाअशब्दोपस्थितस्यान्वयांगत्वाप्रामाणिकं निगमयति आस्तांइति इदानीं पक्षद्वयेप्येकार्थेष्वने
कार्थेषुचपदेषुशक्तिकल्पनासाम्येपिपर्यायपदप्रयोगेषुस्वमतेशक्तिकल्पनावैषम्यंदर्शयितुमुपक्रमते पर्यायपीत्यादिनासामर्थ्येशक्तिः
अपूर्वमप्रत्यक्षंपर्यायेषुवैषम्यंपश्चाद्दर्शयितुकामः प्रथममन्यत्रसाम्यमाह तथाहीति द्वेशक्ती इति अन्विते अन्वयेचेत्यर्थः विदे
भीतकें वनादित्रयमितिविदेवनवि[illegible]दिया एपस्तशब्दार्थः प्रत्यर्थमिति अक्षेदीव्यति अक्षमारोहति अक्षेपश्यतीत्यादिष्वर्थेष्वित्यर्थः। इत्य
मन्यत्रसाम्यमभिधायपर्यायेषुवैषम्यमाह यत्रतुबहवः शब्दाइतिप्रतिशब्दंशक्तिद्वयकल्पनात्सद्विशक्तयः स्युरितिपाणिनासक्तेकदेशा
प्रहरतिहस्तेनादत्तइत्यत्रत्रयाणांशब्दनामन्वितेन्वयेचशक्तिकल्पनेषट्शक्तयः स्युरित्यर्थः। एवमेकार्थवाचकेषुचतुःपंचादिपर्यायेष्वयंन्या
योद्रष्टव्य इत्याह एवंचतुःपंचादिष्वितिचतुर्षुशक्तित्रयाधिकामिति अन्विताभिधानपक्षेशाब्दचातुर्विध्यात्प्रत्येकंशक्तिद्वयकल्पनाद्याष्टे
शक्तयः अभिहितान्वयपक्षेतुशब्दचातुर्विध्याच्चतस्रः अर्थैकाद्देकेतिपंचशक्तयइतिशक्तित्रयाधिकं कथंचित्साम्यांगीकारेपिपूर्व

प्रतिपादितं दूषणमपि कमित्याह शक्तिकाल्पनायां तु लाघवेपीति निगमयति तस्मादिति स्वमते सूत्रभाष्यानुगुण्यमप्याह तथा चेति । अ
४१ र्थस्य वाक्यार्थस्य तन्निमित्तत्वात् वाक्यार्थनिमित्तत्वात् संप्रति भाष्यव्याख्यानपरां गुरुटीकां पठति दूषयितुं यत्तस्येति व्यतिषक्तमभिधा
47 यि अभिहिताभिधायि सा टीका पंचिकायां दृष्टान्तपूर्वकं प्रपंचिता तामाह तस्यतावदिति यथैवाकृतिरित्यस्य तथैवान्विताभिधायिने
ति अनेन न प्रतिसंबंधिनान्वयः शब्दजन्यप्रतीतिगोचरो व्याकृतिवच्छब्दप्रतिपाद्यापीत्यर्थः । आकृतिसाम्यं कुतस्तत्राह आकृतिप्रत्यय
इति ननु जातेव्यतिशरूढा व्याख्यातव्यक्तिस्तु पश्चात्तज्जात्या प्रतीयतां तथा पदार्थ एव पदप्रतिपाद्यः वाक्यार्थस्तु पदार्थगम्यः स्यादित्या
ह न हि तत्रेति तत्र तयोर्मध्ये कुतो न प्रयुक्तमित्याशंक्य किं शब्दप्रतीताचाकृतिर्व्यक्तौ प्रमाणमस्ति न वेति विकल्प्य द्वितीयविकल्पस्तावद
संभवपराहत इति मत्वा प्रथमविकल्पे दूषणमाह केवलापीति प्रसक्तेः शब्देन प्रतिपादयितुं कुतो शक्यत्वं तत्राह स्वभाव इति स्वभाव
मेवोपपादयति रूपं हीति न हि निराश्रयाशुक्लप्रतीतिर्दृष्टेति भावः ततश्च जातिव्यक्त्योर्निमित्तनैमित्तिकभावः प्रत्याय्यप्रत्यायकभा
वः औपचारिक इत्याह तस्मादिति उक्तमेवार्थं पुनः प्रश्नोत्तरमुखेन प्रथयति । तत्कस्य हेतोरिति अभिधाव्यापारेण प्रतिपादयति राम ।
प्रत्याय्यप्रतिबोधयति च अयं भावः । उभयोः शाब्दत्वे सत्यपि जातिरेवाभिधेया व्यक्तिस्त्वाक्षेपगम्या अनन्यलभ्यः शाब्दार्थ इति न्याया
त न तत्र शब्दव्यापार इति दृष्टान्तसाम्यं दार्ष्टान्तिके दर्शयति तथान्विताभिधायिनेति अत्रेत्यं दृष्टान्तिकभावोभ्युपगन्तव्यः जाति ४१

चकः शब्दो जातिव्यक्तिं च युगपदभिधत्ते अत उभयोरपि शाब्दत्वं शाब्दत्वे सत्यपि जातेरेवाभिधेयत्वं व्यक्तेस्त्वाक्षेपगम्यत्वं अथापि य
था जातिप्रत्ययो व्यक्तिप्रत्ययस्य निमित्तमिति व्यवह्रियते । एवं सर्वेषां शब्दानां अन्वितेषु त्पत्तिर्युगपदन्वितान्वयात् शाब्दत्वं शाब्दत्वे
सत्यप्यन्वितस्याभिधेयत्वं अन्वयस्यावगम्यत्वं अथाप्यन्वितपदार्थप्रत्ययोऽन्वयेनिमित्तमिति भाष्यमपि श्लोकार्थपरमित्याह भाष्ये
चेति अभिहितान्वयस्य युक्तियुक्तत्वोपपादनेनान्विताभिधानस्य तदभावादेवं व्याख्यानमयुक्तमिति दूषयति सेयमिति प्रत्यक्षान
नुगुणाइदं व्याख्यानं पूर्वापरविरुद्धं चेत्याह अन्वितप्रतिपत्तेरिति अतोऽन्वितप्रतिपत्तेः पदार्थो मूलमिति प्रतिपादनपरमिदं भाष्य
मुपपन्नमित्यर्थः । अत्र भवतान्वयमूलपरतया भाष्यं व्याख्यातं तत् दनुपपन्नमन्वयमूलस्याक्षिप्तत्वादित्याह अभ्युपेत्येति दृष्टांतं
विघटयन् प्रथमं तावच्छाब्दत्वं व्यक्तेर्विघटयति यत्विति असमर्थत्वादशक्तत्वादतिप्रसंगादिति वृक्षशब्दात् लक्षप्रतीतिः स्यादित्य
र्थः । ननु नातिप्रसंगः व्यक्तावपि शब्दस्य शक्तिः स्यादित्याशंक्य तदानीं जातिवद्व्यक्तेरप्यभिधेयत्वं स्यात् न तत्संभवतो निष्टमित्याह
अथ व्यक्तावपीति ननु न जातिवद्व्यक्तिरभिधेया तत्र स्वाभाविकशक्त्यभावात् तथापि जात्यभिधायकस्य शब्दस्य व्यक्तिप्रतीतिमंतरे
ण तदभिधानासंभवात्तदभिधायकत्वसिद्ध्यर्थमन्येव शक्तिः कल्प्यते सा च नाभिधाशक्तिः तथापि केवलमाक्षेपात्प्रतीयते अतो नाभि
धेयत्वे केवलं शाब्दत्वमेवेति शंकते यदि तु यत्नेति दूषयति तदयुक्तमिति प्रमाणाभावादिति जातिमात्रमभिधेयं व्यक्तिस्तु नाभिधे

येऽस्यत्र प्रमाणं नास्तीत्यर्थः। प्रमाणाभावमेवोपपादयति यदि हीति शाब्दप्रतीतिगोचरता विशेषाज्जातेरेवाभिधेयत्वं व्यक्तेस्त्वाक्षेपग
४८ म्यत्वमिष्येत तदप्रमाणमित्यर्थः॥ ननु जातावेव शब्दस्य शक्तिः व्यक्तिस्तु जातिस्वभावात्सह प्रतीयतामित्यत्राह अथ न व्यक्तावितिदूष
यति तत्रेति यदि व्यक्तौ शक्तिर्नास्ति तत तत्प्रतीतेः कारणं नास्तीत्यर्थः ननु जातिप्रतीतिः कारणं स्यादित्यत्राह अप्रतीयमानयेति व्यक्ति
प्रतीत्यभावे जातेरेव प्रत्येतुमशक्यतया सापि न कारणमित्यर्थः। ननु व्यक्तिप्रतीत्यन्यथानुपपत्त्या यत्किंचित्कारणं कल्प्यं तत तत्र कथं
कारणाभाव इत्याक्षिपति कथं व्यक्तिप्रतीतेरिति तत्र कारणं भवतु द्वौ वा जातिप्रतीतिर्वेति विकल्प्याद्यं प्रत्याह शब्दस्येति जातावेव श
48 ब्दशक्तिः न व्यक्तौ गोत्वादिति भावः। द्वितीयं प्रत्याह जातिप्रतीतेश्चेति ततः पूर्वं व्यक्तिप्रतीतेः पूर्वं न हि निराश्रया जातिः प्रतीयत इत्य
र्थः किमित्याशंक्य तत्र सात्वपाजातेः प्रथमं व्यक्तिप्रतीतेः पूर्वं प्रतीतिरंगीकार्येति तत्त्वस्सहप्रतीतिस्त्वदभिमता नसिध्यतीत्याह तेनेति
न ननु पूर्वापरगतिरसंभवः केवलायाः प्रत्येतुमशक्यत्वात् अतः सहप्रतीतिरेवास्त्वादित्याक्षिपति नन्वस्त्वाविति एवं तर्हि त्वन्मते जातिप्रती
तिरेव न स्यादिति दूषयति एवं तर्हीति अप्रतीतिमेवोपपादयति व्यक्तिस्त्वावदिति दूषणमुपसंहरति तस्मादिति यतो जातिव्यक्त्योः शा
ब्दत्वं सहप्रतीतिः प्रत्याय्यप्रत्यायकभावश्च न संभवति तस्माज्जातिरेव शब्दात्प्रतीयते व्यक्तिस्तु पश्चादाक्षेपतः प्रतीयत इत्यंगीकार्य राम
मित्यर्थः पूर्वोक्तदूषणमुपसंहरति रूपशून्या चेति वाधेये दाक्षिपेत शैत्यादिवदित्यर्थः इदानीं जातेरेवाभिधेयत्वं व्यक्तेस्तु केवलं शाब्द ४८

त्वमंगीकृत्यापिदार्ष्टांतिकेतद्दूषणमाहभवतुवेति अर्थोतद्रूपाविलक्षणात्स्वभावात् अन्यत्वभेदवादिनस्तवमतेतुनितरांविलक्षणात्स्व
भावात् अतोपर्यवसानाशक्तिमंतरेणापिसाप्रतीतिसर्हेतिवक्तुंनयुज्यतइत्यर्थः।तदेवोपपादयतिनहीतियथान्वयवत्वेनैवान्वितमित्य
न्वितानुप्रतिपत्तोन्वयःनैवंजातिशरीरानुप्रविष्टाव्यक्तिः अतोजातेरभिधानेपिव्यक्तेरभिधानमंतरेणान्विताभिधानंयुज्यतइत्यर्थः।
तत्राविशक्तिःकल्पनायेति अन्यथातत्प्रतीतिरेवनस्यादित्यर्थः।ननुभाष्येन्विताभिधायीशब्दइत्यादिव्यवहारेषु अन्वितशब्देनपदा
र्थस्वरूपमुपलक्ष्यतत्रैवशब्दस्यशक्तिःकल्प्यते अतोनगौरवमित्याशंक्यातर्ह्यन्वयप्रतीतिःत्वन्मतेनिर्मूलास्यादित्याह अथान्वितश
ब्देनेति अन्वयमनभिधायापिपदार्थस्वरूपमभिधातुंशक्यतइत्यन्वयः।ननुननिर्मूला अपर्यवसानाल्लभ्यतइत्याशंक्यदूषयतिनही
तिपदार्थस्वरूपस्यपृथक्प्रतीत्यर्हतयानापर्यवसानंलभ्योन्वयइत्यर्थः अन्वयस्यापर्यवसानंदृष्टांतावष्टंतावष्टंतेनाशंकतेननुय
थाजातिरिति अतोस्यार्थेनापीति अभिभवतिविषयीतीनांसर्वत्रान्वययोग्यत्वादित्यर्थः।नाभिधेयत्वमिति अतोनशक्तिकल्पनागौरव
मित्यर्थः।परिहरतिसत्यमितिनहियेनकेनचिदन्विताभिधानंतदभिमतंकिंतुशब्दसंनिहितेनबुद्धिसंनिहितेवातत्तुनशक्तिमंतरेणासि
ध्यतीत्यर्थः।महापक्षंतंनिगमयतितस्मादितिएवमपिभाष्यानुगुण्यंनास्तीत्याक्षिपतिकथंतर्हीतिविशेषकःद्वितीयार्थस्यकर्मत्वस्य
विशेषः।विशेषकत्वंचप्रकृतिप्रत्ययार्थयोरन्वितत्वेसंभवतीत्यर्थः।भाष्यमस्मत्पक्षएवानुगुणंनत्वत्पक्षइतिपरिहरतिभवत्वसे

३१

चेति॥ प्रकृतिप्रत्यययोर्विशिष्टान्विताभिधानमितरेषां तन्निषेधपरमित्यर्थः। अतः पूर्वं भाष्यानुगुणमिदं भाष्यमेवं व्याख्येय
४९ मित्याह तेनेति प्रकारान्तरेणेदं भाष्यं व्याचष्टे पदेति प्रकृत्यर्थानुरक्तः प्रकृत्यर्थसंबन्धः तत्रान्वयेति यद्यपि प्रकृतिप्रत्ययाभ्यां स्वस्वार्थो
विभागेन प्रथममभिधीयते तथापि पश्चाद् द्वाभ्यां स्वस्वांशे शक्तिग्रहजन्यो वैशिष्ट्यं प्रकृतिप्रत्ययसमभिव्याहारगम्यम
वशिष्यत इत्यर्थः अनुरागांशे वैशिष्ट्यांशे प्रथममविभागेन प्रतिपन्नस्य पश्चात्करणविवेचने दृष्टान्तमाह यथेति ग्रहणांशस्ये
49 दमंशस्य स्मरणांशस्य तदंशस्य विशेष्यांशस्य दृष्टशून्यं भूतलमित्यत्र भूतलांशस्य विशेषणांशस्य शून्यांशस्य उक्तार्थानुकू
लतया चार्यश्लोकान् पठति आह चेति सहेति यदिति वैय्याकरणानुशासनमिति शेषः। प्राधान्येन प्रत्ययार्थप्राधान्येन तदेव विवृ
णोति पाकमिति जिनेकस्य कस्य विदिति समभिव्याहारव्यतिरेकेणान्यस्य प्रकृतेः प्रत्ययस्य वा न वाच्यः। मत्वर्थीयप्रत्ययानां स्वान्वि
तएवार्थेऽनुशासनादन्विताभिधायित्वं युक्तमित्याह मत्वर्थीया त्विति विशिष्टाभिधायित्वमेवोपपादयति नहीत्यादिना दण्डीत्यत्रैव
प्रकृत्या दण्डमात्रमभिधीयते प्रत्ययेन तदन्वितमेव विशेष्यमित्यर्थः। विभक्तेरिति लिंगसंख्याकारकाणा इति पशुना यजेतेत्यत्र तृ
तीयाविभक्तेः पुंस्त्वमेकत्वं करणत्वं च युगपदभिधेयं तत्रान्योन्यानुरक्तमेवाभिधेयं एकेन पुंसा करणभूतेन यागः कर्तव्य इत्य राम
र्थः। इतरेषां मत्वर्थीयव्यतिरिक्तानां पदानां प्रत्ययानां च यत्तत्तावत्संसर्गरूपो वाक्यार्थो मिहितपदार्थसंबन्धादवगम्यते अत ए ४९

वगांगासंबंधग्रस्यतीरवत्त्वस्य लाक्षणिकत्वप्रसिद्धिर्युक्तेत्याहच्यत एवेति ननु गंगायां घोष इत्यत्र नियमसंबंधनिमित्ता लक्षणा द
ष्टा गोशनीयतामित्यत्र गोपदस्यानयतिना नियतान्वयः तत्तत्सर्वपदार्थसाधारणत्वात्तत्कथमत्र संसर्गविशेषो लक्ष्यत इति शंकते
नन्वविनाभावनेति नायंनियम इति परिहरति नावश्यमिति एकवाक्यतापन्नानां परस्परसमभिव्याहारः अत एव गोपदार्थ आनय
त्यर्थेन संसर्गबोधक इति नियतावगतिसिद्धिः समभिव्याहारस्य निमित्तत्वात्तत्वाक्यार्थस्य कथंचि[illegible]दत्वप्रसिद्धिरप्युपपन्ना। एकवा
क्यतायानिमित्तत्वं चाधस्तादुक्तमित्यर्थः। एकवाक्यतानिमित्तां लक्षणां दर्शयति अत एवेति व्रीहीनवहंतीति दर्शपूर्णमासप्रकर
णपठितं तत्र प्रधानवाक्येकवाक्यतया दर्शपूर्णमाससाधनत्वं लक्षयितात्साधनभूतान्व्रीहीनवहन्यादिति वाक्यार्थः संपद्यत
इत्यर्थः। एकवाक्यता कथं निर्णीयत इत्याशंका निर्णायकप्रमाणमाह एकवाक्यतेति किंचित्प्रकरणाद्यनुमेयेति अंगवाक्यप्रधा
नवाक्ययोरित्यर्थः। तदेव दर्शयति स्वामिदुपेतेति एवंमन्यत्रापीति यस्य पर्णमयी जुहूर्भवतीत्यनारभ्याधीतानां दर्शपूर्णमासैकवाक्य
तमवममंगंतत्वमित्यर्थः। प्रकरणार्थश्लोकमुखेन संगृह्णन्नुपसंहरति तस्मादिति यथागमं यथा स्वतंत्रं यथाभाष्यं चेत्यर्थः॥ ॥इति
पार्थसारथिविरचितन्यायरत्नमालाव्याख्यानेनायकरत्नेऽभिहितान्वयनिर्णयव्याख्यानं समाप्तं॥ संप्रति विधिविवेकाख्यं प्रकरणं
व्याख्यातुं प्रकरणारंभप्रयोजनं दर्शयन्तदारंभं प्रतिजानीते विधितत्वइति वार्त्तिककारीयेणाचार्याभिमतेः विधितत्वं विवेक्तुका

मः प्रश्नमुपक्षिपति कः पुनरिति प्रथमं गुरुमते न विविनक्ति केचिदिति प्रमाणानां तद्गोचरः प्रत्यक्षाद्यविषयः तत एवापूर्वं शब्दवा
५० च्यः तद्गोचरत्वं च प्रत्यक्षसूत्रे प्रतिपादितं लिङ्गादिमात्रालंबनः लिङ्‌लोट्‌तव्यप्रत्ययवाच्यः कार्यात्मा स्वतः साध्यस्वभावः यागादिभा
वार्थगोचरः प्रतीतिवेलायां यजेत जुहोयात् दद्यादित्यादिषु यागदानहोमलक्षणधात्वर्थविषयकः निष्पत्तिवेलायां तत्कारणकः अप
मेव विधिर्यदा नियोज्यं स्वसंपादनार्थं प्रेरयति तदा नियोगाद्युत्साहः स्वर्गकामादिकमिति प्रसक्तस्य धीमद्भिः शब्दानां वाचकत्वं स्थितमिति
50 व्युत्पत्तिप्रकारं पृच्छति कथं पुनरिति व्युत्पत्तिर्वाच्यवाचकसंबंधग्रहणं उत्तरमाह तत्राहुरिति देवदत्त गामानयेत्युत्तमवृद्धेन वाक्ये
प्रयुक्ते मध्यमवृद्धः प्रवर्तते तदानीं तटस्थो व्युत्पित्सुरेवं मन्यते अस्य चेष्टा कार्यज्ञानपूर्विका स्वतंत्रचेष्टात्वात् मदीयचेष्टावदि
ति तच्च ज्ञानं लिङ्गादिजन्यं तदनंतरभावित्वात् इत्यनुमानद्वयेन लिङादीनां कार्यवाचित्वं निश्चिनोतीति भावः अपरथा कार्यज्ञाना
भावे व्याप्तिं दर्शयति ईदृशी हीति अस्यापि प्रयोज्यवृद्धस्य मदविशेषात् विशेषानवबंधित्वान्न कार्याभिधायित्वं निश्चिनोतीति अभि
धेयगोचरज्ञानजनकत्वमेव वाचकत्वं न तन्निश्चिनोतीत्यर्थः ननु यद्विषया प्रवृत्तिस्तद्विषयावगतिः प्रवृत्तिश्च क्रियाकार्यगोचरेति
न तद्गोचरज्ञानजनकत्वाल्लिङादीनां तद्वाचकत्वमेव युक्तं न तदपूर्ववाचकत्वमिति शंकामनुवदति तन्न यद्यपीति प्रतिवक्ति ए. म.
तथापीति षष्ठाध्यायप्रथमाधिकरणे स्वर्गकामपदस्य नियोज्यपरतयान्वयः कथितः स च क्रियाकार्यत्वेन घटते नास्याः स्वर्गासंगतत्वा ५०

न्नदुक्तीरीत्यनुकार्यत्वे घटत इति लिङादीनां तद्वाचित्वनिर्णय इत्यर्थः संसर्गो न्वयः नन्वस्तु नियोगान्वयबलाल्लिङादीनां क्रियोत्तीर्णा
पूर्वकार्ये व्युत्पत्तिः लोके पि तु क्रियाकार्ये प्रयोगान्नदपि वाच्यं स्यादित्यत आह अस्मिन् चेति लाक्षणिक इति अपूर्वकार्यस्य क्रियाकार्यावि
नाभावित्वादपूर्वकार्यस्य मुख्यत्वे क्रियाकार्ये लक्षणया प्रयोगो युज्यते क्रियाकार्यस्य मुख्यत्वे तु तस्यापूर्वकार्यव्यभिचारात् लक्षणा
नुपपत्तेः अपूर्वस्यैव मुख्यत्वं क्रियाकार्यस्य लाक्षणिकत्वं चांगीकार्यमिति भावः अन्याय्यत्वादिति असादिष्टे कार्यत्वमगत्यांगीकृत
मिति भावः यतो पूर्वकार्यमेव लिङो मुख्योर्थः अतो नैमित्तिकनिषेधाधिकारयोर्मुख्यत्वं भवति लक्षणया प्रयोगान्नियोगान्वया
न्यथानुपपत्त्यभावेप्यपूर्वमेव लिङर्थो भविष्यतीत्याह एवं चेति असत्यपि फल इति फलाभावेन नैमित्तिकनियोगान्वयानुपपत्त्यभावे
पीत्यर्थः विधिविषयत्वाल्लिङादिवाच्यत्वान् गुरुमतं दूषयितुमुपक्रमते तदिदमिति तत्कार्यावगतिरिति कार्यज्ञानस्य प्रवृत्तिहेतुत्वे त्रि
षत्वलिङादीनां तत्र व्युत्पत्तिर्घटते न त्वकारणं इष्टसाधनत्वज्ञानमेव कारणमित्यर्थः साप्रवृत्तिः कार्यज्ञानस्य प्रवृत्तिहेतुत्वं निराकरिष्य
न्प्रथमं कार्यलक्षणं तत्र प्रमाणं च पृच्छति यत्तावत्कार्यावगतिरिति प्रथमं लक्षणमाह कृतिसाध्यमिति कृतिसाध्यमित्येतावत्युक्ते आ
नुषंगिकसाध्यानामपि कार्यत्वं स्यादत उक्तं प्रधानमिति कृतिप्रधानमित्युक्ते साधयितुमशक्यानामप्यर्थानां कृत्युद्देश्यत्वसंभवात्का
र्यत्वं स्यादत उक्तं कृतिसाध्यमिति तत्र प्रथमं कृतिसाध्यत्वांशे प्रमाणमाह तत्रेति अन्यत्रैतादृशस्य कर्मणः कृत्यन्वयव्यतिरेकानुवि

५१ धानदर्शनात्प्रवृत्त्याधिकमर्थस्मरणात् इति साध्यत्वं प्रवृत्तेः प्रागेवानुमानेनावगम्यत इत्यर्थः प्राधान्यांशोपि प्रमाणमाह प्राधान्यं चेति ननु
इतिहेवमानस्य प्रत्यक्षात्कथं तदुद्देश्यं मानसप्रत्यक्षमित्याशंक्य तत्संवंधानदपि मानसप्रत्यक्षमित्युपपादयति इतिहीत्यादिना तद्विशिष्ट
उद्देश्यत्वविशिष्टः इष्टस्तु देश्यस्य प्रत्यक्षत्वमावालगोपालसिद्धमित्याह सर्वो हीति प्रत्यक्षानुमानप्रमाणमिति लौकिककार्यमभिप्रायं
51 तत्रैव प्रथमं लिङादिव्युत्पत्तेः अलौकिककार्यस्य मानान्तरागोचरत्वात् इति साध्यप्रधानमिति लक्षणं तु लौकिकवैदिकसाधारणं त
त्र कार्यस्यानुमानप्रमाणकोपः इति साध्यत्वांशस्तत्साकार्येष्यनिष्टसाधनेऽतिव्याप्तिः स्पष्टतरेति तमंशमुपेक्ष्य प्रत्यक्षप्रमा
णकं इष्टस्तुदेश्यत्वांशमपि तिव्याप्त्या दूषयितुं पृच्छति किमिदानीमिति अतिव्याप्तिमाह यद्येवमिति लोभादिभिरित्यादिशब्दान्मोहादर
योगृह्यंते उद्दिश्येति भ्रांत्येति शेषः ननु तादृशमपि कार्यमेव भवतु तत्र लक्षणस्य कोयमनुप्रवेशान्नातिव्याप्तिरिति शंकते तत्र को दोष
इति यद्येतदपि कार्यं स्यात्तदर्हि तदवगतेः प्रवर्त्तेत तुल्यसामग्रीवं दृश्यते अतो न कार्यमिति न लक्ष्यांशानुभूतमित्याह नैवं विधेति त
देवोपपादयति योहीति मध्यउद्योगानंतरं क्रियानिवृत्तेः पूर्वं नन्वनर्थत्वादेवनाप्य इष्टस्तुदेश्यत्वमित्याशंक्य वस्तुतोनर्थत्वेपि भ्रांत्या
तस्येष्टसाधनत्वावगमात्उद्देशेन इष्टं प्रवृत्तेः कार्यत्वमपि संजातमित्याह तत्र कार्यत्वेति ननु प्रथमं कार्यत्वमुपगतमपि स्वमूल ए.म.
भूतेष्टसाधनत्वज्ञानवाधाद्वाध्यते तस्मिंश्च बाधिते तन्मूलाप्रवृत्तिरपि निवर्त्तत इति नातिव्याप्तिरित्याशंक्य इष्टसाधनताज्ञानवग ५१

मवाधेपिकार्यत्वंनवाध्यतेवाधकादर्शनात्ततःपश्चादपिकार्यमेवतदित्याहसाचेतिअतिव्याप्तिंनिगमयतितस्मादितिननुकृत्यु
द्देशयोग्यत्वंकार्यत्वंनचस्वर्गमुखांगुलिदानादावतिव्याप्तिःतेषांभ्यांसाक्षादुद्देश्यत्वेपिवक्तृतोनिष्टसाधनत्वेनतद्योग्यताभावादि
त्याशंकतेअथेतिएतादृशकार्यत्वस्याप्रामाणिकत्वादेतल्लक्षणाप्रसंभवतीत्याशयेनदूषयतिसाकेनेतियदवगमपुरुषःप्रवर्त्त
तेतद्दुःकार्यत्वंततश्चप्रवृत्तेःपूर्ववेलायामेवतद्दुष्टतयाकार्यस्यावगतिरंगीकर्त्तव्यातस्यचप्रत्यक्षत्वेचिदपितस्यसंदेहोनस्यात्
अस्तिचसंदेहःक्वचित्अतोनतस्यप्रत्यक्षमित्याहनतावदित्यादिनाप्रवृत्त्यवस्थायामपितितस्यप्रत्यक्षत्वेप्रवृत्तेःपूर्ववेलायामेव
संदेहेनभाव्यंनतदुत्तरामवस्थामपिसंदेहेसतितस्यप्रत्यक्षत्ववाचोयुक्तिरसंगतानुपपन्नेतिभावःननुप्रवृत्तेःपूर्वंनतत्समकालंचकृ
त्युद्देशार्हत्वरूपकार्यत्वसंदेहेपिफलप्राप्तिवेलायांप्रत्यक्षेणतदवगमोभविष्यतीतिशंकतेमाभूदितियद्यपिप्रवृत्तेःपूर्वंभाव्ये
चकार्यत्वज्ञानंतत्प्रयोजकंनतुसमकालभाविनापुनरकालभावितत्तउत्तरकालप्रत्यक्षमपिपूर्वमनवगतंप्रवृत्त्यनंगत्वादका
र्यमित्येवस्फुटंदूषणंतथापिवैभवात्तदानीमपिप्रत्यक्षत्वंनास्तीतिदूषयतिकस्यपुनरितिपश्चादपिकिंक्रियायाःकार्यत्वंप्रत्यक्षंफलस्यवे
तिविकल्पार्थंनिराकरोतिनतावदितिनघटत्वादितिफलायवर्णिताक्रियायाःप्रत्यक्षस्यचवर्त्तमानग्राहित्वादित्यर्थःद्वितीयंदूषयतिना
पीतिफलस्यसाधनत्वसिद्धत्वेपिकेवलंतस्यसुखरूपत्वमेवप्रत्यक्षंनतुकार्यत्वमित्येतदुपपादयतियोहीतिसंप्रतिसुखस्यकार्यत्वंना

५२ स्य प्रत्यक्षत्वं चांगीकृत्यापि न तत्ज्ञानस्य प्रवृत्तिनिमित्तत्वं तस्य प्रवृत्तेः पूर्वमसंभवादित्यभिप्रेत्य तत्साधनगतकार्यत्वनिश्चयस्तु दु
र्लभः तत्र प्रमाणाभावादिति मत्वा प्रथमं प्रत्यक्षाभावमाह भवतु वेति न कदाचित्प्रत्यक्षेणेति अर्हतायाः प्रत्यक्षागोचरत्वादित्य
र्थः अनुमानाभावमप्याह नानुमानेनेति शक्यमिति अन्यगतकार्यत्वेनान्यस्य कारणत्वानुमानेऽतिप्रसंग इत्यर्थः अथ यद्यपि साध्यगत
कार्यतया तत्साधनगतकार्यतानुमानेऽपि नातिप्रसंगः तथापि प्रवृत्तेरुत्तरत्वेनाप्यवसाध्यगतकार्यत्वावगमात्तत्पूर्वं साधन
52 गतकार्यत्वं तेनानुमेयमिति न प्रसंगभूतकार्यत्वानुमानं सुशकमिति तात्पर्यं प्रकारान्तरेण कार्यत्वलक्षणमाशंकते स्यादेतदिति कृतस
र्हता कृतिविषयाभावयोग्यता अत्रापि कृतिविषयभूतं गुलिप्रदानेन व्यभिचारपरिहारार्थं अर्हतापदं ननु कृत्युद्देश्यार्हतादस्य न भे
दं पश्यामः अतस्तत्रोक्तानिषेधान्यत्रापि समापतेत् पुनरिमामाशंक्य तस्य लक्षणमाह स्वेति यदाकारं यादृशाकारविशिष्टं प्रतिपद्यज्ञा
त्वा प्रवृत्तोत्सुकं प्रवृत्ताविच्छा तदाकारभागिता दृशाकारयोगिता न्वेतावता पिलक्षणायो भेदः कश्चित्प्रतिपादित इत्याशयेन तादृशमा राम०
कारं पृच्छति कः पुनरिति उत्तरमाह समीहितेति कृत्युद्देश्यार्हत्वं तु इदं कृत्युद्देश्यार्हमित्येवं प्रमाणेन प्रत्यासामाणिकमित्युक्तं इदं तु समी
हितत्साधनयोरन्यतरत्वमिति तेनास्माद्भेद इति भावः औत्सुक्यं जायत इति समीहितेत्यादौ उत्सुकां तत्साधने तु तत्सिद्ध्यर्थं जायत इत्यर्थः ५२
इदं तु कार्यत्वं प्रामाणिकमिति तिन तत्ज्ञानात्प्रवृत्तिरुपपन्नेत्याह तत्त्वेति अनुपलब्धि वेद्येत्याचार्यमताभिप्रायेणोक्तं गुरुमते त्वभावप्र

मारणानंगीकारात् युक्तिप्रत्युक्तेः एवायं पक्षः किंतु त्वदभिमतासिद्धिरित्याशयेन दूषयति युक्तमेतदिति युक्तं चेदेवमेव स्यादित्याशं
क्य तदभिमतासिद्धिमाह किंत्विति न तु तः किंतत्राह तत्रैवेति नञ्लिङादिशब्दो न समीहितसाधनाभिधायी तत्साशंकाह इष्टसाधनत्वमेवात्र
साधने पर्यवस्यतीत्याह कार्यमिति यथाविधि इति साक्षात्स्वं परया वा इच्छाविषयीभूत इत्यर्थः नन्वेवं समीहितवाचित्वमेवालिङादीनां
स्यात् न तु तत्साधनवाचित्वमित्याशंक्याह तथाविधतां चेति ।। नञ्पदमिति धात्वर्थस्यैकैकशः रूपत्वादित्यर्थः तयापत्ति किं स्यात्तत्राह त
थाचेति पदस्य पाणां प्रकृत्यर्थगतविशेषाभिधायित्वाद्धात्वर्थगतमेव साधनत्वलिङ्गाच्यं स्यात् न तत्पूर्वं तत्रकृत्यस्य संभवाद्यथाकथंचि
त्संभवे पि तद्गतेष्टसाधनतापाएव लिङ्वाच्यता तन्नैमित्तिकनिषेधाधिकारयोरपि स्यात्पूर्वस्यपत्न साधनत्वमंगीकर्तव्यं स्यात्तन्तत्र
तत्र विधिसिद्धिर्नेव प्रयोजनमिति भवसिद्धौ न विशेषः स्यादित्यर्थः इत्थं च तदुद्देश्यत्वं तदर्हत्वं च कार्यत्वं प्रतिसिसं सं प्रति समीहितसा
मीहितसाधनयो रविशेषेण कार्यमेतदिति प्रवर्त्तमानयोः प्रतीतिप्रयोगयोरव्यवस्थमुभयात्रगतेनकेनाप्यालंबनेन भाव्यं तदेव कार्यत्वं
न तज्ज्ञानं तु च प्रवृत्तिप्रयोजकं तदेव वलिङ्वाच्यं स्यादिति पक्षमुपक्षिपति नन्वित्यादिना सुखत्वं नूपत्वमिति दुःखाभावस्याप्युपलक्षणं
समीहिततत्साधनत्वावगतिस्तु एतादृशकार्यत्वस्य हेतुरितिभावः समीहिततत्साधनत्वातिरिक्तं कार्यत्वं पूर्वोक्तयुक्तिभिरेव निरस्तमि
ति न योरन्यतरदेव कार्यत्वमित्संगीकर्तव्यमिति दूषयति नैवमिति सुखगतकार्यत्वं तु प्रवृत्त्यनुपयोगि सुखे साक्षाद्व्यापारासंभवात्सा

धनगते तु कार्यत्वे प्रमाणाभावान्न तदवगतिः प्रवृत्तिकारणमिति पूर्वमेव प्रतिपादितमिति भावः ॥ ननु समीहिततत्साधनत्वाति
५३ रिक्तस्य त्वदुभयानुगतस्य कार्यत्वरूपपदार्थस्याभावे त्वनुगतप्रतीतिप्रयोगौ कथं स्त इत्याशंक्यानुगतपदार्थाभावेऽप्येकोपाधिव
शाद्भविष्यत इत्याह कर्त्तव्येति उपाधिमेव दर्शयति उभयमपि हीति निगमयति तस्मादिति क्रियायामिति क्रियागतकार्यत्वे प्रमाणा
भावस्य विशिष्योक्तत्वादित्यर्थः किं तर्हि तत्र प्रवृत्तिहेतुः कार्यशब्दाभिलप्यं चेति तत्राह अपि त्विति एवं समीहितसाधनत्वातिरिक्तं
53 कार्यत्वं निराकृत्य इदानीन्तदतिरिक्तस्य लिङ्वाच्यभूतकार्यस्यांगीकारे न भवदभिमतापूर्वकार्यस्य लिङ्वाच्यत्वं सिध्यतीति दूषयितुमु
पक्रमते भवतु वेत्यादिना क्रियाया एवेत्यवधारणाद पूर्वं यावन्नर्पयति उत्पत्तिसमये क्रियागतकार्यत्वज्ञानादेव प्रवृत्तिदर्शनान्नदेव
लिङादिवाच्यं स्यादित्यर्थः लोके लिङादीनां कार्येऽनुत्पन्नावपि वेदे स्थिरकार्येऽनुत्पन्ने रपूर्वस्य लिङ्वाच्यत्वं भविष्यतीति शंकते स
त्यमिति नियोज्यान्वयानुपपत्त्या खलु स्थिरकार्येऽनुत्पत्तिः सेवनास्ति क्रियायामपि स्वर्गकामस्य मदीयमिदं कार्यमित्येवंविधनियोज्य
त्वसंभवाद तो नापूर्वेऽनुत्पत्तिः सिध्यतीति दूषयति नैवमिति कामासाधनत्वात् क्रियायास्तत्कामिनस्तत्र कार्यत्वावगमो नोपपद्य राम०
त इति शंकते नासाविति साक्षात्फलसाधनत्वाभावेऽप्यपूर्वद्वारेण फलसाधनत्वोपपत्तेः क्रियायाः कार्यत्वमुपपन्नमेवेति परिहरति ५३
नेति अपूर्वद्वारेण क्रियायाः फलसाधनत्वं नोपपद्यते अपूर्वस्य क्रियाशक्तित्वतदंशान्तरव्यापारत्वयोरसंभवादिति शंकते नान्यद्वारे

रोतिञ्चातिप्रसंगादितिपरंपरासंबंधस्य सर्वत्र संभवे सर्वस्य सर्वसाधनं स्यादित्यभावः साधनतामुपपादयतीति वन्हेः स्वश-
क्तिद्वारा स्फोटकार्यसाधनत्वदर्शनात्कुठारस्योद्यमननिपतनलक्षणाव्यापारद्वाराच्छिदासाधनत्वदर्शनादित्यभावः ना
पूर्वमिति अनेनैवंविधत्वादित्यर्थः ननु कथमनेनैवंविधत्वं अपूर्वमपि क्रियायाः शक्तिर्व्यापारो वा भविष्यतीत्याशंक्य साधनाश्रितस्ये
व द्वारत्वं युक्तमित्याशयेन परिहरति किमिदानीमिनेजस्य परमानामपि द्वारत्वं माभूदित्याशंक्याह माभूदिति चेन्नेति ज्वालायाश्च वांत
रव्यापारत्वं सर्वलोकप्रसिद्धमित्याह सर्वलोक इति तस्मात्तदाश्रितस्य तदाश्रितस्यैव तद्व्यक्षणलक्षितस्यैवावांतरव्यापारत्वं द्वारत्वा
परपर्यायमपीत्याश्रयणीयमित्याह तस्माद्यदेवेति एवमपूर्वस्यापि द्वारत्वं संभवतीति क्रियाया एव कार्यत्वं युज्यत इतितस्यैव वे
देपि लिङ्वाच्यत्वमिति निगमयति तेन संभवतीति एतादृशस्यावांतरव्यापारत्वानंगीकारे निष्पन्नरमप्यात्वं हृदयदि चैवमिति आग्ने
यादिषड्यागात्मकस्य दर्शपूर्णमासस्य कर्मणः स्वर्गप्रध्वंसितः फलं प्रतिद्वत्वपरमापूर्वप्रतिकरणत्वं त्वदभिमतं न सिध्येदित्य
र्थः कुतो न सिध्येन्नत्राह तदपीति कर्मानंतरं तस्याजननमेवोपपादयति स्विष्टकृदादीति दर्शपूर्णमासयागानंतरमेव परमापूर्व
जन्ये तत्तद्धि स्विष्टकृदादीनां कर्मनिर्वर्तकानां परमापूर्वनिर्वृत्तावप्यनुपकारित्वेऽनुपकारकत्वादंगत्वमेव हीयेतातस्तेषामंग
त्वाय सर्वांगानुष्ठानोत्तरकालमेव परमापूर्वं जन्यत इति वक्तव्यमित्यर्थः तस्मात्कर्मणः परमापूर्वसाधनत्वमंगीकुर्वाणेनातस्य

५४ मवेतानामप्युत्पत्त्यपूर्वाणां द्वारत्वमंगीकर्तव्यं तद्वत्परमापूर्वस्यापि भविष्यतीत्याह तत्रेति ननुयदित्तत्र दर्शपूर्णमासात्मेनत्वेरं कर्म
करणं भवेत्स्यादेवं तव्यापारापेक्षा किंतु षष्ठागजनितानि/स्थिराण्युत्पत्त्यपूर्वाण्येव करणानितिशंते उत्पत्त्यपूर्वाण्येवेति द्रष्टव्यमिति
54 नेति अथप्रममसिद्धिमुपपादयति अधिकारवाक्य इति अधिकारवाक्येऽपूर्वे स्वन्निरितिनन्तः पूर्वक्रियाकार्यत्वमेवार्थः अपूर्वेप्युत्पत्ति
प्रसविषयकरणस्यापूर्वस्य निर्वाहे सतिपश्चान्निर्वाहो भवति तत्र उत्पत्तौ निर्व्यूढायां पश्चाल्लिङ्शब्दस्याप्यत्राप्यपूर्वमर्थो भवति एवं
स्थितेसत्यधिकारापूर्वस्य करणान्वयवेलायामपूर्वमुत्पत्ठायां पश्चाल्लिङ्शब्दस्योत्पत्तिनिर्वाहाद्याग्नेयादिवाक्ये पुलिङ्शब्देनापूर्वप्र
तीतेरपिद्धतादुत्पत्त्यपूर्वाणां परमापूर्वकरणतयान्वयोपपद्यत इत्यर्थः अशाब्दार्थत्वमप्युपपादयति न चेति प्रत्ययोपात्तस्यापूर्व
स्यप्रकृत्युपात्तसत्ताद्विषयभूतोपजिरे वस्तन्निहितन्तयाकरणं नतु प्रकृतिवाच्यत्वमुत्पत्त्यपूर्वाणामित्यशाब्दार्थत्वमित्यर्थः एवं च
यजेत्युत्पपूर्वमिवपरमापूर्वमप्यवान्तरव्यापारः स्यादितिनिगमयति तस्मादिति यद्यवान्तरव्यापारद्वारेणान्यस्यापि कर्मणः फलसा
मधनत्वंनेष्यतेतर्हि तत्सिद्धान्त कोमासारभूतमपूर्वस्यापिकार्यत्वं न सिध्येत तत्स्यापि साक्षात्कृति संबंधाभावेन द्वारद्वारिकयैव कृ राम०
तिसाध्यत्वस्यवक्तव्यत्वादितिप्रतिपादयितुं उपक्रमते किं चेत्यादिना ततः किं तत्राह तस्मादिति यथा साक्षात्कृतिसंबंधाभावे पिपरं ५४
परया तत्संबंधादपूर्वस्य कृतिसाध्यत्वं तद्वत्फलस्यापि परंपरया कर्मसाध्यत्वं कर्मणोपि तत्साधनत्वं स्यादित्यर्थः इत्थं क्रियायाः स

द्वारकं फलसाधनत्वमुपपाद्य जन्यतमेव कार्यलिङ्गादिवाच्यमित्युक्तं इदानीं क्रियायाश्चावान्तरव्यापारद्वारा फलसाधनत्वानङ्गीकारे
प्यपूर्वसाधनत्वस्य भवताप्यङ्गीकारात्तत्प्रयुक्तमेव कार्यत्वं लिङ्गादिवाच्यं स्यान्न त्वपूर्वमिति प्रतिपादयति मा वा भूदिति अपूर्वस्य
वाच्यत्वे कल्प्यत्वे वा धयोर्विवादः क्रियायास्तत्साधनत्वं तावदविवादं तावता क्रियायाः कार्यत्वं सिध्यत्येवेत्यर्थः ननु यत्साक्षात्फल
साधनं तदेव कार्यं अपूर्वं च तथा न तु क्रिया -- धानादित्यत्राह यस्मिन्निति समीहितसिध्यनुगुणत्वमात्रं कार्यत्वप्रयोजकमित्य
र्थः क्रियाया अपि फलसाधनत्वादपूर्वसाधनत्वाद्वा कार्यत्वावगतिरङ्गीकर्तव्येत्युक्तं इदानीं तदनङ्गीकारे निष्टमाह द्वावप्यंपवेति क
र्थं मन्यध्वे इति कार्यताबुध्यधीनत्वात्प्रवृत्तेरित्यर्थः ननु वेदे क्रियायाः कार्यत्वं नास्तीति न वदामः किं तु जन्यतकार्यत्वस्य लिङ्वाच्यत्वं ना
स्तीति वदाम इति शंकते तस्यामिति ननु तस्या अशाब्दत्वेन तत्प्रतीतेः किं निमित्तं तत्राह किं तर्हीति परमापूर्वस्यावान्तरव्यापारत्वमङ्गीकृ
त्य तद्द्वारकं कर्मणः फलसाधनत्वानङ्गीकार्यत्वं न कथं विरासंभवतीति विकल्पान् दूषयति विकल्पासहत्वादिति द्वितीयमादौ दूषयति न
तावदिति काम्येष्विति कामाधिकारे करणांशे नागतः प्रवृत्तिः अङ्गेष्वेव वेधीति वदता भवता करणांशस्यापूर्वप्रयुक्तत्वानङ्गीकारादि
त्यर्थः काम्येषु विध्यधीनकार्यं स्यात्तदनुष्ठापकत्वे विधेन पूर्वस्याप्यङ्गीकारे निष्टमाह यदि हीति यस्य तु विधिः स्वसिध्यर्थमनुष्ठा
न मासिपतितद्धि विधेयमिति स्वविध्यनुष्ठापकत्वे विधेयत्वप्रसंगः ततः स्यागमन्तामीषोमीययागवत्प्रयोगे न यागस्यापि विधेय

२

त्वेन हिंस्यादिति निषेधाप्रवृत्तेरनर्थत्वं तस्यादितिशङ्कनाग्नीषोमीयवैषम्यं तत्तोन सिध्येदिति भावः द्वितीयं दूषयति फलप्रधानत्व
५५ मपीति। नीस्येति अपूर्वस्य कार्यत्वं यथा युक्तोपपादितं तथेत्यर्थः तामेवाह नहीत्यादिना विकल्पद्वये कार्यता क्रियायाश्च नत्वनुष्ठान
मेव प्रसज्यत इत्युपसंहरति तस्मात्क्रियाया इति एवमननुष्ठानप्रसंगपरिहाराय अस्मदुक्तनीत्यैव क्रियायाः फलप्रयुक्तं कार्यत्वम
गीकर्तव्यमिति न नियोगस्यान्वयानुपपत्तिरित्याह तस्मादिति अपूर्वस्य द्वारत्वं गीकारे क्रियायाः फलसाधनतया कार्यत्वं तदनंगी
कारे तु साधनतयेति भावः एवं च नियोगस्यान्वयानुपपत्त्यभावे न क्रियाकार्यत्वमेव लिङर्थं स्यादिति नापूर्वाभिधानं सिध्यतीति निग
मयति तत्तश्चेति अपूर्वस्य लिङर्थत्वनिराकरणं अंगनिर्णय एकादशाद्ये सप्रपंचं कृतमित्याह यद्यपि अन्यदिति कृत्युद्देश्यत्वस्य कार्यत्व
तिव्याप्तेः कृत्युद्देश्यार्हत्वस्य प्रामाणिकत्वात्कृत्यर्हत्वस्य चेष्टसाधनत्वानतिरेकात्तदित्येके सत्यपि कार्यत्वे क्रियाया एव कार्यत्वसंभवे
न तस्यैव लिङ्वाच्यत्वात्साभाकराभिमतमपूर्वाख्यं कार्यं निराकृतं स प्रति ख्याभिमतं विधित्वं वक्तुकामो मतान्तरमुपक्षिपति अ
न्यन्मतमिति। समीहितसाधनत्वमेव लिङ्वाच्यं विधित्वं तच्च समानप्रत्ययोपादानेन धात्वर्थादपि भावनायाः सन्निहितत्वात्तद
तमेव भवतीत्यर्थः। कथमतद्विधित्वमित्याशंक्याह तदवगतेरिति। आत्मनीति। समीहितसाधनत्वस्य प्रवर्तकत्वं सर्वेषां प्रा रा.म०
णिनां स्वात्मसाक्षिकमित्यर्थः। ननु जानातीच्छति प्रयतते प्रवर्तत इति प्रक्रियेति इच्छैव साक्षात्प्रवर्तिका दृष्टानुसमीहितसा ५५

55

धनत्वज्ञानं अज्ञातदेवलिङ्गं चं स्यादिति शंकते नन्विति। सत्यमिच्छापि प्रवर्त्तिका साधनत्वं चातत्रेच्छानवगता प्रवर्त्तिका इष्टसाधनत्वं
त्वगतं तत्र लिङ्. प्रमाणत्वेन ज्ञानजननद्वारा प्रवर्त्तकत्वाद्यदवगतं प्रवर्त्तकं तद्वाचकत्वमेव लिङ्. प्रत्ययस्येति साधनत्वमेव तद्वाच्यं
नेष्टेति दूषयति सत्यमिति॥ इष्टसाधनत्वलिङ् प्रत्ययस्य प्रवृत्त्युत्पत्तिमुपपादयितुमुपक्रमते इच्छाहीति। अस्त्वेवं तत्र प्रवृत्तिः कथं त
त्राह तेनेति। क्रियायामिति। क्रियायां दुःखैकफले साक्षात्समीहितत्वाभावेन तत्साधनत्वावगतिर्व्यपदिश्यत इति भावः। अस्त्वेवं त
तोऽपि किं तत्राह तस्याश्चेति इष्टसाधनत्वस्य प्रवर्त्तकत्वेऽनियमेव सर्वत्र प्रवृत्तिः स्यादिति शंकते नन्विति असति प्रवलप्रतिवंधे तत्प्र
वर्त्तकं अतो नातिप्रसंग इति परिहरति न प्रवलेनेति प्रवलनिरोधमुपपादयति यथैवेति सुखतत्साधनयोर्यथेच्छा तत्र स्वाहिनी
प्रवर्त्तिका एवं दुःखतत्साधनयोर्द्वेषोऽपि स्वरसवाही निवर्त्तक एवं अल्पसुखसाधनत्वेऽपि महानर्थसाधनत्वेन प्रवलेन द्वेषेणेच्छोत्प
त्तेः प्रतिवंधान्न प्रवृत्तिर्भवतीत्यर्थः अत एव प्रतिवंधकद्वेषाभावे तत्रापि प्रवृत्तिर्भवती साहयस्त्विति प्रवलेनेति प्रतिवंधकाभावे
नेच्छैव प्रवलाजातेत्यर्थः अतो निगमयति तस्मादिति सामान्येनेति स्वर्गपश्वादिति समीहितविशेषानादरेणेत्यर्थः यतः समीहितसा
धनत्वमेव विध्यर्थः अतो भावनायास्समीहितमेकमाव्यमिति तस्याभाव्याकांक्षा स्वपदोपात्तमपि धात्वर्थमुल्लंघ्य यदात्तरोपात्तेन वाक्या
न्तरोपस्थितेन वार्थवादपरिकल्पितेन अध्याहृतेन वा फलेनैव परिपूर्यत इति स्वर्गकामाद्यधिकरणे साधितं संगच्छत इत्याह सापदात्त

रेत्यादिनाज्योतिष्टोमेन स्वर्गकामो जेयेतेत्यत्रपदान्तरोपात्तेन स्वर्गेणासमिधो यजतीत्यत्र नूनपात्तं यजतीत्यादिषु समिदादिभावनानां
५६ त्वकार्यफलाश्रवणात्प्रकरणोपात्तेन प्रधानभावनात्वेन फलेन प्रतितिष्ठंति ह वै य एवं वे य एता रात्रीरुपयंतीत्यत्र प्रकरणेपि फ
लानावात्कथंचित्कृतफलसिद्धावसंतावश्रुताध्याहारायोगाच्च सत्र भावनायार्थवादिकेन प्रतिष्ठालक्षणेन फलेन विश्वजिता यजे
तेत्यत्र तु कथंचिदपिफलाभावादध्याहृतेन फलेनाकांक्षोपशम इति भावः धात्वर्थस्य भावनाकरणत्वप्रतिपादकं भाचार्याधिकरणम
56 प्यस्येव विधित्वे सत्युपपद्यत इत्याह धात्वर्थस्येति विलीयस इति एकपदोपादानादपि संनिहितत्वाद्विलीयस्यैकप्रत्ययप्रत्युत्साप्रथमतः
समीहितस्येव भाव्यत्वावगमान्न धात्वर्थस्य भाव्यभावः संभवतीति पारिशेष्यात्करणतयान्वीयत इत्यर्थः उक्तेर्थे आचार्यसंमतिमा
ह यथोक्तमिति कर्मत्वेभाव्यत्वे वेदाद्वैदेकदेशभूतात् लिङः प्रत्ययादित्यर्थः एतन्मतमुपसंहरति तस्मादिति इत्थं मतांतरमुपन्यस्याचा
र्याभिमतं विधि[illegible]त्वपदन्मदेवेति दर्शयति आचार्यस्येति अन्यां प्रयत्नरूपामार्थभावनया विलक्षणां अभिधारूपां भावनां लि
ङादय आहुरेवंदन्तीत्यर्थः तद्विधितत्त्वमुच्छ्रुतिकिंपुनरिति। तद्विधितत्त्वं विवेक्तुकामस्समीहितसाधनत्वं दूषयिष्यन् संप्रतिपन्नमंशं ता
वदाह इदन्तावदिति श्रुतिस्तु निनिशेषः स्वतंत्रापन्नानधीनां संप्रतिपन्नमंशमभिधाय विप्रतिपन्नांशमाहत्वेति किं अभिधाव्यापारे राम
णेव तत्प्रतीयते उताभिधेयानुपपत्त्यासेयात्प्रतीयत इति पक्षद्वयमुत्थितस्तु रेवविचारयतीत्यर्थः तत्र साक्षाद्वाच्यत्वपक्षं दूषयति तत्रेति संवि ५६

हि नैयोधात् उभयोरप्यर्वसाक्षिकमभिन्नार्थत्वप्रतीतिविरोधात् विरोधमेव दर्शयति न हीति लिङादीनामिष्टसाधनतावाचित्वेऽर्थावगतिस्तु
त्यासात् तत्तु नास्तीत्यर्थः। यागानुष्ठानापारः यागकर्तृकाभावना। दूषणान्तरमाह महप्रयोगाच्चेति तदुपपादयति लोक इति
नन्वेवंविधशेषदर्शनान्न लोके मास्त्विष्टसाधनतावाचित्वं वेदे तु तद्वाचित्वं स्यादिति तत्राह। लोकप्रमाणकश्चेति। यएव लौकिका
स्त एव वैदिका इति न्यायेन लोके च यथा व्युत्पत्तिस्तथैव वेदेप्यर्थप्रतिपत्तिरिति भावः। प्रथमपक्षदूषणं निगमयति इतीति। अनेन पूर्वो
क्तं विधितत्त्वं दूषितं भवति एवं च विधिप्रत्ययवाच्यानुपपत्त्या क्रियाया इष्टसाधनत्वमाक्षिपतीत्ययं पक्षः परिशेषितो भवति तद्वाच्यं
तु किमित्यपेक्षायामाचार्याभिमतं प्रतिपादयिष्यन् मतान्तरमुपक्षिपति नस्यादिति क्रियायाः कार्यत्वमेव लिङाभिधीयते तदनुप
पत्त्या चेष्टसाधनत्वं कल्प्यते क्रियायां कार्यत्वप्रतीतेरिष्टसाधनत्वमन्तरेणासंभवादित्येतन्मतमाश्रयितुं वरं युक्तमित्यर्थः। ननु प्रा
गेवायं पक्ष इष्टसाधनत्वपक्षादविशिष्ट इति प्रतिपादितं इति तान्मेव दूषणमाशङ्कते। नन्विति। सर्ववस्तूनां सर्पमुखेङ्गुलिप्रदा
नादीनां पापविशेष्यादिति हृत्सु द्वेषार्हत्वसाध्यप्रामाणिकता त्वहृत्सर्हत्वे वकार्यता पापविशिष्यत इत्यर्थः। कृत्सर्हतापि इष्टसाध
नत्व एव पर्यवस्यतीत्याह कृत्सर्हताचेति। आलंबनमिति कार्यत्वप्रतीतेः समीहितसाधनत्वमेव विषय इत्यर्थः इष्टसाधनत्वस्ये
व कार्यत्वप्रतीतिविषयत्वे सम्मतिमाह तदुक्तमिति इष्टसाधनत्वस्यैव प्रवर्तकत्वे संमतिमाह। पुंसामिति एवं च समीहितसाधनत्व

५७ स्यैव लिङ्गत्वमुक्तं तत्र मतोक्तदूषणमन्यत्राप्यापतेदित्याशयेनाह तेनेति। कार्यत्वसमीहितसाधनत्वयोः सामान्यविशेषभावेन वा
ऽरूपस्याधीननिरूपणत्वात् तदभावादिभिर्वा भेदोऽस्ति न तत एव न कश्चिद्दोष इति समाधत्ते उच्यत इति। स्वरूपेणेति इदं समीहितसाधनमि
त्यनेनाकारेणेत्यर्थः। इदं वार्त्तिककारस्य वहानस्याप्यनुगुणमित्याह। तथा चेति। इदमपि नाचार्यस्याभिमतमित्याह इदमपीति न केव
लं ग्रन्थानानुगुण्यमात्रं दूषणमन्यदप्यत्र विद्यत इत्याह किं चेति। अकार्येऽप्यर्थे लिङ्प्रत्ययप्रयोगात् कार्यत्वस्य लिङ्वाच्यत्वं न सिध्य
तीति दूषणं तत्र माह किं चेति कार्यतामपि हि तस्य कार्यत्वमङ्गीकृत्यापीत्यर्थः। तादृशं स्थलं दर्शयति कश्चिद् ब्रूते इति अस्तु तत्रापि कार्य
त्वमेवार्थः अत आह कार्यार्थ इति इति। इदं यद्यपि हितयोग्यं तथापि हितस्य योग्यमिति वचनं परस्परं शाहतं इत्याह॥ एवमत्र व्याहति
र्न दृश्यत इति न कार्यत्वं लिङर्थ इत्यर्थः। तस्मादन्यदेव विधितत्त्वमिति वक्तव्यमिति दिनिगमयति तस्मादिति। तर्ह्याचार्याभिमतमभिधाना
वनात्मकं विधितत्त्वं किमिति पृच्छति कः पुनरिति। उत्तरमाह सर्वशब्दानामिति। अभिधासंभवे किं प्रमाणमित्यत्राह। अर्थप्रतीतिरुत्त
मः अनुमेयः अयं भावः तत्तच्छब्दप्रयोगानन्तरं तत्तदर्थविषयप्रतीतिस्तावज्जायते तत्र शब्दः करणं प्रतीतिः फलं तत्र लेनकरणग राम०
तो व्यापार उन्नीयते सैवाभिधेति। अस्त्वेवं प्रकृते किं तत्राह लिङादीनां लिङ्गत्वापारोऽन्यत्रार्थप्रतीतिमात्रोपयोगात् केवलमभिधेति गी ५७
यते लिङादिगतस्येतत्प्रवर्तनिमवनफलकतया अभिधाभावनेति च गीयते इदमेव तु लिङ्गत्वं विधितत्त्वमित्यर्थः। प्रवर्तनिमवनं प्रव

न्तुत्वत्रिः॥ शब्दस्य गुणत्वपक्षे द्रव्यत्वपक्षे वा व्यापारवत्त्वं न युक्तमित्याक्षिपति न शब्दस्येति। शब्दो न व्यापारवान् गुणत्वात् तद्रूपवद्विभु
त्वाद्व्योमवदिति योगः। अत्रार्थं पतीत्युपयुक्तः कारणाश्रितातिशयो वा निविध्यते स्पंदसमवायो वेति विकल्प्याद्ये नैकांतिकत्वात् द्वि
तीये सिद्धसाधनमिति दूषयति तदयुक्तमिति॥ अस्तु कश्चिद्व्यापि व्यापारः तस्य स्वरूपं कीदृशमिति पृच्छति कस्तस्येति उच्चारणाहस्व
ज्ञानमिति। उभयत्रापि संमतिमाह तथा चोक्तमिति। असंनिकृष्टेंद्रियासंबद्धे॥ ननु ज्ञानसंस्कारयोरात्मधर्मत्वेन शब्दं वांतरव्यापारत्वं क
थमित्याशंक्य तदुपपादयति पदे वेति। फलोत्पत्त्यनुकूलः कारणसाध्यो व्यापारो वांतरो वा तरव्यापार इत्यर्थः। निगमयति। तेनेति। नन्वेभि
धानमशब्दो ऽर्थमभिधत्ते शब्देनार्थो ऽभिधीयत इति शब्दकर्तृकत्वकरणको वा व्यापारः ज्ञानं घटं जानातीति शब्दकर्मव्यापारः तेनैतस्याभि
धात्वमयुक्तं तथात्वे धातुवाच्यव्यापाराणां सकर्मकत्वाकर्मकत्वव्यवस्थाकारकनियमस्य नस्यादिति शंकते नन्विति। दृष्टान्तावष्टंभे
न परिहरति शृणु वदिति अयं भावः॥ यद्यपि जानातिधातुवाच्यो ज्ञानरूपो व्यापारस्तावदेकवत्तन्मति संबंधिपदार्थपरत्वेनैतत्त्वधा
तुवाच्यतयाभ्युपगमन्न एव सकर्मकाकर्मकविभागं तत्कारकव्यवस्था च प्रतिपद्यते। यथैकमेव ज्ञानं जानातिप्रतिभातिभ्यामभिहि
तमकर्मकं सकर्मकं च भवति। यथा घटं जानाति घटः प्रतिभातीति यथा वोर्ध्वाधोदेशसंयोगत्वजननफलावच्छिन्नाभिधायिभ्यां उद्गच्छति
निपतति भ्यामभिधीयमानयोरुद्यमननिपतनयोः परशुः कर्मापि सन् हेत्धीभावलक्षणफलावच्छिन्नतया छिनत्तिपदाभिधेययोस्त

५८ योरेवकरणंभवति।पत्रार्थप्रवृत्तकर्तृव्यापारविषयत्वात्पथापरशुनाछिनत्तीतितद्वत्ज्ञानंप्रत्येवशब्दस्यकर्मत्वंकरणत्वंचपुष्य
तइति।स्वातंत्र्यविवक्षायांमितिस्वव्यापारेपुकर्तृत्वंसर्वेषामुपपद्यतइतिन्यायेनकरणस्यापिशातिस्विकव्यापारंप्रतिस्वातंत्र्यवि
वक्षायांकर्तृत्वंभवतीत्यर्थः।इत्थमभिधाव्यापारवेषापन्नेज्ञानेकारकव्यवस्थामुपपाद्यतस्मिन्नेववज्ञानेलिङादिपदत्वगोचरेपुरु
58 षप्रवृत्तिसाधनेकूलवेषापन्नेशब्दभावनात्वेनतदनंतरंचपुरुषप्रवृत्तिविषयत्ववेषापन्नेप्रवर्तनाशब्दवाच्येवकारकव्यवस्थामा
हअनेनेति।प्रवृत्तिकर्मत्वमितिक्रियाफलशालिकर्मेतिकर्मलक्षणोपेतत्वादित्यर्थः।एवंचनानात्वमिदधातिभावयतिप्रवर्तय
तिधात्वर्थनांतत्तत्फलावच्छिन्नक्रियामात्रेप्यनुत्तरेकस्यापिव्यापारस्यतत्तत्फलावच्छेदेसतितत्तद्धातुवाच्यत्वंततस्तत्फलशालिनःकर्म
त्वंचसिद्धमित्याहतेनेवएवेतिप्रतिपादितंप्रमेयमन्यत्राप्यतिदिशति।एवमिति।ननुतत्तदर्थोपरक्तवेषमंतरेणकेवलंव्यापारस्वरू
पायेस्यकारकव्यवस्थासकर्मकाकर्मकव्यवस्थाचकिमितिनस्यादित्याशंक्यांतत्रदोषमाहनहीति।कर्मभावइत्युपलक्षणंअयं
व्यापारःसकर्मकएवइदमेवकर्मइदमेवकरणंइत्यादिनियमोनास्तीत्यर्थः।फलितंकारकव्यवस्थानिगमयतितस्मादितिसकर्म
काकर्मकव्यवस्थामप्युपसंहरतियदाफलानपेक्षणेति।फलानपेक्षेणप्रतिसंबंधिफलानुपरक्तव्यापारस्यास्तिध्यर्थकर्मलक्षणमाह राम०
त्र तदेयेनेति।क्रियाफलभाग्वस्तुकर्मेत्युक्तेछिनत्तिपदाभिहितयोरग्धघमरनियतनयोःपरस्पुःकर्मत्वात्अतउक्तंयेनधातुनेत्यादि ५८

कोचित्तु येन धातुनैत्यादिविशेषणमनादृत्यैव क्रियाफलभागवत्त्वकर्मत्वमुक्तं ज्ञानक्रियाकर्तुरात्मनोपि कर्मत्वं स्यात् सर्वज्ञानानां
त्रिपुटीप्रत्यक्षत्वेन तद्वृत्तस्यैवात्मनोपि विज्ञेभासमानतया व्यवहारार्हत्वलक्षणफलशालित्वात् अतस्तन्निवृत्तये परसमवेतेति पदं प्र
क्षिप्य लक्षणमभिदधति तल्लक्षणमतिव्याप्त्यातिव्याप्तं रूपस्यत्तिपन्नुके न चिदिपरम्यादिक्षिति परम्परासंबन्धिनि तदिदमत्र कर्त
व्यापारेण यथा वृक्षे द्वैधीभावलक्षणं फलं जनयति तथा परशावपि तद्देशसंयोगादिकमिति करणेतिव्याप्तिरित्यर्थः। क्रियाफल
भागिनोपीति देवदत्तस्य शुद्धिलक्षणातिशयजननादित्यर्थः। नन्विदमपि लक्षणमतिव्यापकं देवदत्तो ग्रामं गच्छतीत्यत्र प्राप्तिलक्षण
फलस्योभयत्रसंभवादित्याशंक्य परिहरति नचेति। उभयसमवेतेपि गच्छतिधातोर्ग्रामगतफलप्रतीतिसंबन्धितयैव गमनक्रियायामुत्पन्नत्वे
न येन धातुनेत्याद्युक्तलक्षणस्य न गंतर्यतिव्याप्तिरित्यर्थः। एवं च मामहं जानामीत्यत्रात्मनः स्वसमवेतक्रियाफलत्वशालित्वेन भव
तः कर्मत्वं न सिध्येत् इत्यव्याप्तिः अस्माकं तु सिध्यतीत्याह एवं चेति। समर्थितमिति अस्माभिरिति शेषः। अस्त्वेवं ज्ञानस्यैनाभिधाला
दिकं न तु तस्य लिङ्वाच्यत्वमनुपपद्यते तदवगमस्य प्रवर्तकत्वाभावात् प्रवर्तकाभिधायित्वाल्लिङादीनामिति आशंकते। आहेति
नाहि कस्यावगमात् प्रवर्तत इत्याशंक्याह समीहितेति। अभिधाया लिङ्वाच्यत्वे नुपपत्त्यंतरमप्याह न चास्याविति। अनन्यलभ्यः खलु
शब्दार्थः ततश्च यथा प्रवृत्तिभागगताया अभिधाया अर्थप्रतीत्यनुमेयत्वं एवं लिङ्प्रत्ययगताया अप्यभिधाया अर्थप्रतीतिलिङ्गाच

३१

गतत्वेनान्यलभ्यत्वात् न तत्र शब्दशक्तिः कल्पयितुं युज्यत इत्यर्थः। स संप्रत्ययसाधनत्वमेव प्रकृत्यर्थः किं तु पूर्वोक्तन्यायेन न साक्षादभि
५९ धेयं किं तु तदुपपादकमर्थात्तदेव तत्राभिधाव्यापार एव भवति इत्याशयेन परिहरति। उच्यत इति। अस्त्वत्र तस्मान्नाभिधेयत्वं अभिधा
या लिङ्वाच्यत्वं कथमित्याशंक्य तत्राप्युपपत्तिक्रममाह अत्रोच्यत इति। निष्ठितो नीतितत्तस्य कार्यत्वानुपपत्तेः स एवाभिधाव्यापारो
भवतीति शेषः। अभिधाव्यापारस्यान्यलभ्यत्वात् तद्वाच्यत्वं न संभवतीत्येव दूषणं परिहरति। तेनेति प्रवर्तनाविषयस्य वाक्यस्यान्यलभ्य
59 त्वमित्यत्राह प्रवर्तनेति॥ अभिधीतरविलक्षणानि नि। एकवा लिङादिगतया अभिधया अर्थभावनाभिधीयते सैवार्थभावनाभि
धेयपरा अपरया प्रवर्तनारूपेणाभिधीयत इत्यर्थः। अत एवाभिधाव्यापारस्य वाच्यत्वं वाचकत्वं चेत्यादि स्यात् तत्राश्रयदोषोऽपि परिहृतः
वाच्यवाचकभूताभिधयोर्भेदात्। ननु भवेदस्याभिधायाभिधेयत्वं यद्येतदगमात् क्रियायास्समीहितसाधनत्वं कल्पयितुं शक्येत तत्तु क
थमित्याशंक्य तदुपपादयति एवंविधेति। इयं प्रवर्तनाव्यापारः प्रथमः समानपदस्योपादानार्थभावनया संगच्छते तस्याः अपुरुषा
र्थभाव्यकत्वेनादृष्टाविध्यन्वयानुपपत्तेः विधिरेव तस्यान्वयनिर्वाहार्थं तां पुरुषार्थभाव्यकां कल्पयति एवं च तस्याः समानपदोपात्तो
धात्वर्थः स्वतः साध्यरूपोऽपि भाव्यकोटौ न निविशते। अपुरुषार्थत्वात् किं तु स्वर्गकामपदोपात्तः पुरुषार्थ एव भाव्यो भवतीत्यर्थः। धात्व राम०
र्थस्तु भावनाद्वाराविधिसंबंधात् पश्चात् पुरुषार्थसाधनत्वं भवतीति भावः। तदेवोपपादयति नहीति व्यापारस्यार्थभावनायाः एव सम्भ ५९

हितसाधनत्वस्य साक्षादवाच्यत्वात् कार्यत्वस्य तदुपपादनसमर्थस्यापि पूर्वोक्तदूषणेनवाच्यत्वायोगात्प्रवर्तनारूपशब्दभावनास्य
वाच्यत्वे समीहितसाधनत्वस्यापि पदिकल्पनात् दोषाभावादनन्यलभ्यत्वाच्च तस्यैव वाच्यत्वं सिद्धमिति निगमयति तदेवमिति॥ ननु स्व
र्गकामपदस्य श्रुतिवृत्तिपरत्वानुपपत्त्या फलपरत्वे विध्यवगतेर्द्भावनापुरुषार्थभावनायास्तन्न चैवं सिध्यति प्रवर्तनाया एव विधित्वात्
तस्याः साक्षात्प्रवर्त्यपुरुषापेक्षित्वेन तत्समर्पकत्वेनान्वयसंभवादिति शंकते नन्विति। अयमपि पक्षः केश्चिदंगीकृत इत्याह तथा नामेति
। नन्वस्मिन्पक्षे स्वर्गकामपदस्य पुरुषपरत्वेन फलसमर्पकत्वाभावाद्भावनायाः समीहितभाव्यकत्वासिद्धिः कथमित्याशंक्याप्रवस्यत्वानु
पपत्त्यैव फलसामान्ये कल्पिते प्रवर्त्यविशेषणत्वस्वर्गादिपदं फलविशेषसमर्पणपरं भवतीत्याह। न चैवमिति फलत्वकल्पनादिति
फलतया कल्पनादित्यर्थः अस्मिन्पक्षे प्रेरणात्मकविध्याकांक्षावशात्पुरुषपरमेव स्वर्गकामादिपदं फलं त्वनुपपत्तिलभ्यमिति
स्थितं। अयं पक्षो भाष्यवार्त्तिकविरुद्धः तयोस्तत्र तत्र फलपरमेव स्वकामपदं पुरुषस्तु विशेष्यतया प्रतीतोपि प्रथमं न विवक्षित इत्येवं
प्रतिपादनादित्याह भाष्यवार्त्तिकयोरिति। न केवलमयं पक्षो भाष्यवार्त्तिकविरुद्धो न्यायविरुद्धस्त्वफलपरत्वमेवानुमोयेतमित्याह प्र
क्रमं चैतद्धि ति। ननु प्राभाकराभिमते नियोगविधिपक्षे स्वर्गकामपदस्य क्रियांप्रति कर्त्तृतया नियोगं प्रति नियोज्यतया चान्वयादुभयान्वयो
वाच्य इति गौरवापत्त्या न्यायविरोधः अस्मिंस्तु पक्षे क्रियांप्रति कर्त्तृरूपप्रवर्त्यपुरुषमात्रपरत्वेनागौरवात्कथं न्यायविरोध इत्याशंक्याह

त्यमेवं तथापि शब्दमात्रदेशे वा पुरुषस्य विध्याक्षेपावगतत्वात् शाब्दस्यैवाप्राप्तार्थपरत्वात् न पुरुषपरत्वं नामपदस्येति प्रतिपादय
६० तियद्यपीत्यादिना कर्तृनियोज्ययाभेदाधिगतिः कर्तृनियोज्यरूपान्वयभेदाधिगतिः नियोज्यः प्रवर्त्यः । एवं विधिविशेषमध्यात् पुरुषस्य प्राप्ति
मभिधाय फलपरत्वे तु यद्यपि फलसामान्यस्य विधिवशादेव लाभः तथापि तद्विशेषस्यानवगततया तत्समर्पकत्वेन सार्थकत्वमिति व
दितुं फलमपि सामान्यतः प्राप्तमित्याह । प्रत्यासत्ति । स प्रवर्त्यः अत्रैवस्य मारोपो भवतीत्यर्थः । आपातस्य भावनायाः शेषितत्वमा
कृ । तदेव व्यतिरेकमुखेनोपपादयति नहीति प्रेरयितुं विधिनेति शेषः । शेषितायां स्वार्थमाह स एवेति । विशेषमात्रमिति । मात्रं वा सामान्य
स्य प्राप्तिं न त्वस्येवेति दर्शयति । प्रथमपक्षे स्वर्गकामपदं प्रथमं पुरुषपरं पश्चादनुपपत्त्या फलविशेषपरमपि भवति । स्वमते तु प्रथमं
फलपरं पश्चात् भावनाक्षिप्तकर्तृपरं । एतदुक्तं भवति प्रथमपक्षे पुरुषपरमेव फलं तु केवलं तद्विशेषणमिति विवेकः ननु भाष्यवार्तिकयोस्तत्र तत्र का
र्यत्वस्य सेष्टसाधनस्य त्वेव लिङाद्यभिधानात् कथं प्रवर्तनायां लिङाद्यभिधानमित्याशंक्य साक्षादवाच्यत्वेपि तयोर्थान्तरीयमानत
या लिङाद्यर्थत्वव्यवहार उपपद्यत इत्याह तदेवमिति । विधेयस्य भावनायाः तद्वारा भावार्थस्य चालिङादिव्यापार एवाभिधासेव च प्रवर्तना रामः
लिङादिवाच्येति स्थितं । इदानीं तन्मात्राश्रयदोषमाशंकते नन्विति स्वरूपाभिधानप्रसंगः लिङादिप्रत्ययस्य स्वरूपस्यापि वाच्यत्वप्रसंगः ६०
तत्र च लिङ्प्रत्ययस्यैव वाच्यत्वं वाचकत्वं च स्यादित्यन्योन्याश्रयदोष इत्यर्थः । तदेव प्रतिपादयति नहीति अयं भावः । यत्र तु लिङादिप्रत्य

यस्य प्रयोगः तत्र तेन लिङ्प्रत्ययेन स्वविशेषितव्यापारोऽभिधीयते व्यापारमात्रं वा द्वितीये तु सकलशब्दगतस्य व्यापारमात्रस्यैव वाच्य
त्वस्यात् लिङादिगतस्यावाच्यत्वमिति शेषो नसिध्येत्। न तु व्यापारमात्रेऽप्यभिधीयमाने कस्यायं व्यापार इत्याकांक्षायां लिङ्प्रत्ययस्ये
ति सन्निहितत्वात्तत्पासक्ततत्तत्तपापर्यवस्यतीति चेत्। नैवं शब्दोपात्तयोर्ह्याकांक्षावशादन्योन्यान्वयः संभवति न तु शाब्दोपात्तस्य व्यापारस्या
शाब्दोपात्तेन लिङ्प्रत्ययेन कांक्षितेन संनिहितेनाप्यन्वयो युज्यते तथात्वेतिप्रसंगात्। अतो लिङ्प्रत्ययविशेषितव्यापारोऽभिधेय इ
ति विशेषणाभूतस्य लिङ्प्रत्ययस्यापि लिङ्वाच्यत्वप्रसंग इति। आचार्यैरेवायं दोषः परिहृत इत्याह। नैवमिति। विशिष्टग्रहणा
मिति। विशिष्टज्ञानं विशेष्यविशेषणतत्संबंधग्राहकं इति विशेषणागोचरं विशिष्टज्ञानमेव यद्यपि नेष्टं भवतीत्यर्थः। अभिधानाभि
धाने लिङ्प्रत्ययेनाभिधाव्यापारस्याभिधाने। तथापि न कश्चिद्दोष इति शेषः। कथं न दोष इत्यत्राह। न केनचिदिति। यत इह लिङ्प्रत्यय
स्य लोके न इष्टसाधनत्वं विध्यर्थ इति वदतामप्यावचआगृहीतविशेषणं विशिष्टज्ञानं भवतीति नाश्रितं विशेषणाविषयमपि विशिष्ट
ज्ञानं भवतीत्युभाभ्यामप्याश्रितमित्यर्थः। उभाभ्यामप्यनाश्रितत्वमेवोपपादयति तुल्यं चेति विशिष्टग्राहिणा प्रमाणेन विशेषणाग्रहणे
पि प्रमाणान्तरेणाविशेषणाग्रहणे क्वचित्काले क्वचिद्विशिष्टज्ञानं दृश्यते यथा सुरभिचंदनं अत्र घटं भूतलं यथा नाभावनाक्षेपनूपार्थापत्त
वगते कर्तेति तद्विशिष्टेष्टसाधनत्वज्ञानं लिङ्प्रत्ययात्। अतो लिङ्प्रत्ययाभिधानेऽपि प्रत्यक्षावगततद्विशेषिताभिधाव्यापारस्या

मिषेधत्वं संभवतीति नाश्याश्रयः। नापि सर्वेशगताभिधामात्रस्याभिधानप्रसंग इति न कश्चिद्दोष इति भावः। कर्त्रभिधापीति। आ
६१ ख्यातस्य कर्त्रभिधापित्वं कर्त्रधिकरणो निराकृतमिति भावः। समीहितसाधनत्वं कार्यत्वं वा लिङर्थः व्यापारो वा लिङर्थ इत्युक्तं तत्र साभि
मतं पक्षमाह। न्यायविदामिति भावनागतं तद्द्वाराधात्वर्थगतं वेष्टसाधनत्वं लिङर्थ इत्यर्थः। तत्र पूर्वोक्तं दूषणमुद्धरति। नचेति। स्वरूपे
णेष्टसाधनमिदंमित्यनेन वेषेण। तर्हि केन रूपेणाभिधानं तत्राह। प्रवर्तनेति नतु प्रवर्तनारूपस्य वाच्यत्वे कथमिष्टसाधनताया अवि
61 धित्वमित्याशंक्य प्रवर्तनामिष्टसाधनतायां पर्यवसापयति। प्रवृत्तिहेतुश्चेति। प्रेषणादीत्यादिशब्देनाध्येषणामभ्यनुज्ञानं च गृह्यते। न्यायस
हीनस्य नियोगः प्रेषणं। समेन समस्याध्येषणं। हीनेनोत्तमस्याभ्यनुज्ञानं फलितमाह। तेनेति। यथा तन्मते भिधाव्यापारस्य प्रवर्तनारू
पेणाभिधानात् अन्यलभ्यत्वादिदोषपरिहारः तथास्मन्मतेपि समीहितसाधनताया एव प्रवर्तनारूपेणाभिधानान्न संविद्विरोधादि
दोषप्रसंग इत्यर्थः। इदमेव विविच्य तत्वमभियुक्तसंमतमपीत्याह। इदमेवेति। इष्टाभ्युपायत्वादन्यो धर्मः दुःखरूपासु क्रियासु प्रवर्तको
नास्ति किंतु तदेव प्रवर्तकं तमेव धर्मं लिङ्वाच्यं प्रवर्तनां वदंतीत्यर्थः। यतः प्रेरणासामान्यमेव विध्यर्थः इष्टसाधनत्वं तूपनिषेषल
भ्यं अत एवानेकार्थत्वदोषोपि न प्रसज्यत इत्याह। एवमिति। इष्टसाधनत्वविशेषस्यैव लिङ्वाच्यत्वे गौरवं सामान्यवाच्यत्वे तु लाघवमि राम
त्याह। तत्रैवेति। ननु प्रवृत्तिहेतवो धर्माः प्रवर्तकाः ते च रागद्वेषादयः प्रेषणाध्येषणा समीहितसाधनतादयश्च तत्र प्रवर्तनासामान्य ६१

स्वाभिधानेन समीहितसाधनत्वादीनामिव रागद्वेषादीनामपि वाच्यत्वं स्यादित्यत आह। तत्रापीति। लिङ्प्रत्ययस्य प्रमाणान्तरात् तज्ज्ञानहेतो
र्वक्तृस्य प्रवर्तकत्वं वाच्यं न वाय्वादिवत्स्वरूपेण अतः प्रैषादिगतमेव प्रवर्तनासामान्यं लिङ्वाच्यमित्यर्थः। ननु प्रवर्तनारूपमिव कार्यरूप
मपि सामान्यं प्रैषादिष्वनुगतं अतस्तदेव लिङ्वाच्यं स्यादित्याशंक्य तत्र पूर्वमेव दूषणमित्याह। न च कार्यमेवेति। अयमपि पक्षो ग्रन्थकर्तुः
संमत एव दूषणस्य प्रकृतत्वात् उक्तं त्वेवेनेवास्य मतस्यांगीकारश्च निगमयति तस्मादिति। नन्वाचार्यैः प्रवर्तनाविशेषश्च शब्दार्थमुक्तवन्तः। भ
वांस्तु सामान्यं तत् कथमित्याशंक्य तस्यापि तात्पर्यमाह। एवं चेति। इष्टस्य प्रयोजनावगतस्य सामान्यरूपस्य प्रवृत्तिहेतुत्वादिकस्यान्वये पि समी
हितसाधनत्वरूपविशेषः शब्दार्थः। तत्र ज्ञातस्यैव प्रवृत्त्युपयोगात् सामान्यज्ञानस्य तु तत्रानुपयोगादिति प्रथमार्धस्य तात्पर्यमिदं परमतमुक्तं।
उत्तरार्धं तु स्वमतप्रतिपादनपरं तथा स्वपक्षमेव व्याचष्टे प्रवर्तनेति। विशेषस्य शब्दार्थत्वे गोत्वादिदोषात् सामान्यस्यापि विशेषपर्यवसानद्वा
रा प्रवृत्त्युपयोगाच्च सामान्यस्यैव शब्दार्थत्वमित्यर्थः। नन्वभिधाभावनामाहुरिति वदता आचार्येणाभिधाव्यापार एव लिङर्थ इति मतमिति
प्रतीयत इत्याशंक्य तदपि प्रतिपादितपक्षमेवानुगुणतया व्याचष्टे अभिधाभावनामिति। समीहितसाधनत्वगतप्रवर्तनैवाभिधानयोग्यत
याभिधाशब्देनोच्यते। तां लिङादयो वदंतीत्यर्थः॥ अभिधेयस्याभिधाशब्देनाभिधानं क्लिष्टमिति मत्वा प्रकारान्तरेण व्याचष्टे अथवेति॥
ननु शब्दव्यापारस्य प्रवर्तनात्वं भवतो न संमतं प्रैषाध्येषणादिगतायाः प्रवर्तनायास्तु कथं शब्दव्यापारत्वमित्यत आह परसमवेतापीति।

तत्फलोपकारत्वेन तदभिधेयत्वान्नङ्गताया अपि तस्मात्तद्व्यापारत्वमुपचर्यत इत्यर्थः। अन्यसमवेतस्यान्यव्यापारत्वकल्पनमपि क्लिष्ट
६२ मेवेति ततो ऽपि प्रकारान्तरेणाख्यातमहाय वेत्ति लिङ्प्रत्ययस्य योऽर्थः तदभिधानमभिधा सैव भावना तां लिङादयः कुर्वन्तीत्यर्थः
कथमभिधानस्य भावनात्वमित्यत्राह भूतिकर्तृत्वमिति भूतिः उत्पत्तिः तदनुकूलो व्यापारः इत्यादनापरनामधेयः करोत्यर्थो भाव
62 नेत्यर्थः। नन्वाकुरित्यस्य कथं कुर्वन्तीत्यर्थः इत्याशंक्य प्रयोगं दर्शयति। उदनपाकमिति। यथा पाकं पचतीत्युक्ते पाकं करोतीत्यर्थो
भवति। तथा अभिधानमाकुरित्युक्ते अभिधानं कुर्वन्तीत्यर्थो भवतीत्यर्थः। पूर्वमाख्यानद्वये अर्थभावनागता प्रवर्तनारूपेष्टसा
धनतैव लिङ्वाच्या शाब्दभावनेत्युच्यते अस्मिंस्तु पक्षे एतादृशेष्टसाधनताभिधानं शाब्दव्यापारो लिङाद्यनभिधेयमेव शाब्द
भावना प्रवर्तनारूपविधित्वादन्यैव शाब्दभावनेत्युक्तं भवति॥ अमुमेव पक्षमाश्रित्य शाब्दभावनास्वरूपं तस्यार्थभावनायां च सा
कांक्षान्वयसंभवात् अंशत्रयान्वयं च प्रतिपादयति तदेवमिति पुरुषप्रवृत्त्यर्थमिति। पुरुषप्रवृत्त्यर्थं लिङादिशब्दप्रयोगात्तेन प
दार्थाभिधानं तस्य प्रवृत्तिरेव फलमित्यर्थः। यागादिवदिति यथार्थभावनायाः स्वर्गार्थप्रवृत्ताया यागादिकमनिष्पाद्य तन्निष्पादना यम०
योगात्परार्थप्रवृत्तव्यापारव्याप्यत्वरूपकरणलक्षणसंभवेन यथा तस्या यागादिः करणं तद्वत्प्रवृत्त्यर्थप्रवृत्ताया शब्दभावना
या भाव्यरूपप्रवृत्तेः समीहितसाधनत्वमनवगम्य तद्धेतुत्वायोगात् तज्ज्ञानं तस्याः करणमित्यर्थः। प्राशस्त्यज्ञानं त्विति अर्थ ६२

वादादिमिनिदंप्रशस्तं कर्मेत्यवगते तत्रोत्कटापष्टनिजापत्तइति प्राशस्त्यतानतस्याः फलोपकार्यंगमित्यर्थः ननु यदि प्रवृत्तेनैव वि
ध्यर्थः तर्हि प्रवर्तनाकर्तव्यतयोरुभयोरपि शाब्दत्वे तत्र तत्र लिङ्गाच्यत्वव्यत्वव्यवहारः कथमित्याशंक्याह प्रवर्तनेति इष्टसाधनत्व
यः प्रवर्तक तयोरुभयोरपि शाब्दत्वे तत्र तत्र लिङ्गाच्यत्वव्यत्वव्यवहारः कथमित्याशंक्याह प्रवर्तनेति इष्टसाधनतायाः प्रवर्तकत्वव तदुक्त्य
देश्यत्वस्यापि संभवात् प्रवर्तनात्वं कार्यत्वमिति वैयद्व्यमपि संभवतितत्त्वयेनकेनापि विशेषेणेष्टसाधनत्वैवाभिधीयतेइति नातिवैषम्यमिति न
विरोध इति भावः। उक्तं दोषांतरमपि परिहरति नचेति प्रवृत्तिनिमित्तं वाच्यं। तद्वेदमेवोपपादयति इष्टसाधनेति उक्तेषु चतुर्ष्वपि पक्षेषु चरम
विधिः श्रेयानित्याह तदिदमिति प्रथमद्वितीयपक्षवत् तृतीयपक्षेपि न न्याय्यं ग्रंथस्याह। स्वव्यापारेति अस्मिन् पक्षे आत्माद्यनयादिपरिहारो
ऽनुपपाद इति भावः। नन्वस्य पक्षस्याभिधाभावनामाहुरित्याचार्यग्रंथानुगुण्यं कियत इत्याशंक्य एतद्धाक्यस्वारस्येपि ग्रंथांतरानुगुण्यं नास्ती
त्याह ग्रंथानुनयेति ब्राह्मणं न हन्यादित्यत्र ब्राह्मणगतं लिंगं विवक्षितं उताविवक्षितमिति विचार्य पुंस्त्वादविवक्षाहारणाभावाच्च विव
क्षितमित्याशंक्य कथमत्र वचनव्यक्तिः किं यो ब्राह्मणस्तस्य हननं कुर्यादिति नञर्थस्य निषेधस्य विधिः उतन्यन ब्राह्मणहननं कुर्यादिति त
त्रेति विधेः प्रतिषेध इति किल प्रथमे तूद्देश्यविशेषणत्वाल्लिंगमविवक्षितमित्युपपाद्य द्वितीयेप्यविवक्षामुपपादयता आचार्येणाविध्य
र्थमित्यादि ग्रंथः पठितः तद्विरोधोस्य पक्षस्येत्यर्थः निषेध्यतूपार्थस्य ब्राह्मणाहननस्य प्राप्त्यर्थं प्राप्ति प्रयोजनकं प्राप्तिहेतुभूतमिति यावत्

त्वाहरांविध्यर्थमपिअनूद्यप्रतिषिध्यमाननिषेधोनलिंगंप्रतिषेधुंसमर्थइत्यर्थः अयंभावः नत्वेकेननिषेधेनवहवोवधानिषेद्धुंशक्यंतेगौरव
६३ प्रसंगात् ततश्चत्रावश्याहननं अपसविधिप्राप्तत्वात्ताप्यकंविध्यर्थंचानूद्यप्रतिषेधेनिधस्यलिंगरूपार्थान्तत्रनिषेधकत्वंनयुज्यतइतिन्याय
नुगुणपापाभावमेवदर्शयतिमदिष्टीतिहननेहिगृहेषादिभिःस्वयमेवप्रवर्ततेननुविधिवाक्यात्अस्तोलिङ्व्यापारस्यतत्रवर्त्तकत्वपाप्र
त्पाभावात्तदनुवादोनद्वष्टइत्यर्थः।ननुभवतोपिनग्रंथानुगुण्यमस्तितथाहि।किंतन्निषिध्यतेहननस्यकर्तव्यत्वंवासमीहितसाधनत्वं
63 वानाद्यःभवन्मतेकार्यत्वस्यलिङ्र्थत्वाभावेनविधिप्रत्ययेनतदनुवादायोगात्रनद्वितस्यनिषेधायोगादितिशंकतेनन्वितिद्वितीयेतुप्र
त्यक्षमुखसाधनइष्टसाधनत्वात्तन्निषेधोशक्यइत्याहसमीहितेतिप्रवर्त्तनैवविध्यर्थः।ननुकार्यत्वमितिनास्माभिरुक्तंकिंतुप्रवर्तना
कार्यतावाविध्यर्थइत्युक्तंततश्चहननेसमीहितसाधनत्वस्यनिषेद्धुमशक्यत्वेपितद्वैतुकयोःप्रवर्त्तनाकार्यत्वयोःमहानर्थसाधनत्वात्नि
षेधःशक्यइतिविध्यर्थनिषेधोस्मन्मतेशक्यएवेतिपरिहरतिउच्यतइतिकथंतदुभयंहननेनास्तीत्याशंक्याहानहीतिअनर्थसाधनमुद्दि
श्यप्रवृत्तेरप्रवृत्तेःप्रवृत्तिप्रवृत्तिहेतुत्वंप्रवृत्त्युद्देश्यत्वंचनसंभवतीत्यर्थः।ननुपक्षत्रयमपिनास्तितर्हिप्राप्त्यभावादेवसुतरांतत्रानूद्यनिषेधोनोप एम०
पद्यतइत्याशंक्याथांसवगततयोर्निषेधइत्याहयेत्वितितस्माच्चतुर्थएवपक्षःश्रेयानितिनिगमयति।तस्मादितिप्रकरणार्थमुपसंहरति
न्यायगमेतिन्यायागमोग्रंथः॥ ॥इतिरामानुजाचार्यविरचितेन्यायरत्नमालाव्याख्यानेनायकरत्नेविधिनिर्णयव्याख्यानं॥ ॥संपति ६३

ष्ठाध्यायस्य सर्वशक्त्यधिकरणे बहुविवादसंभवादाचार्यमते न तदधिकरणमानं च पितु प्रतिजानातीति दृष्टो तिलक्षणांस्तद्रूपं विशेषो भे
दः सामान्ये नाधिकरणारंभप्रतिः ज्ञापपूर्वपक्षं निराकरणार्थमतान्न निराकरणमपि प्रतिजानातीति केचिदिति। अधिकरणपूर्वपक्षवा
दिनः स्वाएकदेशिभिः प्राभाकरैः। तेषामेवेति। अयुक्तत्वाद्वात्ताभिधानात्पूर्वपक्ष एवास्यापि तत्स्यादित्यर्थः। तत्र पूर्वपक्षमाह तत्रेति। वि
नियोगानुसारेणेति। अंगविनियोगक्रमं पर्यालोच्य तत्र तत्रांगे तस्य तस्य शक्तिरिति निश्चित्य सर्वेष्वप्यंगेषु यस्य याशक्तिस्तस्यैव तत्राधि
कार इत्यंगविनियोगोत्तरकालमेव तदनुसारेणात्राधिकारो निश्चेतव्य इत्यर्थः। सर्वत्रेति। उभयत्र न्यायसाम्यादित्यर्थः। न्यायसाम्यमे
वतिर्यगधिकरणसिद्धान्तोपजीवनेनोपपादयति सोऽकंता सर्यतो आचष्टे यस्मिन्कर्मणीत्यादिना तिर्यगधिकरण इति। तत्र त्वेधयंद्वा
दीनामाश्रावेषणाविष्णुक्रमाद्यंगानुष्ठानशक्त्यभावादनधिकार इति प्रतिपादनादविशेषेण सर्वत्र सर्वांगानुष्ठानसमर्थस्यैवाधिका
र इति प्रतिपादितं स्यादित्यर्थः। तिर्यगधिकरणसिद्धान्तमेवोपपादयति सामग्रीति। तत्वात्फलसामग्रीत्वात्। ननु सर्वेषामप्यंगानां फलसाम
ग्र्यनुप्रवेशः कथमित्याशंक्यांगिना प्रकरणपठितानामंगानां समुच्चयेन ग्रहणादित्याह समुच्चितानामिति। ननु कथं समुच्चयेन सर्वेषां
ग्रहणमवसीयते तेषामेकैकस्यैव विकल्पेन ग्रहणं किमिति न स्यादित्याशंक्य तत्र दोषमाह कल्पान्तथाग्रहणं न युज्यत इत्याह। अन्यथा ही
ति। विकल्पाश्रयणे हि विकल्पितेष्वंगेषु शक्तस्याशक्तस्य चैकमेवांगमनुष्ठेयमिदं गजातं नियमेन परित्याज्यमिति न भवदभिमतपर्याप्ति।

६४ प्रयोगस्त्विष्यतीत्याह विकल्प्यत इत्येति। विकल्पितस्यापि नत्व्यतिरिक्तस्य। तिर्यगधिकरणन्यायसाम्यात्काम्यवन्नित्येपि सकृत्फलांगोपसंहारमु
पपाद्येदानीं नित्ये कतिपयांगपरित्यागांगीकारेन्यायसाम्यात्काम्येपि तत्प्रसंगमापादयति। यच्चेति। नित्यकाम्ययोर्न्यायवैषम्यं कर्तेत
न्वितिः। अवश्यकर्तव्यत्वावगमादिति। यदा निमित्तमुपतिष्ठते तदा सामर्थ्ये सत्यसति वा प्रधानानुष्ठेयत्वमवगम्यत इत्यर्थः। अ
64 करणेचेति। अंगोपसंहारशक्त्याभावादननुष्ठाने तदवश्यकर्तव्यत्वं विहन्यत इत्यर्थः। फलसाधनत्वं प्रत्यवायपरिहारलक्षणफल
साधनत्वं। विरोधाभावादिति निमित्तश्रवणोक्त विरोधो नास्तीत्यर्थः। निमित्तश्रवणादवश्यकर्तव्यत्वावगमेपि नित्यस्याशक्ताधिका
रत्वं न प्रसज्यत इति परिहरन्ति नेति सर्वशक्तियुक्तः सर्वांगानुष्ठानशक्तियुक्तस्यैवाधिकार इति तिर्यगधिकरणनिर्णयादिति भावः
नित्ये शक्तिरधिकारिविशेषणं न यानसाक्षाच्छ्रूयते किंत्वंगाम्नानादनुमीयते निमित्तत्वं तु प्रधानवाक्ये श्रूयते अतस्तद्युक्तस्यैवाधिका
रो निष्पन्नः अनुमेया तु शक्तिस्तदनुरोधादेवानुमेयेति सर्वशक्तियुक्तस्यैवाधिकार इति नियमो नास्तीत्याशंकते नेति निमित्तवाक्य इति। तर्हि का
म्येपि प्रधानवाक्ये फलकामिनोधिकारावगमात्तत्राप्यंगसंकोचः स्यादिति न्यायसाम्येन परिहरति तर्हीति। प्रधानवाक्यश्रुतनिमित्तवशेनां
गसंकोचेऽतिप्रसंगमप्याह यदि चेति। विद्याविरहितानां वेदाध्ययनविरहितानां तदधिकारः स्यादिति। ततश्चापशूद्राधिकरणविरोध इति ना राम०
वः ततश्च नित्ये काम्ये च सर्वशक्तियुक्तस्यैवाधिकार इति सिद्धमित्युपसंहरति। तस्मादिति। एवमंगीकारे सत्येवाचार्योक्तासंगतिस्स्या ६४

गच्छेत इत्याह अत एवेति। उक्तेर्थे आर्यवाचामपि संवादयति तदुक्तमिति। कार्ये शक्त्यवगमे अधिकारस्तच्छक्तियुक्तस्येति शेषः। एवं संग
तिसंभवाद्द्वयस्य प्राप्तिरेव बाधस्य संगतिरिति प्राभाकरमतमयुक्तमित्याह एतेनेति। लक्षणां स्वरूपं। पूर्वपक्षमुपसंहरति· तदिति।
इत्थं स्वमते न पूर्वपक्षमुक्त्वा पराभिमतं तत्राद्यान्तं दूषयितुमनुवदति केचिदिति। भावार्थः प्रथममपूर्वप्रतिविषयतया चापपश्चात्तस्यैव क
रणतयाप्यन्वेतीत्येतन्नित्ये काम्ये च समानं तथा च काम्ये भावार्थः प्रथमं फलं प्रतिकरणत्वेनान्वीयते तस्मामेव वेलायां करणस्येति कर्तव्य
तासाहित्यात्तस्यैवांगैः संबध्यते पश्चादपूर्वप्रतिविषयतया ततो पिपश्चात्तं प्रतिकरणतया एवं च पूर्वमेव सकलांगान्वितस्यापूर्वविषयत
यान्वयादंगलोपे विषयविलयादपूर्वप्रतीतिरेव न निर्वहेदिति सकलांगोपसंहारः नित्ये तु फलाभावेन प्रथममेवापूर्वविषयतयान्व
ये पश्चात्करणतया चान्वये सति ततोंगैः संबंधः ततश्चांगान्वयात्पूर्वमेवापूर्वविषयत्वादंगलोपे विषयाविलयादपूर्वप्रतीतिर्निर्वहेदिति
कतिपयांगत्यागेपि न कश्चिद्दोष इति यथाशक्तिप्रयोग इति काम्यनित्यमेद इति केचिदूदंतीत्यर्थः। अपूर्वस्य फलानुकूलत्वेहि भावार्थस्य फ
लकरत्वमेवेणापूर्वविषयत्वं पुज्यते फलानुकूलत्वं तस्य फलकामिनियोज्यसंबंधाधीनं तत्संबंधश्चाकांक्षामूलइति तमाकांक्षाक्रममेव क्रमा
रभते· कार्यरूपं तावदित्यादिना। अपूर्वं वाक्यार्थः तस्य नियोज्याकांक्षा कथमित्याशंकतामुपपादयति तच्चेत्यादिना। अपूर्वस्य कृतिसाध्यत
लिङ्· प्रत्ययेनैव प्रतीतं सा च कृतिस्साक्षादपूर्वंगोचनयितुमशक्यमा भावार्थमेव विषयीकरोतीति तस्सिध्यर्थं च कर्तारमपेक्षते स चाधिकारीत्यास

वनियोज्यमित्येतेन द्वारेणापूर्वस्य नियोज्यापेक्षेत्यर्थः। एवं विधेष्वसाक्षाद्देहव्यापाररूपासु क्रियासु प्रवर्तमानः सचेतिकर्मणाम दर्थमिदं
६५ कर्मेति स्वात्मन्यवानाधिकारीत्यर्थः एवं विधेष्वसाक्षाद्दृष्टफलं साधयत्सु दर्शादिषु। नन्वस्तु नियोज्यापेक्षा तथाकार्यार्थैकरणे तस्मिन ज्ञाते लौकि
ककार्यं इवास्येदं कार्यमिति प्रतिपादकनियोज्यापरवचनमन्तरेणापि तत्र ममेदं कार्यमिति प्रतीतिप्रवृत्ती स्यातामिति द्रियोज्यपरशब्दो व्यर्थ इत्या
65 शंक्य लौकिककार्यादस्य विलक्षणत्वान्नियोज्यपरवचनमन्तरेण प्रतीतिप्रवृत्ती न स्त इति सार्थकमेव वचनमित्याह न चापूर्वमिति। प्रमाणान्तरे
णान्वयव्यतिरेकाभ्यां। तदर्थिनस्तु स्वदुःखपरिहारार्थिनः। तत्साधन इति। अतत्साक्षात्स्वहेतुस्यायोग्यत्वेन तत्साधनेधिकारजननद्वारा प्रवृत्तिर्भ सा
वतीत्यर्थः एवं अधिकारस्य नियोज्यापेक्षामुपपाद्य तत्संबंधादपूर्वस्य फलानुकूल्यमुपपादयितुं नियोज्यस्वरूपं च तदवांतरभेदं चाह सचेति। अनु
पादेयमननुष्ठेयं अनुसन्नं कालान्तरभाविबात्। स्वरूपेणेति। विशेष्यसंबंधव्यावर्तकं खलु विशेषणं तदानीमसतस्तु विशेषणत्वं न युज्यत इ
त्यर्थः। नियोज्यस्य फलानुकूल्यमुपपादयति फलकाम इति। कामनानुगुणं काम्यमानसाधनमेवेत्यर्थः। प्रधानस्यापीति यदि फलकामः फलार्थं
प्रवृत्तस्तत्सिध्यर्थं तदुपायतया तस्य कार्यत्वमवगच्छेत् तथा भवेत्तस्योपसर्जनत्वं न त्वेवमस्ततः कार्येत्र फलकामस्य नियोज्यतया प्रतिपादनात्तत्सं
बंधार्थं तस्य फलार्थत्वं भवति न तु फलोपायतया तस्य कार्यत्वमिति न तस्य प्राधान्यभंग इत्यर्थः नियोज्यस्य फलानुकूल्यं प्रतिपाद्य फलकरणी राम·
भूतस्येव भावार्थस्य विषयत्वमुपपादयितुं नियोगस्य विषयान्वयक्रमं दर्शयति तच्च कार्यमित्यादिना। अनिरूपणादिति केनाप्यवच्छेदकेन भा ६५
व्यमिति शेषः। प्राधान्येनेति। कश्चिदन्यस्याविभावार्थानुषंगादवच्छेदकत्वं भवतीति भावः। स्वरूपेणेति। अन्यस्यप्रतीतमप्यवच्छेदकत्वं भावार्थद्वारा

निवोढव्यमिति भावः। इतोऽभीवार्थावच्छेदनियमः कथमित्याशंक्य तदनवच्छिन्नायास्तस्या लोके कुत्राप्यदर्शनादित्याह न त्वित्ति। न प्र
यत्नः प्रयत्नात्मना स्वरूपेण प्रतीयते किंतु पाकप्रयत्नो गमनप्रयत्न इति क्रियानुरक्त एव वेशेषोऽस्यर्थः। क्वचिद्भावार्थादन्यस्य विषयत्वं भा
वार्थहानकमित्याह क्वचिदिति। अनुमात्येचतुंनाकायेवतु मित्यादिषु शब्दत्वस्य वशावलाद्द्रव्यदेवतासंबंधः सिद्धरूप एव नियोगस्य
विषयतया चेतितन्निर्वाहस्तु पागमंतरेणात दभावान्नहाण भवतीत्यर्थः। उपपादितं नियोगस्य भवार्थावच्छेदकत्वं निगमयति त
देवमिति। अस्त्ववच्छेदकतयान्वयस्तथापि विषयतयान्वयः कथमित्याशंक्यायमेव विषयान्वय इत्याह अवच्छेदक इति करणत्वव
द्विषयत्वं नियोगस्योत्स्यानुसंबंधिनवत्ति किंतु प्रतीत्यनुसंबंधीत्याह प्रतीतिकुतस्तत्राह अनवच्छिन्नमिति। अस्त्वेवं प्रकृते किं तत्रा
हस्यचेतिशंक्यातेधिगंतुमिति भावार्थस्य प्रथमप्रतीतस्य फलोपायत्वं नियोगस्य फलानुकूलस्य विषयत्वे विनापयाती त्युपायत्व
वेषस्यापि विषयानुप्रवेशोंगीकार्य इति भावः। अस्तूपायस्यापि विषयानुप्रवेशः सर्वांगोपसंहारः कथमित्याशंक्याह तदुपायतेति उ
पायत्वाभाव इति कर्तव्यतासाध्यानुग्रहाभावे करणत्वमेव ननिर्वहेदित्यर्थः। तद्बलेन कार्यप्रतीतिनिर्वाहवलेन काम्येष्व सकलांगो
पसंहारमुपपाद्य निष्फलकामिनो नियोज्यत्वाभावेन भावार्थस्य फलोपायत्वाप्रतीतेर्नियोगस्यापि फलानुग्रहणाभावात्स्वरूपेणो
व विनियोगविषयत्वं नांगस्यमेतत्स्येत्संगलोपे विषयाविलयाद्यथाशक्ति प्रयोगः सिध्यतीत्याह नित्येष्वित्यादिना प्रथममिति कर

६६ णत्वावगमादंगस्याहि तस्यापूर्वमित्यर्थः एवंच फलाभावेन तंप्रतिकरणत्वाभावादपूर्वं प्रत्येव विषयतयान्वितस्य पश्चात्करण
त्वं पर्यवस्यतीत्याह प्रतीतेति इतेत्येति योगस्य न साक्षात्करणापेक्षा अक्रियात्मकत्वात् इतेस्तु क्रियारूपतया करणाकांक्षेति
तद्वारा नियोगस्यापि तदाकांक्षेत्यर्थः ॥ ननु क्रियायाः साधकतमं करणं अत्र च भावार्थः इति रूपक्रियायाः साध्य एव न तु साधकः ॥ अ
तस्तस्य इतिकरणत्वमयुक्तमिति शंकते कथं पुनरिति यदा इतेर्भावार्थनिष्पत्तिरेव फलं तदा भावार्थः साध्यतया कर्म न तु साधकः
66 यदा त्वपूर्वनिष्पत्तिः फलं तदा इतेरपूर्वार्थप्रवृत्तत्वात् न साध्यो भावार्थोऽन्यार्थप्रवृत्तकतिव्याप्यः करणं भवतीत्युत्तरमाह तदवच्छिन्ना
याइति तदवच्छिन्नया तद्विषयया अर्पितया अपूर्वनिष्टफलसाधकत्वात् यथाविधस्य परार्थप्रवृत्तव्यापारसाध्यस्य तदेव दृष्टांतमुखे
नोपपादयति यथेति उद्यमननियतने एव पदोर्ध्वाधोदेशसंयोगफलावच्छिन्नवाचिभ्यामुद्यच्छति नियच्छतिभ्याम् अभिधीयेते तदा तत्फ
लाश्रयतया परशुरेव कर्मपदार्थ नतु ते एवोद्यमननियतने द्वैधीभावफलावच्छिन्नाभिधायिनाच्छिन्नत्तिनाभिधीयेते तदा फलाश्रयका
ष्ठं कर्मपरशुस्त्वन्यार्थप्रवृत्तव्यापारव्याप्यतया करणं एवमेव भावार्थस्य इतिप्रतिकरणत्वं अपूर्वस्य तु कर्मत्वमित्यर्थः ॥ लोष्टवि राम
षय इति तत्रोद्यमनयोर्द्वैधीभावफलावच्छिन्नाभिधायि नाच्छिन्नत्ति कर्मत्वाभावात् नयोर्लोष्टं कर्मैव न तु करणमित्यर्थः ॥ अतो भावार्थस्य इ ६६
तिकरणत्वं न इतेः किमायातं तत एवमिति कतिपयांगावैकल्येकर्मानुष्ठापकं नियोगं दृष्टांतयति नियोगे वैदिते एवेति यथा वैदितो नि

योगः प्रत्याम्नातप्रतिषेधत्वप्रसंगविधुरमेव कर्मोत्पादयति तथा अशक्यांशविधुरमेव कर्मोत्पादयति नित्यो नियोग इत्यर्थः। गुरुम
तेनाहृतं तद्दूषयितुमुपक्रमते। तदेतदिति। आपातदृष्ट्या सुवर्णमिव प्रतिभाति सूक्ष्मदर्शने तु न सुवर्णमित्यर्थः। आरकूटं नाम सुवर्ण
सदृशो लोहविशेषः। तन्मतेष्टौ दोषान्प्राधान्येन कथयति श्लोकद्वयेन तत्राद्यं विवृणोति विप्रकृष्टं हीति। कृतिवाक्ये कृतिरत्र समानप
दोपादानं। न वयमपूर्वं विषयान्वयात्पूर्वमेव फलसाधनतया तद्धेषस्य विषयानुप्रवेशं वदामः येनैवमुपालभ्येमहि किं तु प्रथममेवा
पूर्वान्वयेऽपि तस्य फलोपायत्वात् भावार्थस्य तद्विषयत्वं तस्यापि फलसाधनत्वमंतरेणानुपपद्यत इति विषयभूतस्य फलसाधनत्वमपि
अवश्यंभावीति तद्धेषस्यापि विषयानुप्रवेशांगीकृत इत्याशंकामनूद्य दूषयति यद्यपीति। अवश्यंभावित्वात्प्रथममेव तदवगम्य विषय
त्वमवगंतव्यमिति तस्य तस्य विषयानुप्रवेशः कथ्यते अथवा पश्चात्तस्य फलकरणत्वमवश्यमुपनिपततीति तस्यापि विषयानुप्रवेश
इति विकल्प्य प्रथमं नियमासंभवेन दूषयति तथापीति तदेव दृष्टांतमुखेनोपपादयति न हीति। द्वितीये तु पक्षे पश्चाद्भाविनः प्राथमिकवि
षयानुप्रवेशो नोपपद्यत इति अंगलोपेन विषयविलयः स्यादित्याह तेनेति ननु पश्चाद्भावित्वेऽप्यावश्यकत्वाद्विषयानुप्रवेशः स्यादेवेत्या
शंक्य तर्हि नित्ये फलकरणत्वाभावेऽपि अपूर्वकरणस्यावश्यंभावात्तस्यापि विषयानुप्रवेशः स्यात् तथा च तत्रापि सर्वांगोपसंहारः स्यादि
त्याह यदि चेति विप्रकृष्टप्रमाणप्रतिपन्नत्वाच्चरमनिरूपणत्वं नित्ये विशेषमाशंकते परस्त्विति कामाधिकारादन्यत्सर्वमिह नित्यत्वेन वि

वक्षितं फलं भावात् तत्तच्छ्रवणावगुरे न हन्यादित्यादिष्ववगोरणादिप्रवृत्त एव सामर्थ्यलभ्यो नियोज्यः नञर्थो विषयः । तस्य च प्रवृत्ति
६७ रूपत्वाभावात्करणत्वं नास्तीति विषयीभूतस्य करणत्वमावश्यकं न भवतीत्यर्थः । तर्हि काम्येष्वेतावत्समानमिति परिहरति । सर्व
त्रद्रव्य इति शब्दोपात्तत्वात् तद्द्रव्यदेवतासंबंध एव विषयः सिद्धरूपत्वात् न करणं तदाश्रितो भावार्थ एव तत्करणमिति तत्रापि नियोज्यो
नास्तीत्यर्थः । ननु द्रव्यदेवतासंबंधस्य स्वतः सिद्धरूपत्वेनाविनाभूतस्य भावार्थस्य करणत्वात्तदनुरागवेषेणास्यापि विषयत्वात् तत्र वि
67 षयीभूतस्य करणत्वमावश्यकमिति शंकते सचेदिति एवं चेन्निषेधाधिकारेपि नञर्थस्य सिद्धत्वेपि प्रवृत्तस्य नियोज्यत्वे न सिद्धौ तान्नि
वृत्तेर्व्यापाररूपतया तस्य करणत्वात्तदनुरक्तस्यैवास्यापि विषयत्वमविषयस्याकरणभावनियमो नास्तीति परिहरति तं प्रति रूपादि
ति एवं तु नित्ये काम्येपि फलं का ऽपूर्वं वा प्रति करणीभावस्यावश्यकत्वादुभयत्रापि विषयप्यदेवकरणीभावइत्संगतत्वेपि न प्रथमप्रतीतवि
षयविलयः काम्ये तु उपेयफलकरणत्वस्य विप्रकृष्टवाक्यप्रमाणावगततया पश्चाद्भावित्वमेवेत्याह तस्मादिति भावार्थस्य पदस्य तु
पात्तादपूर्वात्फलं न केवलं वाक्योपात्ततयाविप्रकृष्टमपि तु प्रकारान्तरेणापीति पुनरपि विप्रकर्षान्तरं दर्शयति लक्षणानि भिन्नइत्यादिना रामः
अपूर्वस्य माध्यत्वमाभिधानिकं यागस्य वस्वरूपेणैव विषयतयान्वयः स्वर्गस्य तु साध्यत्वं यागस्य साधनत्वं च लाक्षणिकं तत्प्रतिपादकश
ब्दाभावात् अनुपपत्तिमूलत्वाच्च ततश्चाभिधानिकान्वयात् लाक्षणिकान्वयस्य विप्रकृष्टस्य प्राथमिकत्वं वक्तुं न युज्यत इत्यर्थः । आनुमा ६७

निकमपिविप्रकर्षंक्वचिद्दर्शयतियत्रचेति।साक्षाच्छ्रुतस्यद्रव्यदेवतासंबंधस्ययत्किंचित्कल्पनामंतरेणैवापूर्वविषयत्वेसंभवतितिततःपूर्व
मेवानुमानिकस्ययागस्यकरणत्वेनापिपरिकल्पितस्यफलेनान्वयोनयुज्यतइत्यर्थः।तत्त्वंयाद्येतिदेवतामुद्दिश्यत्यक्तेद्रव्येयथातस्यद्रव्यदेव
तासंबंधोनिर्वाह्यतइतितस्ययागसंपाद्यत्वंसाधनभूतयागानुमानाद्विप्रकर्षमभिधायसाध्यभूतयागानुमानादपिविप्रकर्षमाहविश्वजिदादा
विति।नियोज्यंपरिकल्प्येतिफलानुमानमपिनसाक्षात्।किंतुनियोज्यकल्पनाद्वारेणेत्यसंतविप्रकर्षइत्यर्थः।विश्वजिदादौनकेवलंविप्रक
र्षमात्रेणफलकरणीभूतयागस्यविषयत्वानुपपत्तिः।किंतुचक्रकप्रसंगादपीतिप्रतिपादयितुंउपोद्घातमाह।किंचेत्यादिनानुविषयेनि
रूपितेपियस्थानत्रतिपन्नएवनियोगोनियोज्यकल्पकः।स्यादित्याशंक्यतदानींचक्रकंस्यादित्याहकरणीभूतइति।एवंचक्रकमयात्कर
णान्वयात्प्रागेवतत्रविषयान्वयोंगीकार्यइतियथाशक्तिप्रयोगःस्यादित्याहतेनेति।यदिमागस्यविप्रकृष्टेनफलेनान्वयेसतितदन्वि
तेनरूपेणापूर्वविषयत्वंतर्हितत्समानविप्रकर्षेवर्तत्वंतरेणापिप्रथममेवान्वयःतदन्वितेनवरूपेणापूर्वविषयत्वंस्यात्।विप्रकर्षस्य
तुल्यत्वादितिदूषणान्तरमप्याह।किंचेति।विप्रकर्षसाम्येपिनियोगस्यफलाधीनसिद्धित्वमेवपदस्यविशेषइतिशंकतेतदधीने
ति।परिहरतिनेति।शंकोत्तरेस्वयमेवविवृणोतिस्यादेतदित्यादिग्रंथंभावःतत्रावल्लिङ्शब्दमात्रेणप्रथमंनियोगःप्रतीयतेरूढव्यवहा
रेतत्रमुख्यस्यभावात्किंतुयागस्यैवफलसाधनत्वेप्रतीतेफलस्यकालान्तरभावितयातदनुपपत्तेःस्यात्तुर्नियोगःसिद्ध्यतीतिनियोगःफ

लाधीनसिद्धिकइतितत्सिद्धेः पूर्वमेवयागस्यफलसाधनत्वंप्रतीतं ततोनियोगस्यफलानुकूलतयातद्विषयागस्यापिफलसाधनत्वंप
६८ 68 श्चादप्यावश्यकमितिप्रथमप्रतीतफलोपायत्ववैपरीत्येऽविषयत्वमितिफलपदस्यसोमपदाद्विशेषोक्तीतियस्मादितिनियोगमंतरेणा
यागस्यफलसाधनत्वमनुपपन्नमितिवचनस्यनियोगावगतेः पूर्वमेवयागस्यफलसाधनयान्वयोभवतीतिवचनस्याचान्योन्याह
तिरित्यर्थः फलकरणीभूतस्यविषयत्वाभावेप्यंगलोपेविषयविलयंकश्चिदुपपादयंश्चकारतन्मतमनुवदतिकश्चिदितिफलकाम
स्यकार्यतयाप्रतीतोपिनियोगः तस्यहिसाध्यफलानुमितासामान्येनप्रतीतातत्सामग्रीयोग्यतयाविषयत्वेनसंबध्यतेकासामग्रीतिविशे
षाकांक्षयाखंगप्रधानवाक्यैः करोतिकर्तव्यताज्ञानंतद्विषयत्वेनोपस्थाप्यतेएवंचयागस्यप्रथमततएवविप्रकृष्टेनफलेनाचपादंगा
नामपिसामग्र्यनुप्रवेशात्तल्लोपेविषयविलयश्चभवतीतिनकश्चिद्दोषः नित्येतुफलाभावेनतत्सामग्र्याश्चाप्यभावात्समानपदोपात्त
स्ययागस्यैवविषयत्वात्तदंगलोपेविषयविलयइतिभावः सामग्र्यवच्छिन्नस्येतिप्रथमंतत्सामान्येनसामग्रीविषयकनियोगस्यसाम
ग्रीविशेषापरिज्ञानेनकोसौसामग्रीविशेषइत्यपेक्षायांयागस्यसामग्रीविशेषतयापश्चाद्विषयत्वंदूषयतितस्यापीतिविश्वामित्रेणाप्र
युक्तंनिजमपूर्वविधौतितदितु॰ मुखंब्रह्मास्त्रंवसिष्ठप्रयुक्तोब्रह्मदंडोग्रसदितिश्रीरामायणोप्रसिद्धंतत्कृद्दास्येणोक्तमयमेवब्रह्म राम॰
दंडइतिविप्रकर्षमेवाहनखल्वितिनियोगोहिसमानपदोपात्तेनसाक्षात्तुतेनविषयीभावयोग्येनयागेनान्वयंतस्मात्ततः पूर्वमे ६८

वपदांतरोपात्तयाफलानुमितया तत्सामग्र्यान्वयः पदांतरोपादानानुमानलक्षणाविप्रकर्षद्वयेन नयुज्यत इत्यर्थः ॥ यथानुयाग इति
। पूर्वीययादित्तसमानपदश्रुत्येत्यर्थः प्रसिद्धेति प्रसिद्धो मार्गः फलकरणीभूतस्य पश्चान्नियोगविषयत्वं तत्रेत्यर्थः । द्वितीयं दोषं वि
वृणोति । यदि चेति अनुपपत्त्येति यागस्य कार्यत्वानुपपत्त्या स्वलु स्थिरकार्याभिधानाश्रयणं तदभावे तत्राश्रयणीयमिति भावः
। तदभिधानांगीकारेपि तृतीयदोषान्नमोक्ष इत्याह सिध्यत्विति । अंगानियोगवत्प्रधानोत्पत्तिनियोगवचेत्यर्थः अंगप्रधानोत्पत्तिवा
क्येषु प्रधाननियोगानुवादशंकया न प्रथममपूर्वांतरं प्रतीयते किंतु यागस्वरूपमेवोपस्थाप्यते उपस्थितेषु तेषु ग्राहकग्रहणोसंजाते प
श्चात्तेषां साक्षाद्ग्राहकान्वयायोगाद्द्वारभूतान्यपूर्वाण्यंगीक्रियंते तानि च विनियुक्तविषयतया गुणीभावावश्यंभावात्प्रधानाभिधायिना
पिलिङ्‌शब्देन लक्षणाया गुणत्वेनाभिधीयंत इति हि मवराद्धांतः एवमंगीकुर्वतात्वयाधिकारनियोगस्यापि विनियुक्तविषयत्वस्य संभ
वाद्गुणीभावाभिधानं लक्षणादोषाभावाद्विशेषतोंगीकार्यमिति भावः ॥ विषयत्वोपपन्नित इति पाठं व्याचष्टे किं चेति । फलकामि
नियोज्यस्य स्वर्गादिना फलसाधनत्वं नियोगस्यैव न तु यागस्य यागस्तु केवलं तद्विषयः तद्विषयत्वं च तस्य स्वरूपेणैवोपयुज्यत इ
ति फलकारणत्वे विषयस्यापि तदनुप्रवेशकथनं गौरवपराहतमित्यर्थः शंकते यद्युच्यत इति सत्यमपूर्वं फलसाधनं न यागः यागस्तु
तद्विषय एव विषयत्वं च तस्य कृतिद्वारकं कृत्यवच्छेदद्वारा कार्यावच्छेदको हि विषयः कृतिस्त्वपूर्वफलयोरेकैव उभयोरपि साक्षा

न्तसंबंधाभावान्भावार्थगोचरकृतिसंबंधित्वस्यत्वविशिष्टत्वात् एवंकृतिद्वारापूर्वसंबंधिनोभावार्थस्यफलसंबंधित्वमाव
६९ श्यकमितिफलसंबंधवेषस्यापिविषयानुप्रवेशोंगीकार्यइतिभावः उक्तरमाहसत्समितिप्रथमतोहिलिङ्प्रत्ययेनापूर्वमेववस्तु
त्सुपरक्तंप्रतीयतेनफलंतस्यांदशायांभावार्थस्तस्यविषयीभवतितदासाक्षात्कृतिर्नीयोपरक्तासविषयकेत्वपूर्वेप्रतीतेयदातत्सा
क्षात्साधयितुमशक्यतयाकरणापेक्षकंभवतितदासाकृतिर्भावार्थेवतरतितस्यांदशायामपूर्वार्थप्रवृत्तकृतिव्याप्यत्वादपूर्व
69 प्रतिकरणंभवतिनफलंप्रतिकृतेःपूर्वंतादर्थ्यप्रतीतेःपश्चात्तुनियोगफलसाधनतयातत्करणीभूतस्यापिभावार्थस्यफलक
रणत्वंपर्यवस्यतीतितस्यप्राथमिकाद्विषयान्वयात्पूर्वभाववचनमितिव्याहतमितिभावः तदेवान्वयक्रमपर्यालोचनादपिसिध्य
तीतिव्यतिरेकमुखेनोपपादयति। अवश्यंचेतिस्वर्गकस्यसाक्षात्फलसाधनत्वाभावेपिद्वारद्वानिकयातत्त्वादितिशंकतेनन्वि
ति।विकल्प्यपरिहरतिकिमत्रेति।एवमनंगीकारेद्वारत्वमेवनसिध्यतीत्याहतद्धीति।अंततामध्येसाध्यतेउत्पाद्यतेऽन्यथाविफ
लकरणीभावस्याविषयत्वात्पूर्वभावांगीकारेचक्रकाश्रयःस्यादित्याहएवंसत्यपीति।एवंफलकरणभावस्यापूर्वकरणत्वावश्यंभा एम०
वेपिसमप्रधानभावेनस्वरूपस्यानपायइतिदूषणांविकल्पद्वयदूषणातयायोजयितुंविकल्पयति।किंचेतिकस्मिन्नसतिकिंस्यादिति
पृच्छतिकिंचानइति।प्रथमंदूषयतियदितावदितितत्रनदभिमतमेवदृष्टान्तमाहगुणाधिकारवदितिदध्नेंद्रियकामस्यजुहुयादित्स ६९

न्तरदृष्टिमात्रमेव विधीयते होमस्य प्रामाण्यासिद्धं तूपसद्ग्रहः साक्षाद्विषयत्वकारणत्वयोरनुपपन्ने होमस्य श्रुतत्वाच्चदधिविशिष्टस्य
होमस्यैव नियोगविषयत्वकारणत्वे चेति द्वयोरपि यथा इन्द्रियकामस्य पूर्वं प्रतिसमर्पणाधान्यं तद्दध्नापीत्यर्थः द्वितीयं दूषयति अथेति।
यथा उपांशुयाजमन्तरा यजति तस्मिन्नेव याग्नीषोमीयपुरोडाशद्वयोपलक्षितान्तरालकालविहितो यो उपांशुयाजस्य सोमयाजिनोग्नीषो
मीयपुरोडाशाभावे तद्व्यपचारे आज्येन प्रतिसंख्याययजेत्तेत्यमावास्यामानेपि यथापुरोडाशद्वयोपलक्षितकालस्यानपायः उपांशु
याजस्य तद्वदंगलोपेपि नकरणीभूतयागस्यानपायः नापि विषयस्येति यथा शक्तिप्रयोगप्रसंगादित्यर्थः अप्रयोजकभावेनेत्युक्तं स
त्वमं दूषयति विदूषणो तिकिंचेति अंगसंबधोनरकालं करणीभूतस्य यागस्यापूर्वविषयत्वे अपूर्वस्यांगप्रयोजकत्वं नस्यात्तथाहकयह
णस्य ग्राहकीयद्वारविनियोगस्य वासिद्धिः तत्पूर्वकत्वाच्च प्रयोजकत्वस्येत्यर्थः असिद्धिमुपपादयितुं नित्ययोगस्य ग्राहकत्वं क्रमं नि
योजकत्वप्रकारं च दर्शयति साधिकार इति। आराद्युपकारकस्य नियतोपकारकांगजातानि अधिकारविनियोगप्रयत्नभिन्नानेन लिङ्
शब्दस्य तदनुवाददर्शकया नियोगांतरस्यैव शब्ददप्रतीततया न नियोगांतरविषयतया स्वार्थोपस्थापकानि किंतु स्वरूपेणैव तदानीयो
ग्यतया प्रथमं ग्राहकेणास्वशेषतया तानि गृह्यते तद्ग्रहीतानां च तेषां साक्षाद्ग्राहकान्वयाभावाद्ग्राहकेणैव स्वीयेषु ब्रीह्यादिष्ववान्तर
नियोगेषु च शेषतया विनियुज्यंत इत्यर्थः प्रथमं विषयान्वयाभावेन द्वयं नोपपद्यते प्रयोजकत्वं तु दूर इत्याह अंगसंबंधादिति। प्रथ

मप्रतीतस्तयाफलकरणयोरेवग्राहकत्वविनियोजकत्वप्रयोजकत्वानिप्रसज्यंतइत्याहफलमितिनियोगस्याप्रयोजकत्वप्रसंगइ
१० तिइतिप्रकारांतरेणाप्याहफलेतियथापुरोडाशकपालेनतुषानुपवतीतिकपालस्यपुरोडाशशेषत्वेपितोवतुषोपवापेविनि
योगात्तुषोपवापोनप्रयोजकः किंतुपुरोडाशएवतथांगसमेतस्ययागस्यफलकरणीभावेपितोवनियोगस्यविषयत्वेसांगस्यतस्य
फलमेवप्रयोजकंस्यात्ननियोगइत्यर्थः अनेनेति। एतत्स्वोक्तन्यायेनेत्यर्थः एतद्रूपमिष्टमेवेतिशंकतेनन्विति। यतःकाम्येषुविधिर्न
70 प्रयोजकः अतएवायमपितांत्रिकप्रवादउपपद्यतइतिप्रसंगादाह अतएवेति अयंभावः नहिंस्यात्सर्वाभूतानीत्यनारभ्यवाक्येनसामा
न्येनहिंसामात्रंनिषिध्यतेश्येनयागोपिहिंसारूपः मारणानुकूलत्वात्नहिमरणंहिंसा अपितुतद्धेतुभूतोव्यापारः। तादृशश्चश्येनयागःस्य
द्विधेयःस्यात्तथासामान्यनिषेधस्यतद्व्यतिरिक्तविषयत्वादनर्थत्वंनास्तियदिनविधेयत्वंतदानिषेधगोचरत्वादनर्थत्वमितिश्ये
नानर्थत्वमंगीकुर्वतामस्याकमविधेयत्वमिष्टमेवेति। ननुश्येनेनाभिचरन्यजेतेतिलिङ्प्रत्ययेनविधिप्रतीतेर्यागस्यविधिसाधन
त्वात्कथमविधेयत्वमित्याशंक्याहयद्यपीतिविध्यधीनानुष्ठानत्वंविधेयत्वंकाम्येषुचफलस्यप्रयोजकत्वेननियोगस्याप्रयोजकत्वा
द्विधिसाधनत्वेपिविधेयत्वंनास्तीत्यर्थः भूषयतिकिमिदानीमिति अंगसमेतस्येवसाधनत्वविधिविषयत्वयोरनंगीकारेसकलांगोप राम०
संहारासिद्धेः सर्वांगसमेतस्येवतथात्वमितिवक्तव्यंततश्चकरणांशइवांगांशोविधेयत्वासिद्धेः श्येनवदग्नीषोमीयस्याप्यनर्थत्वंस्यात् १०

दित्यर्थः निषेधगोचरः अग्नीषोमीयपशाग इति शेषः अग्नीषोमीयहिंसाया विधेयत्वाभावेऽपि निषेध्यत्वं नास्तीति कश्चिद्वदति तन्मतमनु
वदति अत्र कश्चिदिति वैयासात् धार्ष्ट्यात् द्वेधा हीति साधनत्वे संभवतीत्येव तत्र तस्याकार्यस्याप्रतिपादनेन वा फलकार्यत्वेऽपि कर्मणस्त
त्साधनत्वाभावेन वा द्वेधा निषेधः प्रवर्तत इत्यर्थः ॥ द्वैधमेवोदाहरणमुखेन दर्शयति तथा चेति । अकार्यमिति मदिरास्वादजन्यसुखस्येष्टत्वे
ऽपि अनिष्टापादकत्वादकार्यत्वं बोध्यत इत्यर्थः प्रकृते तु तथा निषेधो न संभवतीत्याह तत्र न तावदिति । वचनविरोधात् ज्योतिष्टोमेन स्वर्गका
मो यजेतेत्यनेन वचनेन स्वर्गज्योतिष्टोमस्य स्वर्गसाधनत्वप्रतीतेरसाधनत्वाभिधाने तद्विरोध इत्यर्थः उक्तोपक्षे संधुक्षके दूषयति तदि
दमिति स्वर्गकार्यत्वमपि न वचनादवगम्यते किं तु सुखरूपतयानुमानादेव तस्य मदिरासुखवद्वचनेनाकार्यत्वाभिधानेन कश्चिदनुपपन्नमि
त्योऽप्यस्तीत्यर्थः ॥ तर्हि स्वर्गकार्यत्वावगमप्रमाणस्य का गतिरिति तिन्नाह प्रमाणान्तरमिति श्यग्रहणात्तथा भेदाग्रहणगर्भतया भेदाग्रहण
वशात्कार्यमेतदिति मिथ्याव्यवहारप्रवर्तकतयेत्यर्थः । तस्मादिष्टापत्तिरिति भवद्वचनमनुपपन्नमित्याह तस्मादिति न तु प्रधानस्यैव
फलकरणत्वमपूर्वविषयत्वं च न त्वङ्गानां ततश्च पूर्वोक्तसमप्राधान्यं अविधिप्रयुक्तत्वदोषश्च न प्रसज्यते अङ्गलोपे विषयविलयश्चासि
ध्यतीति करणीभूतस्य प्रधानस्य विषयत्वादिति कर्तव्यतानुग्राह्यस्य च करणत्वात् तल्लोपे प्रधानस्यैव करणीभावहानेः न त्वङ्गानां साक्षा
त्तदनुप्रवेशादिति न कश्चिद्दोष इति शंकते आहेति तदभावादिति । प्रधानस्यैव करणीभावादित्यर्थः यद्वा इतिकर्तव्यतानुग्रहीतस्य

करणीभावात् तस्य च करणत्वात् तल्लोपे प्रधानस्यैव करणीभावायाया तत्र्यंगलोपे करणत्वहानौ नित्येपि/ विषयविलयाभावेपि कर-
७१ णत्वविलयादकरणस्य कार्यार्थिभिरनुष्ठानानुपपत्तेर्नैव हीनांगानुष्ठानं न सिध्यतीति दूषयति नेत्तदिति न तु करणत्वमंगसद्भावमा-
त्रमपेक्षते न तु सकलांगसमवायं ततश्च नस्य यमधिकारितां पदायावंसंगान्यनुष्ठापयति नियोगस्तावद्भिरेव प्रधानस्य करणत्वंसि-
71 ध्यतीति कतिपयांगत्यागेपि प्रधानकरणत्वस्याविघातादनुष्ठानं स्यादिति शंकते अथ तत्रेति तर्हि काम्येप्येवमेव कतिपयांगत्यागेपिक-
रणत्वसिद्धेः विषयाविलयाद्यथाशक्ति प्रयोगः स्यादिति दूषयति तदितरत्रापीति अत्रेमं दूषणं निवृणोति किंचेति वैश्वानरं द्वादशक-
पालं निर्वपेत् पुत्रे जात इति इष्टिं विधाय श्रूयते यस्मिन्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीति अत्र चा-
र्थवादिकं पूतत्वादिफलं विवक्षितमिति प्रथमाध्याये निर्णीतं चतुर्थे किं पूतत्वादिफलं पितृगामि उत पुत्रगामीति संशये पुत्रगामित्वे
पितृगतसाधनतयायागानुष्ठानानुपपत्तेः शास्त्रफलं प्रयोक्तरीति न्यायेन पितृगाम्येवेत्याशंक्य यस्मिन्जाते ततो भवतीति वचनेनैव पुत्र-
फलस्य कंठोक्तत्वात् पुत्रफलस्यापि पितुरिष्टत्वेन तदर्थमपि साधनानुष्ठानोपपत्तेश्च पुत्रगाम्येव फलमिति प्रतिपाद्य पुनरपि विचारितं कि- राम·
मियमिष्टिः पुत्रजन्मानंतरमेव कार्या उत कृते जातकर्मणीति निमित्तानंतरत्वान्नैमित्तिकस्य तदनंतरमेवानुष्ठेयेत्याशंक्य जातकर्मानं-
तरमाविहितस्तनपानं ततः पूर्वं चेष्टेः क्रियमाणायां स्तनपानस्य बहुकालोत्कर्षः स्यात् ततश्च पुत्रविपत्तिप्रसंगात् तत्फलसाधकस्य ७१

वैयर्थ्यमेवस्यात्तस्मात्पुत्रगतफलनूपशेषिविरोधेननिमित्तस्वरूपस्याशममप्यानन्तर्यंबाधित्वाहुतएवजातकर्मणएपञ्चहेयेतिराद्धां
तितंतदनंतराधिकरणेचकिंजातेष्टिर्जातकर्मानंतरमेवकार्याउताशौचकालापगमेपर्वकालेचशमइतिविचार्यशेषिविरोधाद्विजात
कर्मानन्तमाश्रितंततःपरंविलवेकारणाभावात्तदनंतरमेवकार्येत्याशंक्यायेनकेनापिहेतुनापिनिमित्तानन्तर्यस्यबाधेसतिअंगोपसं
हारस्यकर्मत्वात्पुचितेसतिपर्वकालएवेतिनिर्णीतंइत्थंफलस्यविवक्षितत्वंतस्यचपुत्रगामित्वमिष्टेश्चजातकर्मानन्तर्यंअंगो
पसंहारार्थपर्वकालेप्रयोगश्चशास्त्रेप्रतिप्रतिपादितःनैमित्तिकत्वात्काम्यत्वाच्चसंवलिताधिकारत्वंचार्थसिद्धं अत्रपुत्रगतफलप्रति
पादनं शेषिविरोधेननिमित्तस्वभावभंगकथनार्थंतत्रांगोपसंहारापेक्षासिद्ध्यर्थंतत्रसर्वकालोत्कर्षप्रतिपादनार्थं एवंस्थितेत्रसंवलि
ताधिकाराभ्युपगमात्फलस्यापिसंभवेनफलकरणीभूतस्यैवयागस्यनियोगविषयत्वात्काम्यवत्सर्वांगोपसंहारःप्रसज्जेदित्यर्थः अवत्ते
वंकोदोषस्तत्राहतत्रश्चेति अत्रकरणीभूतस्यविषयत्वेस्वतएवांगोपसंहारापेक्षासंभवात्तत्सिध्यर्थंनिमित्तानन्तर्यबाधप्रतिपादकमा
घमधिकरणंव्यर्थंस्यादित्यर्थः ननुनिमित्तानंतरंनैमित्तिकस्यकर्तव्यत्वादंगोपसंहारावश्यंभावेचतदुपपन्नेत्यत आह करणीभूतविषय
त्वेपिजातेष्टेर्हीनांगानुष्ठानंस्यादितिशंकते ननुचेति नहिनिमित्तमनुष्ठापकं किंतुनियोगः सचांगतोपेविषयविलयान्नप्रतीयतएवअ
तोनानुष्ठापयतीतियथाशक्तिप्रयोगस्तत्रनसिध्यतीतिपरिहरति नञ्चतेपीति अधिकारविलयादधिकारनियोगप्रतीतिविलयादित्य

१२ र्थः किंच निमित्तवलादेवानुष्ठानेपि प्रतीतस्य नियोगस्यैवानुष्ठेयत्वान्नस्य चांगाभावे प्रतीत्यसिद्धेरेवहीनांगानुष्ठानेन सिध्यतीत्याह
स्कृतेपीति। उपसंहरति अलमनेनेति उपालभते तदेतदिति सर्वसिद्धान्तरूपकोशस्य साधनं वर्धकं शास्त्रं निधिं उद्धरन् स्वपनेवोन्मू
लयनकः पुमान् तमेव कथं स्वगृहे स्थापयेत् करणीभूतस्य विषयत्वोक्त्या सकलसिद्धान्तव्यवहारोपयुक्तं अपूर्वप्राधान्यादिकं
72 उन्मूलयन् कथं तदेव भवता पुनरप्यंगीकर्तुं शक्यं विरोधादिति भावः एवं च गुरुमतस्यायुक्तत्वात् पूर्वपक्षः स्थितो भूदित्याह तस्मा
दिति स्वमतेन राद्धान्तमाहान्येति निमित्तश्रवणादिति निमित्तश्रवणमेवांगसंकोचे स्वमते प्रधानहेतुरित्यर्थः। तदेवोपपादयितु
मुपक्रमते इहहीत्यादिना· अत्र यावज्जीवो निमित्तत्वसूचक इत्यर्थः अस्तु निमित्तत्वं ततः किं तत्राह निमित्तस्य चेति करणस्वरू
पस्यानंतरक्षणे कार्याविना [redacted] भूतत्वात् अन्यथा श्रुतकरणत्वहानेरेवेत्यर्थः निमित्ते सति कार्यत्वं किं स्वरूपेण फलसाधनत्वे
षेणावेति विप्रतिपन्नः पृच्छति किमिति स्वाभिमतं निर्धारयति अवश्यमिति फलसाधनत्वमेव कार्यत्वं तस्यावश्यकत्वं नाम सहकारि
समवधानेन तदभावेपि निमित्तोत्तरकालाविनाभूतस्यानुष्ठानमात्रेणाभिमतफलसाधकत्वात् ननु नैमित्तिकानां फलमेव न श्रूयते ए म०
इति तत्साधकत्वनास्ति अवश्यसाधकत्वं तु दूरे इत्याशंक्यावश्यफलसाधनत्वश्रवणावलादेव तदनुगुणमश्रुतमपि फलं निमि
त्ते श्रुतिवलेन कल्पनीयमित्याह अत एवेति निमित्तश्रुतिवलेनयस्य कस्यापि पुरुषस्य निमित्ते समुपानियति तेन कर्मणास्तदा १२

नंतर्याविनाभावप्रतीतेः कतिपयपुरुषाननिमित्ते विफले तस्य कल्प्यमाने तेषां निमित्तोपनिपाते पि कर्मानुष्ठानाभावे चानंतर्य
नियमव्याघातप्रसंगात्सर्वाभिमतमेव फलं तस्य कल्पनीयमित्यर्थः ननु भवेन्नाम तादृशफलस्यैव कल्पनं सत्तु प्रत्यवायपरि
हार एवेति नियमो नास्ति स्वर्गस्यापि तादृशत्वात् अतस्तदेव फलं स्यात् सुखरूपत्वादिति शंकते नन्विति तत्स्य तावत्सर्वाभिमति
र्नास्तीति परिहरति तस्येति प्रत्यवायपरिहारस्य तु दुःखाभावरूपत्वात्तस्य सुभिरप्याकांक्षणीयोसाविसाह प्रत्यवायेति प्रत्यवाय
परिहारस्यैव स्वर्गादपि सर्वाभिमतत्वेन नैमित्तिककर्मसाध्यत्वे सूत्रविरोधमधिकरणविरोधमतिप्रसंगं च क्रमेणाशंकते नन्वेव
मित्यादिना। अविशिष्टत्वादभिमतत्वेनसाधारणत्वादित्यर्थः विश्वजितीति तत्र स्वर्गपरिकल्पने सर्वाभिमतिरेव हेतुः अन्यस्यत
स्मादपि सर्वाभिमतत्वात्तदेव फलं कल्पनीयं स्यादिति भावः पितृयज्ञादीनामिति याप्यनिप्रसक्तेन निवृत्त्यर्थं अनुष्ठीयमानः काम्यकर्म
विशेषो पितृयज्ञशब्देनोच्यते तदादीनां अग्नेयेहोमपुरोडाशकपालं निर्वपेद्यः पापमना गृहीतः स्यादित्येवमादीनामित्यर्थः नित्यत्वं स्यादि
ति फलस्य नित्यतया साधनस्यापि तन्नित्यत्ववन्नित्यत्वं स्यादित्यर्थः ततः किं तत्राह तथा चेति अधिकरणविरोधपरिहारादेव तत्सू
त्रविरोधो पि परिहृतः स्यादित्यभिप्रायेण तद्विरोधं तावत्परिहरति उच्यत इति गौरवात्कल्पनायां प्रतीतिगौरवान्न यदि विधिरूपः प्र
त्यवायः फलं स्यात्तदा प्रतीतिलाघवं भवेत् न त्वेवं भावस्यानर्थरूपत्वादित्याह प्रत्यवायो हीति अभावरूपस्य दुःखाभावतया पुरुषार्थ

स्य यद्यपि भावनिरूपिपराधीननिरूपणत्वेन प्रतीतिगौरवमस्त्येव अथापि तस्य प्रागभावप्रध्वंसयोरन्यतरस्यापि कृतिसाध्यत्वाभा
७३ वेन स्वतन्त्रसिद्धतया फलत्वं न युक्तमित्याह न चेत्तदिति। एवं तर्हि प्रत्यवायपरिहारस्य फलवाचोयुक्तिरेव कथं तत्राह इतेनेति भवत्वेवं
तस्य विश्वजिति फलत्वकल्पनेऽनुपपत्तिस्तत्राह तत्रश्चेति स्वर्गस्यानुफलत्वे गौरवदोषाभावात्तस्यैव फलत्वमित्याह सुखस्य त्वि
ति साध्यत्वं फलत्वं एवं च सूत्रे सर्वशब्दस्य कृतपरामर्शकतया सुखाकांक्षिणः सर्वान्प्रत्युक्तं भवतीति न सूत्रविरोधोऽपीत्याह तेनेति स्वर्गस्य
73 सुखमात्ररूपत्वेनानेकापेक्षितत्वात् शत्रुपुत्रादिसाध्यसुखस्यानुसुखविशेषत्वेन कतिपयापेक्षितत्वादुःखापेक्षितस्य सामान्यस्यैव
कल्पनं युक्तमिति सूत्रार्थः अनवच्छिन्नस्य पश्वादिसाधनाविशेषितस्याविशेष इति सुखरूपफलेस्वस्यैव कल्पने सर्वापेक्षितत्ववि
शेषइत्यर्थः नैमित्तिकाधिकारे फलमनंगीकुर्वतो विश्वजित्यपि नियोज्यकल्पनामेवांगीकुर्वाणस्य प्राभाकरस्य नियोज्यविशेषणा
तयापि प्रत्यवायपरिहारकल्पने स्वर्गकल्पने वास्तौ तैर्गौरवलाघवे एव हेतुतया समन्वयनीये इत्याह येपीति ननु तत्रापि जीवनं
निमित्ततया नियोज्यविशेषणं किमिति नस्यात्तत्राह जीवदधिकार इति काम्याधिकारे नियोगेन केवलमंगेष्वेव प्रयुक्तिः करणांशे
फलनरागत एव प्रवृत्तिसिद्धेः निमित्ताधिकारे तु करणांशेपि विधेरेव प्रयुक्तिः कल्पनीयेति गुरु तत्रानत्रप्रयुक्तिरिति निमित्तकल्प राम·
नमयुक्तमितिभावः ननु प्रत्यवायपरिहारो नाम प्रत्यवायहेतुभूतादृष्टध्वंस इत्युक्तं तादृशमदृष्टं गुरुमतेनास्तित्वप्रमाणाभावात् न ७३

च निषेधवाक्यं प्रमाणं तत्र नञर्थविषयापूर्वप्रतीतेः नापि निषेधानुपपत्त्या निषेधस्य प्रत्यवायहेतुत्वं कल्प्यम् अनुपपत्त्यभावात् नि
षेधस्य नियोगाविषयोपस्थाने न च रितार्थत्वान्नियोगस्यापि निषिद्धव्यापारप्रवृत्तेन्नियोज्यत्वलाभेन निराकांक्षत्वादतो न प्रत्यवायादृष्टम
स्तीति तत्त्वं तस्य फलत्वं नांगीक्रियत इत्याशंक्याह विध्यंतर इति शेषविकरणे हीति तस्माद्ब्राह्मणायनावगुरेन्न निहन्यादिति विधिशे
षभूते नयोवगुरेत्तं शतेन यातयादित्याद्यर्थवादेनावगोरणादीनां शतयातनादीनां च साध्यसाधनभावश्रवणात्साक्षात्साध्यसाधनभा
वानुपपत्तेर्मध्ये दुरितापूर्वं कल्प्यमिति प्रतिपादितं अतो गुरुमतेऽपि प्रत्यवायादृष्टसंभवान्न ध्वंसस्य नियोज्यविशेषणत्वमाश्रित्य स्वर्गस्य
तदाश्रयत्वेन दुक्तयुक्तिरेवाश्रयणीयेति भावः पूर्वं विश्वजितो नैमित्तिकाधिकारत्वे प्रयुक्तिगौरवात्कलकामाधिकारमभ्युपगम्य फ
लविशेषकल्पनेऽस्मदुक्तयुक्तिरेवाश्रयणीयेत्युक्तमिदानीं नैमित्तिकत्वे दोष एव नास्तीति तत्त्वकामाधिकारत्वमेव रसिध्यतीति प्रसं
गात्स्वतिपादयितुमुपक्रमते अभ्युपगम्येत्यादिना जीवन इति फलेषु स्वर्गवन्निमित्तेषु जीवनस्य सामान्यत्वात् तदेव विशेषणतया कल्प्यमि
ति भावः प्रयुक्तिगौरवमाशंक्य नन्विति प्रयोजकत्वमपाकरणांशेऽपीति शेषः प्रयुक्तिकल्पनानिमित्तगौरवाद्गौरवांतरं कामाधिकारेऽप्य
स्तीति गौरवमप्यं तत्र समानमेवेति परिहरति इतरत्रापीति गौरवं तु कामाधिकार एवातिशयितं अतिदोषाधिकामपि तत्रैवेत्याह प्रस्तुते
न्ति प्रयोजकैककरसोऽपि नियोग इति प्रयोजकत्वं तस्य स्वभावः तस्य चांगेषु प्रवृत्तस्य निमित्ताधिकारत्वे करणांशेऽपि विषयाधिकसमानं कल्प्य

९४ कामाधिकारत्वे साभाविकं फलसाधनत्वं स्वरूपेणैवं कल्प्यमिति तत्रैव कल्पनागौरवातिशय इत्यर्थः न केवलं विश्वजितो नैमित्तिका
धिकारत्वे लाघवं तावन्नियोज्यविशेषणाकल्पनेपि लाघवातिशयोक्तीति प्रतिपादयति किं चेति प्रतिपन्नस्य विशेषणत्वमात्रकल्पने ला
घवं अप्रतिपन्नस्य स्वरूपेणैव परिकल्पितस्य विशेषणत्वकल्पने त्वंतगौरवमित्यर्थः आख्यातार्थाभावार्थस्तस्याविनाभावः क्रिया
74 याः कर्त्रविनाभावः प्रासंगिकमुक्त्वा प्रकृतमनुसरति प्रकृतमिति सिद्धं तं तावदनुवदति तदेवमिति । अतिप्रसंगलक्षणं तृतीयं दूषण
मनूद्य परिहरति यत्त्विति यथावश्यकत्वे पापक्षयहेतुत्वं हेतुः तदाप्यादयं दोषः नैवं किं तु निमित्तमेवावश्यकत्वे हेतुः आवश्यकत्वाद्य
पापक्षयफलकत्वं कल्पयतीति विष्णुनादीनां पापक्षयफलकत्वेपि निमित्ताश्रवणेनावश्यकत्वाभावान्न यथाशक्तिप्रयोग इत्यर्थः कः
पुनरिति अनयोरावश्यकस्य पापक्षयफलकत्वमस्ति न तु पापक्षयफलकस्यावश्यकत्वमित्यनयोर्भेदप्रयोजको हेतुः क इत्यर्थः नै
मित्तिके तु दुरितपरिहारोपक्रम्याद्यं निगमयति गंभीर इति नन्वत्र निमित्तश्रवणादावश्यकत्वं तेन यथाशक्तिप्रसंगः कथमिति शं
कते कथमिति उत्तरमाह उच्यत इति अवश्यफलसाधकत्वयस्यकार्यत्वमित्युक्तं तद्बलेनांगेष्वसत्स्वपि प्रधानस्य फलसाधकत्वं सिध्य राम०
तीत्यंगलोपेपि न फलहानिरित्यर्थः अवश्यफलसाधकत्वेप्यंगासंकोचो न सिध्यतीति शंकते नन्विति यद्यपि प्रधानस्यैवावश्यकत्वम
वगम्यते तथापि तदध्यधिकारिणो वानुष्ठितं फलमवश्यं साधयतीति वक्तव्यमित्यर्थः अस्त्वेवं ततः किं तत्राह सर्वांगेति निमित्तवस्त ९८

र्वांगशक्तिरप्यधिकारानुप्रविष्टेति वक्तव्यमित्यर्थः अतः काम्येष्वपि निमित्ताधिकारेऽपि सर्वशक्तेरधिकारिविशेषणत्वान्निमित्तवत् इव स
र्वशक्तियुक्तस्यैवावश्यकार्यत्वावगमात् हीनांगस्य फलसाधनत्वं सिध्यतीत्याह अन्यादृशेनेति सर्वशक्तेरधिकारिविशेषणत्वाभावेऽपि नित्ये
षु शूद्राणामनधिकारः अतः कालोपसंहारस्य सिध्यतीति पनिहन्तितदभिधीयतं इत्यादिना यद्यपि निमित्तवच्छक्तिमात्रमधिकारिविशे
षणं भवत्येव अथापि न सर्वशक्तेर्नियमेन तद्विशेषणत्वं युज्यत इति प्रतिपादयितुं प्रथममुपोद्घातं तयाशक्तिरूपविशेषणं प्रत्यक्षश्रुताम्ना
यानवाक्योपात्तान्निमित्तादंगवाक्यपर्यालोचनावगम्यत्वादानुमानिकत्वाच्च दुर्बलमित्याह नतावदिति श्रूयत इति तत्प्रतिपादकशब्द
भावादित्यर्थः कल्पनीयापि शक्तिर्न सर्वांगविषया अधिकारिविशेषणतया कल्प्या किंतु प्रयोगविध्यनुष्ठाप्यांगविषयैव अनुष्ठेयमात्रैक
नियतत्वात् शक्तेरित्याह नत्वयावदिति अर्थादिति श्रुतस्यार्थ्यर्थं यदनुष्ठीयते तद्यथा व्रीह्यादिद्रव्यसंपादनं यथा वा वहननादीनामावृत्तिरि
तिभावः एवं च प्रयोगविधेः प्रथममप्रवृत्तनिमित्तावरोधात्तदवगतावश्यंभावाविरोधेन सर्वांगशक्तिरधिकारिविशेषणं तद्विरोधे तु वि
रूढांगपरित्यागेन यावच्छक्या कतिपयांगशक्तिरेवाधिकारिविशेषणं भवतीत्यावांगपरित्यागः सिध्यतीत्याह सवेति सः प्रयोगवि
धिः नन्वेवं प्रयोगविधिप्रतिपादकस्य महावाक्यस्य सांगप्रधानप्रवृत्तिस्त्रेदित्येवंरूपस्य नित्येषु वैरूप्यं प्रसज्यते निमित्ताविरोधे सर्वांग
स्यैतं प्रधानमनुष्ठेयं तद्विरोधे तु कतिपयांगहीनमित्येवमुपादानपरित्यागरूपार्थद्वयस्यैकेन वाक्येन प्रतिपादयितुमशक्यत्वादित्या

७५ शंकामनूद्यपरिहरति नचेति काम्येषु यथा कामी सर्वांगसमेतं प्रधानमनुतिष्ठेत् इत्युक्तेन वा कोवेनूद्यं तथा निमित्तेनाप्यथाशक्त्यनुतिष्ठेदि
त्युक्तेपि नवेनूद्यमस्त्यर्थ इति तयेंच सिध्यतीत्यर्थः वचोभंग्या वा काप्रवृत्त्या एवं निसेधु यथाशक्तिप्रयोगसिद्धिमुपपादय प्रयोगविध्यनुष्ठाप्यांग
विषयापाएव शक्तेरधिकारिविशेषणत्वोपपादनाच्छूद्राणामनधिकारः कालोपसंहारः सिध्यतीत्यभिप्रायेणाह एतच्चेति तयथाशक्तीति
75 शक्तेरनुष्ठानमात्रनियतत्वाद्यथाशक्तिरपि तावन्मात्रनियतेत्यर्थः अस्त्वेवमभिमतार्थसिद्धिः कथं तत्राह यानित्यैति स्वाभावसिद्धः कालस्त
स्यस्वरूपतोनुपादेयत्वाद्विध्यंतरसिद्धा विद्याप्यप्रयस्य विद्यात्यध्ययनविधेरर्थज्ञानपर्यंत्वत्तया तेनैव सिद्धा अप्रयत्नत्वाधानविधिसि
द्धाः। एवं च स्वतो वा विध्यंतरेण वा सिद्धानेतान्प्रयोगविधिरुपजीवत्येव न त्वनुष्ठापयतीति तस्मादनुपादेयभूतनिमित्तवदेवैतान्यप्य
धिकारिविशेषणानि भवंतीत्यधिकारिकोटेरनुप्रविष्टानि ततश्च शूद्राणां त्रैवर्णिकाधिराध्ययनाधानयोर्धुर्येण विद्याग्न्याभावाद
नधिकारः कालोपसंहारश्च सिध्यतीति न कश्चिद्दोष इति भावः ननु निमित्तवशेन पर्यंगपरित्यागः तथा तेन प्रधानस्यैवावश्यकत्वप्रती
तेस्सर्वेषामंगानां सर्वदानुष्ठानमेवस्मात्तन्न यथाशक्तिप्रयोगः सिध्येत् किं च निमित्तेस्यपि कालविद्याद्यभावादननुष्ठाने निमित्त राम०
श्रुतत्ववगतावश्यकत्वविरोधात् कथं तेषामधिकारिविशेषणत्वं तद्धि रोधित्वेपि तेषामधिकारिविशेषणत्वकथंमंशान्तराणामप्यधि
कारिविशेषणत्वं नस्यात् ततश्च सर्वांगानामप्यधिकारिशेषणत्वं यथाशक्तिरर्थाबद्धिन्नास्यादिति शंकाद्वितयं परिहरन्स्वोक्तस्ये ७५

वतात्पर्यं विविच्य दर्शयति एतदुक्तं भवतीत्यादिना तत्र प्रथमांशंकां परिहरति अंगं हितामेति विधिसंबद्धांगविधापकवाक्योप
न्नेत्यादित्यर्थः साधीयान्संभवतीति यद्यपि निमित्तानुरोधेन सर्वांगपरित्यागः प्रसज्यते अंगवाक्यानुरोधे तु सर्वांगोपसंहारस्याद्य
थाशक्ति प्रयोगांगीकारे उभयानुरोधसंभवात्स एव पक्षः साधीयानितिभावः द्वितीयामाशंकां परिहरति संभवश्चेति उपादेयेष्वप्र
योगविध्यनुष्ठाप्येषु तत्रार्थिकांगेषु यथाशक्तिं दर्शयति यथाव्रीहीनिति व्रीहिसंपादनमार्थिकमित्यर्थः स्तोतांगेष्वपि तां दर्शयति
यथाशक्त्यावहन्यादिति तथाच स्वरूपतो विध्यंतरेण वा सिद्धानां कालाग्निविघानां प्रयोगविध्यनुष्ठाप्यत्वाभावे न यथाशक्त्याभावान्नि
मित्तवद्दधिकादिविशेषणत्वमेव सिद्धमित्यभिप्रायेणाह अग्न्याहवनीयादीति नन्वग्नेः कथमनुपादेयत्वं आहवनीये जुहोतीति तदाहवनीय
इति होमप्रस्याहवनीयस्योपादानादित्याशंकामनूद्य परिहरति यद्यपीति उपादेयत्वं द्वेधा स्वरूपस्य संपाद्यत्वेन वा अन्यतः सिद्धस्य स्व
रूपस्य कार्यार्थं व्यापार्यत्वेन वा अत्र तत्राधानविधिसंपन्नस्याहवनीयस्वरूपस्य संपाद्यत्वाभावेपि होमार्थं व्यापार्यत्वेनोपादेयत्व
भवति तत्संभवेप्यनुष्ठाप्यत्वाभावान्न यथाशक्तिः संभवतीति नाहवनीयादेरहि एणां अधिकार इति भावः यद्याहवनीयं ततो होमो
देशेनाहवनीयमात्रविधानपरत्वात्तस्य अने[illegible]नेवास्याहवनीयादन्यत्र होमविधाने शब्दाध्याहारो वाक्यभेद — स्यादित्याह तत्र
यदीति नन्वेवं रूप्यमंतरेणैवैकेन वाक्येनोभयप्रसिद्धिः किमिति न स्यादित्याशंक्याह तदा यथाशास्त्रप्रतिबंधनेन तत्संभवदपि न पुञ्ज

तेआहवनीयसंपादनस्यानन्यार्थत्वात्प्रत्यक्षस्याभावादित्युक्तमेवाहनचेति। उभयत्राधारत्वेनाहवनीयान्यांगोपादानस्याधा
१६ रत्वेनंततः किमित्याशंकततत्रायथा एवं चाहवनीयस्यात्यंतपरित्यागो वा नियमेनोपादानं वा स्यात् ननु केन चित्सुरूपेणोपा
दाने केनचित्परित्यागइत्युभयसिद्धिरित्याहतेनेति। ननु निमित्तबलेन तदनंतरमाहवनीयेसत्यसतिवा आवश्यकत्वावगमा
76 त्तद्विरोधेनाहवनीयस्यात्यंतपरित्याग एव तत्र स्वशूद्रादीनामधिकारः किमिति न स्यात्तत्राहतत्रेति वचनप्रतिपन्नयोरन्यत
रस्यात्यंतबाधेविषयसंकोचे च प्राप्ते संकोचाश्रयणमेव युक्तमितिभावः आहवनीयविधेनाहवनीयेजुहोतीति वाक्यस्यातदीय
जीवनेन आहवनीयवतोजीवनेन। उक्तयेवयुक्त्या कालविषययोरप्याहवनीयवदधिकारिविशेषणत्वं द्रष्टव्यमित्याह अनेनेति
ननु यथाहवनीये जुहोतीत्यंगवाक्यत्वाधप्रसंगात द्वत्वात्रिमित्तसंकोचः तर्हि अंगवाक्यांतरबाधप्रसंगादंगांतरेष्वपि निमित्त
संकोचः प्रसज्यत इति सर्वांगोपसंहारः स्यादितिशंकतेनन्विति। प्रसज्यतांनामांगवाक्यानांबाधः नत्वाहवनीयवाक्यवदत्यंत
बाधोभवति समर्थानां तदंगानुष्ठानसिद्धेरतो ननद्वत्वेन निमित्तसंकोचः कार्य इति परिहरति यावत्यपेक्षयापीति। ननु अंगवाक्यस्य वा
निमित्तस्य वा शक्त्यपेक्षया संकोचप्रसंगइत्यंगवाक्यस्यैव संकोचांगीकारे कोविशेषइत्यत्राहतत्रेति निमित्तस्य प्रधानवाक्यगतत्वे राम.
न प्रयोगविधेरत्यंतसंनिधानेन प्राबल्यात् द्रुत्वेन च बहिरंगवाक्यसंकोचोयुक्तस्तत्रत्वत्यंतबाधप्रसंगस्तत्र भवेदिति निमित्तसं १६

कोचः अन्यत्र तु बलादंगसंकोच इति यथाशक्तिप्रयोग इति भावः महाप्रबंधेनोपपादितं नित्यकाम्यविशेषं निगमयति काम्ये त्विति
न त्वावश्यकत्वबलेन खल्वंगसंकोचः तदेव तु न सिध्यति निमित्तस्य सत्वानंतरक्षणे कर्मानुष्ठानहेतुत्वनियमाभावादिति शंकते
अथेति तदेवोपपादयति कारणपर्यायो हीति सामग्र्यवश्यमनंतरक्षणे कार्याव्यभिचारिणी न त्वेकैकं कारणमिति भावः कार्य
पूर्वक्षण एव वस्तूनां कारणत्वं कारणशब्दप्रवृत्तिनिमित्तमेतदानीमेव शंभवान्न तस्य कारणत्वश्रुतिबलादनंतरक्षणे कर्मावश्यं
भावात्सिध्यतीति तन्निमित्तेऽङ्गसंकोचस्सिध्यतीति परिहरति न तु यत इति अनेकविधेषित्यनेनानुगतजात्यादिः प्रवृत्तिनिमित्तं
नास्तीति परिहरति। यदि पूर्वक्षण एव कारणत्वं तर्ह्यन्यथा कारणशब्दप्रयोगः कथं तत्राह यस्त्विति प्रवृत्ते तु मुख्यकारणत्वे सं
भवति लक्षणाप्रयणायोगादावश्यकत्वसिद्धिरित्याह न चेति एवं नैमित्तिकाधिकारेऽस्मिन्मते न यथाशक्तिप्रयोगमुपपादयन्नाभाक
रमतेऽत्वनुष्ठानमेव न सिध्यतीति प्रसंगादुपपादयितुमुपक्रमते यस्य नैमित्तिकमित्तिकमित्यादिना तादृशस्य निष्फलस्य कुतः सि
ध्येदिति प्रयोजनमनुद्दिश्य न मंदोऽपि प्रवर्तत इति न्यायादिति भावः तन्मते नैमित्तिकस्य निष्फलत्वमुपपादयति कार्यस्य तदीत्या
दिना कार्यमेव प्रधानं वाक्यार्थोऽलिङादिना प्रतिपाद्यते इत्यन्न सर्वं तत्प्रकरणीभूतं पदार्थजातं तदनुगुणतया संबध्यते कचि
दश्रुतमप्याकांक्षितं परिकल्प्य गुणतयैव संबध्यत इति स्थितिः अत्र तु नतावत्फलं श्रूयते नापि कल्पनीयं कार्यस्य तदपेक्षाभावा

११ दिति भावः कथं तदनपेक्षस्येत्याशंक्य स्वस्य कार्यत्वसिध्यर्थं कृतानियोज्यविशेषणतया अथवा भाव्यतयेति विकल्प्याद्यं दूषयति स्व
यमेवेति वचनेनैव स्वाज्ञात्कार्यत्वप्रतीतेर्न तत्सिध्यर्थं फलसाधनत्वं तस्य कल्प्यमित्यर्थः ननु यदि स्वतः कार्यो नियोगः तर्हि विश्वजि स
77 दादिषु फलापेक्षा कथमित्याशंक्य तत्रापि न कार्यसिध्यर्थं किं तु प्रकारान्तरेणेत्याह विश्वजिदादाविति फलापेक्षया कार्यत्वसिध्यर्थ
मिति शेषः प्रयाणादिकयेति पूर्वोपपादितक्रमेणेत्यर्थः तर्हि नियोज्यविशेषणस्य स्वर्गस्य नियोगसाध्यत्वफलत्वं कथमित्याशंक्यान्या
यान्तरेणेत्याह तथाविधस्येति तर्हि निमित्ताधिकारे तथैव नियोज्यविशेषणतया फलान्वयः स्यादिति द्वितीयं विकल्पमाशंक्याह नै
मित्तिकेष्विति तृतीयं दूषयति। न फलनयेति कथं न भाव्याकांक्षेत्याशंक्याह मत एव तयाकांक्षासंभवः नास्मन्मते भाव्यस्यैव वाक्या
र्थत्वादित्याह भावनादीति निगमयति इति नैमित्तिकमिति श्लोकं विवृण्वन्दूषयति तस्मात इति न सिध्यतीति निःफले कस्यचिद
पि प्रेक्षावतः प्रवृत्त्यसयोगादित्यर्थः ननु पश्वनुष्ठानं फलाधीनं तदा भवेन्नाम निष्फले प्रवृत्त्यसयोगः न त्वेवं कार्यतानाधीनतात्सर्वप्रवृत्तेः
अतोत्र फलाभावेपि नियोगस्य स्वतः कार्यत्वात्प्रवृत्तिः सिध्यतीत्याशंक्य तत्कार्यावगमादिति मन्तु कार्यत्वस्यैव साक्षात्प्रवृत्तिहेतुत्वं न रा म॰
फलस्य अथापि फलं विना कार्यत्वस्यानुपपत्तेः प्रवृत्तिर्नेत्सिध्यतीति परिहरति नेति कथं फलं विना कार्यत्वानुपपत्तिस्तत्राह कृतिप्र
धानमिति त्युद्देश्यं हि कार्यं यस्मिन्निच्छाप्रवृत्तेति तदेव तदुद्देश्यं इच्छाफलं तत्साधनमात्रविषयेति फलाभावे कार्यत्वं न सिध्यतीत्यर्थः न ११
ल

तु किमत्र नियोगस्य फलसाधनत्वाभावे कार्यत्वे च प्रमाणमेव नास्तीत्युच्यते अथ फलसाधनत्वाभावादकार्यत्वमनुमीयते नाद्यः लिङ्‌शब्द
स्यैव प्रमाणत्वात् न द्वितीयः अनुमानस्यागमविरुद्धस्य कालात्ययापदिष्टत्वादिति शंकते नन्विति परिहरति सत्यमिति आगमैर्निर्णय
पर्यंतं प्रवृत्ते सति तद्विरोधेन प्रवर्तमानमनुमानं भवेत्कालात्ययापदिष्टं न चैवं अत्र लिङः सैकेनैव निष्फलेन हेतोः संबंधयोग्यतया
शब्दप्रसापकत्वस्य योग्यत्वादग्निसेकसंबंधादन्विताभिधानं भवतीति विमर्शदशायामाकांक्षायोग्यतादिपरामर्शापेक्षा वा अर्थबोध
एव पदानां पदार्थस्मरणास्य तु ततः पूर्वभावितया न तत्र योग्यतापेक्षास्तीति लिङ्‌पदवाच्ये कार्ये न योग्यत्वमपेक्षणीयमिति न कश्चिद्वि
रोध इति भावः। पूर्वपक्षं विवृणोतीति पदिमन्येनेति परिहारं विवृणोतीति तन्नेति पद्येऽपि पदात् पदार्थस्मरणे न योग्यतापेक्षास्ति अथापि य
त्रार्थद्वयस्यान्योन्यान्वितस्यैकपदवाच्यत्वं तत्र युसन्नितयोरन्योन्यान्वये सति संभवेत् अन्वययोग्यताधीनइति चायोग्यत्वे तदर्थान्व
यस्यैवासंभवात्तत्र युसन्निरेव न सिध्यति पदात्तदर्थस्मरणं तु दूरइति भावः। शंकते स्यादेतदिति युसन्निः समय एव खलु योग्यतापे
क्षास्मरणावेलायां एवं च युसन्निस्थाने मिमते कामाधिकारे नियोगस्य फलवत्त्वयाहतिसंबंधयोग्यत्वे न तत्र युत्पत्तेनोनिहत्यायां नेमि
त्ति के योग्यत्वाभावेपि स्मरणं सिध्यतीति तस्याकार्यतानुमानं कालात्ययापदिष्टमित्यर्थः। परिहरति तन्नेति यदि कामाधिकारे फल
त्वं हत्वस्यान्वययोग्यतया कार्यत्वसाधनमंगीकृतं तत्र्ध्यश्रुतमपि फलं निमित्तेपि तत्सिध्यर्थमकामेनाप्यंगीकार्यं विश्वजिदादौ नियो

त्यवदित्यर्थः। एवं च फलस्य कार्यसाधनं द्वारा प्रवृत्त्युपयोगित्वात्तदभावेनैमित्तिकेषु प्रवृत्तिरेव न सिध्यतीति दूषणमुपसंहरति त
दभाव इति। ननु नैमित्तिकेषु फलांगीकारे निमित्तफलयोः उभयोरनुपादेयत्वेनोद्देश्यत्वाद्वाक्यभेदः प्रसज्यत इति तेषां निष्फलत्व
मंगीकार्यमित्याशंक्य ते निमित्तफले इत्याकांक्षायामसत्यामेकप्रकारेणोद्देश्यद्वयसंबंधे वाक्यभेदः स्यात्त्र तु प्रकारभेदेनोभय
संबंधाकांक्षासंभवाद्युद्देश्यद्वयेपि न वाक्यभेद इति परिहरति उच्यत इति तत्रैकप्रकारेणोद्देश्यद्वयाभावं प्रथमं निरूपयति विधे
यस्य हीति अयं भावः विधेयाया भावनायाः प्रथमं फलेनैव संबंधः तस्या भाव्यतयाकांक्षितत्वात्तु निमित्तेन तस्याः किं केन कथमंशेष
न तु प्रविष्टतया नाकांक्षितत्वात् अतस्तस्य विधेयभावनाया उद्देश्यभूतेनापि निमित्तेनासंबंधादेकवाक्यत्वमित्यर्थः कथं तर्हि निमित्ता
न्वयः तत्राह तत्कर्मव्यक्तताया इति यद्यपि विनियोगवेलायां भावनायाः फलेनैवान्वयः अथापि प्रयोगवेलायामनुष्ठेयत्वेन तस्या
यदा प्रतीयते तदा तेनैव वेषेण तदा निमित्तेन संबंध इति प्रकारभेदसंभवान्न वाक्यभेद इत्यर्थः। इदानीमाकांक्षासंभवाद्यु न वाक्यभे
द इत्याह साकांक्षत्वाच्चेति तदेव दर्शयति भवति हीति किमर्थमित्याकांक्षेति अत एवाश्रुतमपि फलं कल्प्यत इत्यर्थः प्रकारभेदाभावे तु राम॰
भवत्येव वाक्यभेद इत्याह समाने इति तत्र प्रति निमित्तं प्रतिफलं च वाक्यपरिसमाप्तेः प्रतिनिमित्तं प्रतिफलं च कर्मावृत्तिर्भवतीत्यर्थः। न १८

७९ नुनिमित्तस्योद्देश्यत्वमंगीकृत्यैव प्रकारभेदादिभिर्वाक्यभेदपरिहारो मंडनाचार्यवचनविरुद्ध इत्याशंकामनूद्य परिहरति यवित्ति
प्रासंगिकं समापयति अलमिति सिद्धांतमुपसंहरति तस्मादिति अधिकरणं निगमयति पार्थसारथिमिश्रैरिति ॥ श्री॰ ॥ इति रामा
नुजाचार्यविरचिते न्यायरत्नमालाव्याख्याने नायकरत्ने नित्यकाम्यविवेकव्याख्यानं समाप्तं ॥ ॥श्रीरामचंद्राय नमः ॥ श्रीशिवविष्णु॰

79

मीमांसा

न्यायरत्नमालाटीका

२६००